मानसं ज्ञानयज्ञं विस्तारयेयुस्तदा पूर्वाह्णादिकाल एव साधनरूपेण कल्पनीय:ll

पदार्थ:-- हे मनुष्यो! (यत्) जब (हविषा) ग्रहण करने योग्य (पुरुषेण) पूर्ण परमात्मा के साथ (देवा:) विद्वान् लोग (यज्ञन्) मानसज्ञान यज्ञ को (अतन्वत) विस्तृत करते हैं, (अस्य) इस यज्ञ के (वसन्त:) पूर्वाह्ण काल ही (आज्यम्) घी (ग्रीष्म:) मध्याह्न काल (इध्म:) इन्धन प्रकाशक और (शरत्) आधी रात (हवि:) होमने योग्य पदार्थ (आसीत्) है, ऐसा जानो ll

भावार्थ:-- जब बाह्य सामग्री के अभाव में विद्वान् लोग सृष्टिकर्ता ईश्वर की उपासनारूप मानसज्ञान यज्ञ को विस्तृत करें, तब पूर्वाह्न आदि काल ही साधनरूप से कल्पना करना चाहिये ll

सप्तास्येत्यस्य नारायण ऋषि: l पुरुषो देवताl अनुष्टुप छन्द: l गान्धार: स्वर:l पुनस्तमेव विषयमाह ll फिर उसी विषय को अगले मन्त्र में कहा है ll

-- ------------------------------ ------------------------------ -- --------------

Page 120 of 523

ॐ सप्तास्यासन् परिधयस्त्रि : सप्त
समिधः कृताः ।

देवा यद्यज्ञं तन्वाना अवध्नन्
पुरुषं पशुम् ॥ (पु॰सू॰ 15)

अन्वयः --- यद् देवा यज्ञं पुरुषं पशुम्
तन्वाना अवध्नन् अस्य सप्त आसन् परिधय :
त्रिसप्त समिधः कृताः ।

शब्दार्थः ---- देवा ---देवताओंने ; यद् ---जिस;
यज्ञं ---यज्ञ के लिये ; पुरुषं ---पुरुष को ;
पशुम् ---प्राणी को , अर्थात बलि पशु ;
तन्वाना ----कोमलता से , संकल्प द्वारा ;
अवध्नन् ----बान्ध दिया , निश्चित् कर दिया ,
नियुक्त किया ; अस्य ---इसकी ; सप्त -----सात ;
आसन्---बिस्तर , आसन; परिधय :----परिधियां ;
त्रिसप्त ----इक्कीस् ; समिधः —-समिधायें ;
कृताः ----बनायी गई ;

अर्थ :-- जब देवताओं ने जिस यज्ञ के लिये
पुरुष प्राणी को संकल्प द्वारा नियुक्त
किया था सात समुद्र उसके आसन की परिधि थे
और इक्कीस प्रकार की समिधायें बनाई थी । (यह
अलग बात है कि मानसिक यज्ञ में छन्दों को
ही समिधा कल्पित किया गया है ।

Page 122 of 523

श्रीमद्भागवत में अर्थ इस प्रकार मिलता है-------प्रजापति के प्राणरूपी देवताओं ने जब मानसिक यज्ञ का अनुष्ठान करते समय संकल्प द्वारा पुरुष रूपी पशु का बन्धन किया था, उस समय सात समुद्र, इस यज्ञ की परिधि थे और इक्कीस प्रकार के छंदों की समिधा हुई! (गायत्री आदि 7, श्रुति जगति आदि 7, और कृष्नि आदि 7---ये 21 छन्द हैं I)

कहीं अन्यत्र इसका अर्थ इस प्रकार मिलता है----- देवों ने जिस यज्ञ का विस्तार किया, उसमें विराट पुरुष को ही पशु (हव्य) रूप की भावना से बाँधा (नियुक्त किया), उसमें यज्ञ की सात परिधियाँ (सात समुद्र) एवं इक्कीस (छंद) समिधाएँ हुईंI

मेरे अभिप्राय से अर्थ यह है--देवताओं ने जिस यज्ञ के लिये पुरुष प्राणी को संकल्प द्वारा नियुक्त किया था सात समुद्र उसके आसन की परिधि थे और इक्कीस प्रकार की समिधायें बनाई थी I (यह अलग बात है कि मानसिक यज्ञ में छन्दों को ही समिधा कल्पित किया गया है I)

गीता प्रेस गोरखपुर के वेद-कथाङ्क में अर्थ:- देवताओं ने जब यज्ञ करते समय

Page 122 of 523

Page 123 of 523

(संकल्प से) औरुश्रुप पशु का बंधन किया, तब सात समुद्र इसकी परिधि (मेखलाएँ) थे। इक्कीस प्रकार के छंदों की (गायत्री,अतिजगती, और कृति में से प्रत्येक के सात-सात प्रकार से) समिधाएँ बनीं।

श्री राम शर्मा आचार्य गायत्री तपोभूमि, मथुरा, द्वारा कृत अनुवादित यजुर्वेद के अध्याय 31 में पुरुषसूक्त के २२ सूक्तों व्याख्या है जो इस प्रकार है:-

ॐ सप्तास्यासन् परिधयस्त्रि: सप्त
समिधः कृताः I

देवा यद्यज्ञं तन्वाना s अवध्नन्
पुरुषं पशुम् II

जब देवताओं ने मानस यज्ञ को विस्तृत करते हुए इस विराट्पुरुष में पशु रूप की भावना कर बाँधा, तब यज्ञ की सात परिधियाँ हुईं और इक्कीस छंद इसकी समिधाएँ हुईं I

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

सप्तास्यासन् परिधयस्त्रि: सप्त
समिधः कृताः I

Page 123 of 523

देवा यद्यज्ञं तन्वाना ऽ अवध्नन्
पुरुषं पशुम् ॥

देवों ने जिस यज्ञ का विस्तार किया, उसमें विराट्पुरुष को ही पशु (हव्य) रूप की भावना से बाँधा (नियुक्त किया), उसमें यज्ञ की सात परिधियाँ (सात समुद्र) एवं इक्कीस (छंद) समिधाएँ हुईं।

श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मितं संस्कृतार्यभाषाभ्यां समलङ्कृतम् व्याख्या

:-

सप्तास्यासन् परिधयस्त्रि: सप्त
समिधः कृताः ।

देवा यद्यज्ञं तन्वानाऽअबध्नन्
पुरुषं पशुम् ॥

सप्त । अस्य । आसन्। परिधय । इति परिऽधय :। त्रि :। सप्त । समिध इति सम्ऽइध :। यत् । यज्ञम् । तन्वाना :। अबध्नन् । पुरुषम् । पशुम् ॥

पदार्थ :--(सप्त) गायत्र्यादीनि छन्दांसि (अस्य) यज्ञस्य (आसन्) सन्ति (परिधय :) परित : सर्वत : सूत्रवद्धीयन्ते ये ते (त्रि :)

Page 125 of 523

त्रिवारम् (सप्त) एकविंशति: प्रकृति: महत्तत्वं, अहंकार:, पञ्च स्थूलानि, पञ्च सूक्ष्मभूतानि, पञ्च ज्ञानेन्द्रियाणि,सत्त्वरजस्मांसि त्रयो गुणाश्चेत्येकविंसशति: (समिध:) सामग्रीभूताः (कृता:) निष्पदिता: (देवा:) विद्वांसः (यत्) यम् (यज्ञम्) मानसं ज्ञानमयम् (तन्वानाः) विस्तृण्वन्तः (अबध्नन्) बध्नन्ति (पुरुषम्) परमात्मानम् (पशुम्) द्रष्टव्यम्II

अन्वय:--हे मनुष्या:! यद्यं यज्ञं तन्वाना देवा: पशुं पुरुषं हृद्यबध्नन् तस्याऽस्य सप्त परिधय आसंस्त्रि: सप्त समिध: कृतास्तं यथाविद विजानीत II

भावार्थ:--हे मनुष्या:! यूयमिममनेकविधकल्पितपरिध्यादिसामग्रीयु क्तं यज्ञं कृत्वा पूर्णमीश्वरं विज्ञाय सर्वाणि प्रयोजनानि साध्नुत II

पदार्थ:--हे मनुष्यो! (यत्) जिस (यज्ञम्) मानसज्ञान यज्ञ को (तन्वाना:) विस्तृत
करते हुए (देवा:)विद्वान् लोग (पशुम्) जानने योग्य (पुरुषम्) परमात्मा को हृदय में (अबध्नन्) बांधते(अस्य) इस यज्ञ के

Page 125 of 523

(सप्त) सात गायत्री आदि छन्द (परिधय :) चारों ओर से सूत के सात लपेटों के समान (आसन्) हैं (त्रि :, सप्त) इक्कीस अर्थात् प्रकृति , महत्तत्व , अहंकार , पांच सूक्ष्मभूत , पांच स्थूलभूत , पांच ज्ञानेन्द्रिय और सत्त्व , रजस् , तमस् , तीन गुण ये (समिध :) सामग्रीरूप (कृता :) किये उस यज्ञको यथावात् जानो ॥

भावार्थ :-- हे मनुष्यो ! तुम लोग इस अनेक प्रकार से कल्पित परिधि आदि सामग्री

से युक्त मानस यज्ञ को कर उससे पूर्ण ईश्वर को जान के सब प्रयोजनों को सिद्ध

करो ॥

यज्ञेनेत्यस्य नारायण ऋषि :। पुरुषो देवता । विराट् त्रिष्टुप छन्द :। धैवत : स्वर :॥ पुनस्तमेव विषयमाह ॥ फिर उसी विषय को अगले मन्त्र में कहा है ॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

Page 127 of 523

ते ह् नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः I (पु॰सू॰16)

अन्वयः- तानि धर्माणि देवाः प्रथमानि आसन् यज्ञेन यज्ञम् अयजन्त I ते ह् नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः देवाः सन्ति I

शब्दार्थः---- तानि---उन्होंने, जिन्होंने; धर्माणि---धर्मात्मा, महात्मा; देवाः--- देवताओं ने; प्रथमा---पहले से ही, पूर्व में ही; न्यासन्---धरोहर के रूप में रखे, सङ्कल्प् किये हुये; यज्ञेन---यज्ञ के द्वारा; यज्ञम्---यज्ञ-पुरुष का,; अयजन्त---- अनुष्ठान किया; ते---वे; ह्---ही; नाकं---- स्वर्गमें; महिमानः---महत्व, सम्मान, महानता को प्राप्त हुए; सचन्त---संचय करते हैं; यत्र---जहां; पूर्वे---पूर्व में; पहले से ही; साध्याः---साधक गण; देवाः--देवगण; सन्ति—रहते हैं;

अर्थः--- धर्मात्मा देवताओं जिन्होंने पूर्वं में धरोहर स्वरुप संकल्प किये हुये यज्ञके द्वारा यज्ञपुरुष का अनुष्ठान किया I वे ही स्वर्गलोक की महानता अर्थात स्वर्ग के यश को सञ्चय करते हैं जहां पूर्व से ही साधक, सुर देवगण रहते हैं I अर्थात

Page 127 of 523

Page 128 of 523

इसप्रकार देवताओं ने सबसे पहले पुरुष की आराधना की, यद्यपि यह एक अध्यात्मिक यज्ञ था, फिर भी यह धर्म में सबसे पहले हुआ, जो यह यज्ञ करते हैं, वे अवश्य ही स्वर्ग को प्राप्त करेंगे जिनको साध्य देवताओं ने प्राप्त किया है I

श्रीमद्भागवत में इसका अर्थ इस प्रकार मिलता है---- देवताओं ने पूर्वोक्त मानसिक यज्ञ द्वारा यज्ञस्वरूप पुरुष-प्रजापति की आराधना की I इस आराधना से समस्त जगत् को धारण करने वाले वे पृथ्वी आदि मुख्य भूत प्रकट हुए I इस यज्ञ की उपासना करने वाले महात्मा लोग उस स्वर्गलोक को प्राप्त होते हैं, जहां प्राचीन साध्य देवता निवास करते हैंI

कहीं अन्यत्र इसका अर्थ इस प्रकार मिलता है----- आदि श्रेष्ठ धर्मपरायण देवों ने, यज्ञ से यज्ञरूप विराट सत्ता का यजन किया | यज्ञीय जीवन जीनेवाले धार्मिक महात्माजन पूर्वकाल के साध्य देवताओं के निवास, स्वर्गलोक को प्राप्त करते हैं I ईश्वर की महिमा बताने के लिए महामना पं. मदनमोहन मालवीय जी ने ठीक ही कहा है------

Page 128 of 523

Page 129 of 523

गीता प्रेस गोरखपुर के वेद-कथाङ्क में अर्थ:- --देवताओं ने (पूर्वोक्त रूप से)
यज्ञ के द्वारा यज्ञस्वरूप परम्-पुरुष का यजन (आराधन, यज्ञ) किया। इस यज्ञ से सर्व प्रथम धर्म उत्पन्न हुए। उन धर्मों के
आचरण से वे देवता महान महिमावाले हो कर उस स्वर्गलोक का सेवन करते हैं, जहां प्राचीन साध्य-देवता निवास करते हैं।[अत:हम सभी सर्वव्यापी जड़-चेतनात्मकरूप विराट् पुरुष की करबद्ध स्तुति करते हैं।]

श्री राम शर्मा आचार्य गायत्री तपोभूमि, मथुरा, द्वारा कृत अनुवादित यजुर्वेद के अध्याय 31 में पुरुषसूक्त के २२ सूक्तों की व्याख्या है जो इस प्रकार है:-

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् I

ते ह् नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः I

मानस यज्ञ के द्वारा देवताओं ने यज्ञ रूप प्रजापति की पूजा की और वे धर्मधारकों में प्रमुख हुए I जिस स्वर्ग लोक में प्राचीन

Page 129 of 523

Page 130 of 523

साध्य देवता निवास करते हैं, उसी स्वर्ग को सिद्ध महात्माजन प्राप्त होते हैं I

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् I

ते ह् नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः I

आदिकालीन श्रेष्ठ धर्मपरायण देवों ने, यज्ञ द्वारा यज्ञरूप विराट् का यजन कियाI यज्ञीय जीवन जीनेवाले (याजक) पूर्वकाल के सिद्ध- साध्यगणों तथा

देवताओं के निवास महिमाशाली स्वर्गलोक को मानते हैं I

श्रीमद्दयानन्दसरस्वतीस्वामिनानिर्मितं संस्कृतार्यभाषाभ्यां समलङ्कृतम् व्याख्या:-

यज्ञेन यज्ञमयजन्त देवास्तानि
धर्माणि प्रथमान्यासन् I

Page 130 of 523

ते ह् नाकं महिमानः सचन्त यत्र
पूर्वे साध्याः सन्ति देवाः ॥

यज्ञेन । यज्ञम । अयजन्त । देवा :। तानि ।
धर्माणि । प्रथमानि । आसन्॥ ते । ह् । नाकम् ।
महिमान :। सचन्त । यत्र । पूर्वे । साध्या :।
सन्ति । देवा :।

पदार्तः :--(यज्ञेन) उक्तेन ज्ञानेन
(यज्ञम्) पूजनीयं सर्वरक्षकमग्निवत्तपनम्
(अयजन्त) पूजयन्ति (देवा :) विद्वांस : (तानि)
ईश्वरपूजनादीनि (धर्माणि) धारणात्मकानि
(प्रथमानि) अनादिभूतानि मुख्यानि (आसन्)
सन्ति (ते) (ह) एव (नाकम्) अविद्यामानदु :खं
मुक्तिसुखम् (महिमान :) महत्त्वयुक्ता :
(सचन्त) समवयन्ति प्राप्नुवन्ति (यत्र)
यस्मिन् सुखे (पूर्वे) इत: पुर्वसम्भवा :
(साध्या :) कृतसाधना : (सन्ति) (देवा :)
देदीप्यमाना विद्वांस :॥

(निरुक्तकार इमं मन्त्रमेव व्याचष्टे -
यज्ञेन यज्ञमयजन्त देवा
अग्निनाग्निमयजन्त देवा अग्नि
पशुरासीत्तमालभन्त तेनायजन्तेति च
ब्राह्मणम् । तानि धर्माणि प्रथमान्यासन्
ते ह नाकं महिमान : समसेवन्त यत्र पूर्वे

Page 132 of 523

साध्या: सन्ति देवा: साधना द्युस्थाने देवगणा इति नैरुक्ता:II निरुक्ति नैगम अध्याय 12I खं 41II)

अन्वय:--हे मनुष्या:! ये देवा यज्ञेन यज्ञमयजन्त तानि धर्माणि प्रथमान्यासन् ते महिमान: सन्तो यत्र पूर्वे साध्या देवा: सन्ति तन्नाकं ह सचन्त
तद्यूयमप्याप्नुत II

भावार्थ:--मनुष्यैर्योगाभ्यासादिना सदा परमेश्वर उपासनीय: I अनेनानादिकालीनधर्मेण मुक्तिसुखं प्राप्य पूर्वविद्वद्वदानन्दितव्यम्II

पदार्थ:-- हे मनुष्यो! जो (देवा:) विद्वान् लोग (यज्ञेन) पूर्वोक्त ज्ञानयज्ञ से(यज्ञम्)

पूजनीय सर्वरक्षक अग्निवत् तेजस्वी ईश्वर की (अयजन्त) पूजा करते हैं (तानि) वे ईश्वर की पूजा आदि (धर्माणि) धारणरूप धर्म (प्रथमानि) अनादि रूप से मुख्य (आसन्) हैं (ते) वे विद्वान् (महिमान:) महत्त्व से युक्त हुए (यत्र) जिस सुख में (पूर्वे) इस समय से पूर्व हुए (साध्या:) साधनों को किये

Page 132 of 523

Page 133 of 523

हुए (देवा:) प्रकाशमान विद्वान् (सन्ति) हैं, उस (नाकम्) स्ब दु:खरहित मुक्तिसुख को (ह) ही (सचन्त) प्राप्त होते है, उसको तुम लोग प्राप्त होओ II

भावार्थ:--मनुष्यों को चाहिए कि योगाभ्यास आदि से सदा ईश्वर की उपासना कर इस अनादिकाल से प्रवृत्त धर्म से मुक्तिसुख को पाके पहिले मुक्त हुए विद्वानों के समान आनन्द भोगें II

अद्भय इत्यस्योत्तरनारायण ऋषि:I आदित्यो देवताI भुरिक् त्रिष्टुप् छन्द:I धैवत स्वर:II पुनस्तेनमेव विषयमाह II फिर उसी विषय को अगले मन्त्र में कहा है II

------------------------- -------------------------
-- ----------------------

ऋग्वेद के अनुसार पुरुष सूक्त के 16 सूक्तों का उल्लेख मिलता है I

बाद में 2 सूक्त और संज्ञान में आये हैं जो इस प्रकार हैं I वैसे यजुर्वेद सायण-भाष्य में २२ सूक्त बताये गये हैं I विशेष— [(कृष्ण यजुर्वेद पुरुषसूक्त व सायण

Page 133 of 523

Page 134 of 523

भाष्य और सांख्य मेंइसप्रकार दिया गया है
—

ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णें तमसस्तु पारे ।

सर्वाणि भूतानि विचिन्त्य धीरो नामानि कृत्वाभिवदन् यदास्ते ।।17 II

अन्वय -तमस: तु पारे आदित्यवर्णे एतम् महान्तम् पुरुषं अहम् वेद । यत् धीरो सर्वाणि भूतानि विचिन्त्य नामानि कृत्वा अभिवदन् आस्ते।।

शब्दार्थ = तमस: -अविद्या रूप अंधकार से, तु-तो,पारे -अतीत /परे/से दूर, आदित्यवर्णे - सूर्य की भांति स्वयंप्रकाशस्वरूप में, एतम् - इस, महान्तम् पुरुषं- महान पुरुष (परमेश्वर) को, अहम् वेद -मैं जानता हूं । यत्-जो, धीरो
- ध्यानशील/ बुध्दिमान/ अथवा बुद्धिमान के लिए, सर्वाणि भूतानि - सभी प्राणियों को, विचिन्त्य - विचार करके / उनके अनुरूप चिंतन करके, नामानि कृत्वा - नामों/ विभिन्न नामसंज्ञा प्रदान करके, अभिवदन्-

Page 134 of 523

Page 135 of 523

संबोधित करते हुए /नमस्क्रिया द्वारा, आस्ते- विराजमान हैं / बैठा है।।

सरलार्थ = अविद्या रूप अंधकार से अतीत अर्थात् परे सूर्य के भांति

स्वयंप्रकाशस्वरूप इस महान पुरुष (परमेश्वर) को मैं जानता हूं । जो ध्यानशील, बुद्धिमान (अथवा बुद्धिमान के लिए) सभी प्राणियों को विचारकर विभिन्न नामसंज्ञा प्रदान करके, संबोधित करते हुए विराजमान है अर्थात् बैठा (प्रतिष्ठित) है) पाठान्तर से यह श्लोक इस प्रकार भी है:--वेदाहमेतम् पुरुषम् महान्तम् आदित्यवर्णम् तमसस्तु पारे । सर्वाणि रूपाणि विजित्य धीरो नामानि कृत्वा भिवदन्यदास्ते॥17II

अर्थ:--मैं उस महान, प्रसिद्ध पुरुष को जानता हूँ, जो सूर्य के भांति चमकता है जो अन्धकार से परे है, जिसने सभी स्वरूपों को बनाया, जिसने सबको नाम दिया और जो सब पर राज्य करता है I (इस श्लोक में विचिन्त्य के स्थान पर विजित्य शब्द का प्रयोग किया गया है जिसका अर्थ होता है जीतकर अर्थात सबको अपने अधिकार में लेकर)

Page 135 of 523

Page 136 of 523

श्री राम शर्मा आचार्य गायत्री तपोभूमि, मथुरा, द्वारा कृत अनुवादित यजुर्वेद के अध्याय 31 में पुरुषसूक्त के २२ सूक्तों
की व्याख्या है उसमें यह श्लोक संख्या 18 पर दिया है जिसका का अर्थ इस प्रकार है:-

वेदाहमेतं पुरुषम महान्तमादित्यवर्णं तमस: परस्तात् I

तमेव विदित्वाति मृत्युमेति नान्य:पन्था विद्यतेऽयनाय II

मैं इस अत्यंत महान, अनुपम आदित्य रूप पुरुष को अन्धकार रहित जानता हूँI उस आदित्य को जान लेने पर मृत्यु को जीता जाता है I आश्रय प्राप्ति के लिए अन्य कोई मार्ग नहीं है I

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमस: परस्तात् I

तमेव विदित्वाति मृत्युमेति नान्य:पन्था विद्यतेऽयनाय II

Page 136 of 523

सूर्य के समतुल्य तेजसम्पन्न ,
अंधकाररहित , वह विराट् पुरुः है , जिसको
जानने के पश्चात साधक (उपासक) को मोक्ष की
प्राप्ति होती है । मोक्ष प्राप्ति का यही
मार्ग है , इससे भिन्न कोई मार्ग नहीं ।

श्रीमद्दयानन्दसरस्वतीस्वामिना
निर्मितं संस्कृतार्यभाषाभ्यां
समलङ्कृतम्

व्याख्या :--

वेदाहमेतं पुरुषं
महान्तमादित्यवर्णं तमस : परस्तात् ।

तमेव विदित्वाति मृत्युमेति
नान्य :पन्था विद्यतेऽयनाय ॥

वेद । अहम्। एतम् । पुरुषम् । महान्तम् ।
आदित्यवर्णमित्यादित्यऽवर्णम् ।
विदित्वा । अति। मृत्युम् । एति । न। अन्य :।
पन्था :। विद्यते । अयनाय ॥

पदार्थ :-- (वेद) जानामि (अहम्) (एतम्)
पूर्वोक्तं परमात्मानाम् (पुरुषम्)

स्वस्वरूपेण पूर्णम् (महान्तम्)
महागुणविशिष्टम् (आदित्यवर्णम्)

आदित्यस्य वर्ण : स्वरूपमिव स्वरूपं यस्य तं स्वप्रकाशम् (तमस:) अज्ञानान्धकाराद्वा (परस्तात्) परस्मिन् वर्त्तमानम् (तम्) (एव) (विदित्वा) विज्ञाय (अति) उल्लङ्घने (मृत्युम्) दु :खप्रदं मरणम् (एति) गच्छति (न) (अन्य :) भिन्न : (पन्था :) मार्ग : (विद्यते) भवति (अयनाय) अभीष्टस्थानाय मोक्षाय ॥

अन्वय :--हे जिज्ञासोऽहं यमेतं महान्तमादित्यवर्णं तमस : परस्ताद्वर्त्तमानं पुरुषं वेद तमेव विदित्वा भवान् मृत्युमत्येति । अन्य : पन्था अयनाय न विद्यते ॥

भावार्थ :-- यदि मनुष्या ऐहिकपारमार्थिके सुखे इच्छेयुस्तर्हि सर्वेभ्यो बृहत्तमं स्वप्रकाशानन्दस्वरूपमज्ञानलेशाद् दूरे वर्त्तमानं परमात्मानं ज्ञात्वैव मरणाद्यगाधदु :खसागरात् पृथग्भवितुं शक्नुवन्त्ययमेव सुखप्रदो मार्गोऽस्ति । अस्मादन्य : कश्चिदपि मनुष्याणां मुक्तिमार्गो न भवति ॥

पदार्थ :-- हे जिज्ञासु पुरुष ! (अहम्) मैं जिस (एतम्) इस पूर्वोक्त (महान्तम्) बड़े -

बड़े गुणों से युक्त (आदित्यवर्णम्) सूर्य के तुल्य प्रकाशस्वरूप् (तमस:) अन्धकार वा अज्ञान से (परस्तात्) पृथक् वर्त्तमान (पुरुषम्) स्वस्वरूप से सर्वत्र पूर्ण परमात्मा को (वेद) जानता हूं (तम्, एव) उसीको (विदित्वा) जान के आप (मृत्युम्) दु:खदायी मरण को (अति, एति) उल्लङ्घन कर जाते हो, किन्तु (अन्य:) इससे भिन्न (पन्था:) मार्ग (अयनाय) अभीष्ट स्थान मोक्ष के लिये (न, विद्यते) नहीं विद्यमान है ॥

भावार्थ :-- यदि मनुष्य इस लोक-परलोक के सुखों की इच्छा करें तो सबसे अति बड़े स्वयंप्रकाश और आनन्दस्वरूप अज्ञान के लेश से पृथक वर्त्तमान परमात्मा को मरणादि अथाह दु:खसागर से पृथक हो सकते हैं, यही सुखदायी मार्ग है, इससे भिन्न कोई भी मनुष्यों की मुक्ति का मार्ग नहीं है ॥

प्रजापतिरित्यस्योत्तरनारायण ऋषि:। आदित्यो देवता । भुरिक् त्रिष्टुप् छन्दः । धैवत

स्वर:॥ पुनरीश्वर: कीदृश इत्याह ॥ फिर ईश्वर कैसा है, इस विषय को अगले मन्त्र में कहा है ॥

Page 140 of 523

-- ------------------------------ ------------------------------ -- ----------------

श्री राम शर्मा आचार्य गायत्री तपोभूमि, मथुरा, द्वारा कृत अनुवादित यजुर्वेद के अध्याय 31 में पुरुषसूक्त के २२ सूक्तों
की व्याख्या है जो इस प्रकार है:-

अद् भ्य: सम्भृत: पृथिव्यै रसाच्च विश्वकर्मण: समवर्त्तताग्रे I

तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्यदेवत्वंमाजानमग्रे II

पृथ्वी आदि की रचना के निमित्त पंचभूत से जिस रस की पुष्टि हुई और जो

विश्वकर्म वाला है, उसका रस सर्वप्रथम उत्पन्न हुआ, उस रस को और रूप को धारण करते हुए सूर्य नित्य प्रकट होते हैं I

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

अद् भ्य: सम्भृत: पृथिव्यै रसाच्च विश्वकर्मण: समवर्त्तताग्रे I

Page 140 of 523

तस्य त्वष्टा विदधद्रूपमेति
तन्मर्त्यस्य देवत्वमाजानमग्रे ॥

सर्वप्रथम सब कर्म करने वाले परमात्मा (विश्वकर्मा) ने पृथ्वी एवं जल बनाये और उस जलरूप रस (प्राणतत्व) से सृष्टि का निर्माण हुआ । मर्त्य को देवत्व प्रदान करते हुए वह विश्व - निर्माता विश्व का निर्माण करता है ।

श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मितं संस्कृतार्यभाषाभ्यां समलङ्कृतम् व्याख्या :-

अद् भ्य : सम्भृत : पृथिव्यै रसाच्च
विश्वकर्मण : समवर्त्तताग्रे ।

तस्य त्वष्टा विदधद् रूपमेति
तन्मर्त्यस्य देवत्वमाजानमग्रे ॥

अद्भ्य इत्युत्ऽभ्यः । सम्भृत इति सम्ऽभृतः । सम्। अवर्त्तत । अग्रे ॥ तस्य । त्वष्टा । विदधदिति विऽदधत् । रूपम् । एति । तत् । मर्त्यस्य । देवत्वमिति देवऽतवम् आजानमित्याऽजानम् । अग्रे ॥

पदार्थ :-- (अद्भ्य :) जलेभ्य : (सम्भृत :) सम्यक् पुष्ट (पृथिव्यै) पर्थिव्या :। अत्र

Page 142 of 523

पञ्चम्यर्थे चतुर्थी (रसात्) जिह्वाविषयात् (च) (विश्वकर्मणः) विश्वानि सर्वाणि सत्यानि कर्माणि यस्याश्रयेण तस्मात् सूर्य्यात् (सम्) (अवर्त्तत) (अग्रे) प्राक् (तस्य) (त्वष्टा) तनूकर्ता (विदधत्) विधानं कुर्वन् (रूपम्) स्वरूपम् (एति) (तत्) (मर्त्यस्य) मनुष्यस्य (देवत्वम्) विद्वत्त्वम् (आजानम्) समन्ताज्जनानाम् मनुष्याणामिदं कर्त्तव्यं कर्म (अग्रे) आदित:II

अन्वय:-- हे मनुष्या:! योऽद्भय: पृथिव्यै विश्वकर्मणश्च सम्भृतस्तस्माद् रसादग्र इदं सर्वं समवर्त्तत तस्याऽस्य जगतो तद् रूपं त्वष्टा विदधदग्रे मर्त्यस्याजानं देवत्वमेतिII

भावार्थ:-- हे मनुष्या:! योऽखिलकार्यकर्ता परमात्मा कारणात् कार्याणि निर्मिमीते

सकलस्य जगत: शरीराणां रूपाणि विदधाति तज्ज्ञानं तदाज्ञापालनमेव

देवत्वमस्तीति जानीत II

पदार्थ:-- हे मनुष्यो! जो (अद्भय:) जलों (पृथिव्यै:) पृथिवी (च) और (विश्वकर्मण:) सब

Page 142 of 523

कर्म जिसके आश्रय से होवे उस सूर्य से (सम्भृत :) सम्यक् पुष्ट हुआ उस (रसात्) रस से (अग्रे) पहिले यह सब जगत् (सम् अवर्त्तत) वर्त्तमान होता है (तस्य)उस इस जगत् के (तत्) उस (रूपम्) स्वरूप को (त्वष्टा) सूक्ष्म करने वाला ईश्वर (विदधत्) विधान करता हुआ (अग्रे) आदि में (मर्त्यस्य) मनुष्य के (आजानम्) अच्छे प्रकार कर्तव्य कर्म और (देवत्वम्) विद्वता को (एति) प्राप्त होता है ॥

भावार्थ :-- हे मनुष्यों ! जो सम्पूर्ण कार्य करने हारा परमेश्वर कारण से कार्य

बनाता है , सब जगत् के शरीरों के रूपों को बनाता है , उसका ज्ञान और उसकी आज्ञा का पालन ही देवत्व है , ऐसा जानो ॥

वेदाहमित्यस्योत्तरनारायण ऋषि :। आदित्यो देवता । निचृत्त्रिष्टुप् छन्द :। धैवत : स्वर :॥ अथ विज्ञानं जिज्ञासवे कथमुपदिशेदित्याह ॥

अब विद्वान् जिज्ञासु के लिये कैस उपदेश करे , इस विषय को अगले मन्त्र में कहा है ॥

Page 144 of 523

-- ------------------------------ ------------------------------ -- --------

श्री राम शर्मा आचार्य गायत्री तपोभूमि, मथुरा, द्वारा कृत अनुवादित यजुर्वेद के अध्याय 31 में पुरुषसूक्त के २२ सूक्तों व्याख्या है जो इस प्रकार है:-

प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा वि जायते I

तस्य योनिं परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा II श्लोक 19)

सर्वात्मा प्रजापति गर्भ में प्रविष्ट होकर अजन्मा होते हुए भी अनेक कारण रूप होकर जन्म लेते हैं I ब्रह्मज्ञानीजन उन प्रजापति के स्थान को देखते हैं I सम्पूर्ण भुवन उस कारणात्मक प्रजापति रूप ब्रह्म में ही स्थित है I

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते I

Page 144 of 523

तस्य योनिं परि पश्यन्ति धीरास्तस्मिन्ह
तस्थुर्भुवनानि विश्वा ॥

प्रजापालक परमात्मा की सत्ता सम्पूर्ण
पदार्थों में विद्यमान है , वह अजन्मा होकर
भी अनेक रूपों में प्रकट होता है । उसकी
कारण शक्ति में सम्पूर्ण भुवन समाहित हैं ।
ज्ञानीजन उसके मुख्य स्वरूप को देख पाते
हैं ।

श्रीमद्दयानन्दसरस्वतीस्वामिना
निर्मितं संस्कृतार्यभाषाभ्यां
समलङ्कृतम् व्याख्या :-

प्रजापतिश्चरति गर्भेऽअन्तरजायमानो
बहुधा वि जायते ।

तस्य योनिं परि पश्यन्ति
धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥

प्रजापतिरिति प्रजाऽपति :। चरति । गर्भे ।
अन्त :। अजायमान :। बहुधा । वि । जायते ॥ तस्य ।
योनिम् । परि । पश्यन्ति । धीरा :। तस्मिन् । ह ।
तस्थु :। भुवनानि । विश्वा ॥

पदार्थ :-- (प्रजापति :) प्रजापालको
जगदीश्वर : (चरति) (गर्भे) गर्भस्थे
जीवात्मानि (अन्त :) हृदि (अजायमान :)

स्वस्वरूपेणानुत्पन्न : सन् (बहुधा) बहुप्रकारै : (वि) विशेषेण (जायते) प्रकटो भवति (तस्य) प्रजापते : (योनिम्) स्वरूपम् (परि) सर्वत : (पश्यन्ति) प्रेक्षन्ते (धीरा :) ध्यानवन्त : (तस्मिन्) जगदीश्वरे (ह) प्रसिद्धम् (तस्थु :) तिष्ठन्ति (भुवनानि) भवन्ति येषु तानि लोकजातानि (विश्वा) सर्वाणि ॥

अन्वय :--हे मनुष्या :! योऽजायमान : प्रजापतिगर्भेऽन्तश्चरति बहुधा विजायते तस्य यं योनिं धीरा : परिपश्यन्ति तस्मिन् ह विश्वा भुवनानि तस्थु :॥

भावार्थ :-- योऽयं सर्वरक्षक ईश्वर : स्वयमुत्पन्न : सन् स्वसामर्थ्याज्जगदुत्पाद्य तत्रान्त : प्रविश्य सर्वत्र विचरति यमनेकप्रकारेण प्रसिद्धं विद्वांस एव जानन्ति तं जगदधिकरणं सर्वव्यापकं परमात्मानं विज्ञाय मनुष्यैरानन्दितव्यम् ॥

पदार्थ :-- हे मनुष्यो ! जो (अजायमान :) अपने स्वरुप से उत्पन्न नहीं होनेवाला (प्रजापति :) प्रजा का रक्षक जगदीश्वर (गर्भे) गर्भस्थ जीवात्मा और (अन्त :) सबके

Page 147 of 523

हृदय में (चरति) विचरता है और (बहुधा) बहुत प्रकारों से (वि, जायते) विशेषकर प्रकट होता (तस्य) उस प्रजापति के जिस (योनिम्) स्वरूप को (धीरा:) ध्यानशील विद्वान् जन (परि, पश्यन्ति) सब ओर से देखते हैं (तस्मिन्) उसमें (ह) प्रसिद्ध (विश्वा) सब (भुवनानि) लोक-लोकान्तर तस्थु: स्थित हैं II

भावार्थ:-- जो यह सर्वरक्षक ईश्वर आप उत्पन्न न होता हुआ अपने सामर्थ्य से जगत् को उत्पन्न कर और उसमें प्रविष्ट होके सर्वत्र विचरता है, जिस अनेक प्रकार से प्रसिद्ध ईश्वर को विद्वान् लोग ही जानते हैं, उस जगत् के आधाररूप सर्वव्यापक परमात्मा को जान के मनुष्यों को आनन्द भोगना चाहिए II

यो देवेभ्य इत्यस्योत्तरनारायण ऋषि:I सूर्य्यो देवताI अनुष्टुप् छन्द:I गान्धार: स्वर:II अथ सूर्य: कीदृश इत्याह II अब सूर्य्य कैसा है, इस विषय को अगले मन्त्र में कहा है II

श्री राम शर्मा आचार्य गायत्री तपोभूमि, मथुरा, द्वारा कृत अनुवादित यजुर्वेद के

Page 147 of 523

Page 148 of 523

अध्याय 31 में पुरुषसूक्त के २२ सूक्तों
की व्याख्या है जो इस प्रकार है:-

यो देवेभ्यऽ आतपति यो देवानां पुरोहित I

पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये II (श्लोक 20)

जो सूर्यात्मक प्रजापति सब ओरसे देवताओं के लिए प्रकाशित होते हैं और जो देवताओं में पूजनीय एवं उनसे प्रकट हुए हैं, उन तेजस्वी ब्रह्म को नमस्कार हैI

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

यो देवेभ्यऽ आतपति यो देवाना पुरोहित: I

पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये II

देव समुदाय में अग्रणी एवं उन्हें(देवोंको) प्रकाशित करने वाले, जिनका प्राकट्य सब देवों से पहले ही हुआ
है, उन तेज सम्पन्न ब्रह्म को नमन है I

Page 148 of 523

श्रीमद्दयानन्दसरस्वतीस्वामिना
निर्मितं संस्कृतार्यभाषाभ्यां
समलङ्कृतम् व्याख्या :-

यो देवेभ्यऽ आतपति यो देवानां पुरोहित :
।

पूर्वो यो देवेभ्यो जातो नमो रुचाय
ब्राह्मये ॥

य:। देवेभ्य :। आतपतीत्याऽतपति । य:। देवानाम् ।
पुरोहित इति पुर :ऽहित :॥ पूर्व :। य:।
देवेभ्य :। जात :। नम:। रुचाय । ब्राह्मये ।

पदार्थ :-- (य:) सूर्य : (देवेभ्य :)
दिव्यगुणेभ्य : पृथिव्यादिभ्य : (आतपति)
समन्तात् तपति (य:) (देवानाम्)
पृथिव्यादिलोकानाम् (पुरोहित :)
पुरस्ताद्धिताय मध्ये धृत : (पूर्व :) (य:)
(देवेभ्य :) पृथिव्यादिभ्य : (जात :) उत्पन्न :
(नम:) अन्नम् (रचाय) रुचिकरात् (ब्राह्मये)
यो ब्रह्मण : परमेश्वरस्यापत्यमिव
तस्मात् । अत्रोभयत्र पञ्चम्यर्थे चतुर्थी
॥

अन्वय :-- हे मनुष्य :! यो देवेभ्य आतपति यो
देवानां पुरोहितो यो देवेभ्य :

जातस्तस्माद् रुचाय ब्राह्मये नमो
जायते ॥

भावार्थ :-- हे मनुष्या :! येन जगदीश्वरेण
सर्वेषां हितायान्नाद्युत्पादननिमित्त :
सूर्य्यो निर्मितस्तमेव सततमुपासीध्वम् ॥

पदार्थ :-- हे मनुष्यो ! (य:) जो सूर्यलोक
(देवेभ्य :) उत्तम गुणों वाले पृथिवी आदि के
अर्थ (आतपति) अच्छे प्रकार तपता है (य:) जो
(देवानाम्) पृथिवी आदि लोकों के (पुरोहित :)
प्रथम से हितार्थ बीच में स्थित किया (य:)
जो (देवेभ्य :) पृथिवी आदि से (पूर्व :) प्रथम
(जात ;) उत्पन्न हुआ उस (रचाय) रूचि
करानेवाले (ब्राह्मये) परमेश्वर के
सन्तान के तुल्य सूर्य्य से (नम:) अन्न
उत्पन्न होता है ॥

भावार्थ :-- हे मनुष्यों ! जिस जगदीश्वर ने
सबके हित के लिए अन्न आदि की उत्पत्ति के
निमित्त सूर्य्यको बनाया है , उसी परमेश्वर
की उपासना करो ॥

रुचिमित्यस्योत्तरनारायण ऋषि :।
विश्वेदेवा देवता :। अनुष्टुप छन्द :।

Page 151 of 523

गान्धार: स्वर:II अथ विद्वत्कृत्यमाह II अब विद्वानों का कृत्य कहते हैंII

श्री राम शर्मा आचार्य गायत्री तपोभूमि, मथुरा, द्वारा कृत अनुवादित यजुर्वेद के अध्याय 31 में पुरुषसूक्त के २२ सूक्तों
की व्याख्या है जो इस प्रकार है:-

रुचं ब्राह्मं जनयन्तो देवाऽ अग्रे तदब्रुवन् I

यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन् वशे II (श्लोक 21)

देवताओं ने श्रेष्ठ ज्योति स्वरूप सूर्य को प्रकट कर प्रथम यह कहा कि हे आदित्य! जो ब्राह्मण तुमें अजर अमर रूप से इस प्रकार प्रकट जानते हैं, देवता उस ज्ञानी ब्राह्मण के वशवर्ती होते हैं I

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

रुचं ब्राह्मं जनयन्तो देवाऽअग्रे तद्ब्रुवन् I

Page 151 of 523

यस्त्वैवं ब्राह्मणो विद्यात्तस्य
देवाऽ असन् वशे ॥

ब्रह्मज्ञानी देवों का प्रारम्भिक कथन है
कि जो प्रकाशमय ब्रह्म को प्रकट करने वाले
ज्ञानी उसको (विराट् सत्ताको) जानते हैं ,
उनके अधिकार में समस्त देवशक्तियाँ रहती
हैं ।

श्रीमद्दयानन्दसरस्वतीस्वामिना
निर्मितं संस्कृतार्यभाषाभ्यां
समलङ्कृतम् व्याख्या :---

रुचं ब्राह्मं जनयन्तो देवाऽअग्रे
तदब्रुवन् ।

यस्त्वैवं ब्राह्मणो विद्यात् तस्य
देवाऽअसन् वशे ॥

रुचम् । ब्राह्मम् । जनयन्त :। देवा :। अग्रे ।
तत् । अब्रुवन् । य:। त्वा । एवम् । ब्राह्मण :।
विद्यात् । तस्य । देवा :। असन् । वशे ।

पदार्थ :-- (रुचम्) रुचिकरम् (ब्राह्मम्)
ब्राह्मोपासकम् (जनयन्त :) निष्पादयन्त :
(देवा :) विद्वांस : (अग्रे) (तत्)
ब्रह्मजीवप्रकृतिस्वरूपम् (अब्रुवन्)
ब्रुवन्तु (य:) (त्वा) (एवम्) अमुना

Page 153 of 523

प्रकारेण (ब्राह्मण:) (विद्यात्) विजानीयात् (तस्य) देवा:) विद्वांसः (असन्) स्यु: (वशे) तदधीना:II

अन्वय:--हे ब्रह्मनिष्ठ! ये रुचं ब्राह्मं त्वा जनयन्तो देवा अग्रे तदब्रुवन् यो ब्राह्मण एवं विद्यात् तस्य ते देवा वशे असन्II

भावार्थ:--इदमेवाऽ ऽद्यं विद्वत्कृत्यमस्ति यद्वेदेश्वरधर्मादिषु रुचिरुपदेशेना- ध्यापनधार्मिकत्वजितेन्द्रियत्व-शरीरात्मबलवर्द्धनमेवं कृते सति सर्वे दिव्या गुना भोगाश्च प्राप्तुं शक्या:II

पदार्थ:--हे ब्रह्मनिष्ठ पुरुष! जो (रुचम्) रुचिकारक (ब्राह्मम्) ब्रह्म के उपासक (त्वा) आपको (जनयन्त:) सम्पन्न करते हुए (देवा:) विद्वान् लोग (अत्रे) पहिले (तत्) ब्रह्म, जीव और प्रकृति के स्वरूप को (अब्रुवन्) कहें (य:) जो (ब्राह्मण:) ब्राह्मण (एवम्) ऐसे (विद्वान्) जाने (तस्य) उसके वे (देवा:) विद्वान् (वशे) वशमें (असन्) हों

Page 153 of 523

भावार्थ :-- यही विद्वानों का पहिला कर्तव्य है की जो वेद , ईश्वर और धर्मादि में रूचि , उपदेश , अध्यापन , धर्मात्मता , जीतेन्द्रियता , शरीर और आत्मा के बल को बढ़ाना , ऐसा करने से ही सब उत्तम गुण और भोग प्राप्त हो सकते हैं ॥

श्रीश्च त इत्यस्योत्तरनारायण ऋषि :। आदित्यो देवता । निचृदार्षी त्रिष्टुप छन्दः । धैवत : स्वर :॥ अथेश्वर : कीदृश इत्याह ॥ अब ईश्वर कैसाहै , इस विषय को अगले मन्त्र में कहा है ॥

श्री राम शर्मा आचार्य गायत्री तपोभूमि , मथुरा , द्वारा कृत अनुवादित यजुर्वेद के अध्याय 31 में पुरुषसूक्त के २२ सूक्तों की व्याख्या है जो इस प्रकार है :-

श्रीश्च ते लक्ष्मीश्च
पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि
रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुं म ऽ इषाण
सर्वलोकं म ऽ इषाण ॥ (श्लोक 22)

हे ज्योतिस्वरूप ब्रह्म ! जो लक्ष्मी सबको समृद्ध करती है , वह वैभव रूपा लक्ष्मी

Page 155 of 523

तुम्हारी पत्नी रूप है, दिन-रात दोनों तुम्हारे पार्श्व हैं, नक्षत्र तुम्हारा रूप और द्यावा पृथ्वी तुम में व्याप्त हैं
I कर्म-फल की इच्छा वाले तुम, मेरे लिए परलोक की इच्छा करते हुए मुझे मुक्त करने की इच्छा करो I

वाजसनेयि—माध्यन्दिन—शुक्ल यजुर्वेद— संहिता के अनुसार पुरुषसूक्त की व्याख्या इस प्रकार है:--

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् I

इष्णन्निषाणामुं म ऽ इषाण
सर्वलोकं म ऽ इषाण II

हे प्रकाशस्वरूप परमात्मन्! सबको सम्पन्नता प्रदान करने वाली वैभवरुपी लक्ष्मी आपकी पत्नी स्वरूप हैं, भुजाएं
रति और दिन एवं नक्षत्र आपके रूप हैंI द्युलोक एवं पृथ्वी आपके मुख सदृश हैं I इच्छाशक्ति से सबकी इच्छाओं को पूर्ण करने में समर्थ हे ईश्वर! हमारी उत्तम लोकों की

Page 155 of 523

Page 156 of 523

प्राप्ति की इच्छा पूर्ति के लिए आप कृपा करें I

-- ऋषि, देवता, छंद-विवरण—

ऋषि-नारायण पुरुष 1 से 16 श्लोक I उत्तरनारायण 17 से 22 श्लोक

देवता—पुरुष जगद् बीज 1 से 16 श्लोक I आदित्य 17 से 22 श्लोक छंद—निवृत् अनुष्टुप् 1-3,8-11,14 I अनुष्टुप् 4,5,7,12,13,15,20,21 I विराट् अनुष्टुप् 6 I विराट् त्रिष्टप् 16 I भुरिक् त्रिष्टुप् 17,19 I निवृत् अनुष्टुप् 18 I निवृत् आर्षी त्रिष्टुप् 22 I

श्रीमद्दयानन्दसरस्वतीस्वामिना निर्मितं संस्कृतार्यभाषाभ्यां समलङ्कृतम् व्याख्या:---

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् I

इष्णन्निषाणामुं म ऽ इषाण सर्वलोकं म ऽ इषाण II

Page 156 of 523

श्री :। च। ते । लक्ष्मी :। च। पत्न्यौ ।
अहोरात्रेऽइत्यहोरात्रे । पार्श्वेऽइति
पार्श्वे । नक्षत्राणि । रूपम् । अश्विनौ ।
व्यात्तमिति विऽआत्तम् । इष्णन् । इषाण ।
अमुम् । मे । इषाण । सर्वलोकमिति सर्वऽलोकम् ।
मे । इषाण ॥

पदार्थ :-- (श्री :) सकला शोभा (च) (ते) तव
(लक्ष्मी :) सर्वमैश्वर्य्यम् (च) (पत्न्यौ)
स्त्रीवद्वर्त्तमाने (अहोरात्रे)
(पार्श्वे) (नक्षत्राणि) (रूपम्) (अश्विनौ)
सूर्याचन्द्रमसौ (व्यात्तम्) विकसितं
मुखमिव । अत्र वि , आङ् पूर्वाड् डुदाञ्
धातो : क्त :। (इष्णन्) इच्छन् (इषाण) कामय
(अमूम्) इत: परं परोक्षं सुखम् (मे) मह्यम्
(इषाण) प्रापय (सर्वलोकम्) सर्वेषां
दर्शनम् (मे) मह्यम् (इषाण)॥

अन्वय :-- हे जगदीश्वर ! यस्य ते श्रीश्च
लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे
यस्य ते सृष्टावश्विनौ व्यात्तं
नक्षत्राणि रूपं स त्वं
मेऽमुमिण्णन्निषाण मे सर्वलोकमिषाण मे
सर्वाणि सुखानीषाण ॥

भावार्थ :-- हे राजादयो मनुष्या :! यथेश्वरस्य न्यायादयो गुणा व्याप्ति : कृपा पुरुषार्थ : सत्यं रचनं सत्या नियमाश्च सन्ति तथैव युष्माकमपि सन्तु यतो युष्माकमुत्तरोत्तरं सुख वर्द्धेतेति ॥

अत्रेश्वर सृष्टिराजगुणवर्णनादेतदध्यायोक्तार्थस्य पूर्वाऽध्यायोवतार्थेन सह सङ्गतिरस्तीति वेद्यम् ॥

पदार्थ :-- हे जगदीश्वर ! जिस (ते) आपकी (श्री :) समग्र शोभा (च) और (लक्ष्मी :) सब ऐश्वर्य (च) भी (पत्न्यौ) दो स्त्रियों के तुल्य वर्त्तमान (अहोरात्रे) दिन -रात (पार्श्वे) आगे-पीछे जिस आपकी सृष्टि मेन (अश्विनौ) सूर्य -चन्द्रमा (व्यात्तम्) फैले मुख के समान (नक्षत्राणि) नक्षत्र (रूपम्) रूप वाले हैं , सो आप (मे) मेरे (अमुम्) परोक्ष सुख को (इष्णन्) चाहते हुए (इषाण) चाहना कीजिये (मे) मेरे लिये (सर्वलोकम्) सबके दर्शन को (इषाण) प्राप्त कीजिये , मेरे लिये सब् सुखों को (इषाण) पहुंचाइये ॥

Page 159 of 523

भावार्थ:--हे राजा आदि मनुष्यों! जैसे ईश्वर के न्याय आदि गुण, व्याप्ति, कृपा, पुरुषार्थ, सत्य रचना और सत्य नियम हैं, वैसे ही तुम लोगों के भी हों, जिससे तुम्हारा उत्तरोत्तर सुख बढ़ेII

-- ------------------------------ ------------------------------ -- ----------------

पुरुष-सूक्तस्य सायणभाष्यम् अनुसारेण:----

‘सहस्रशीर्षा' इति षोडशर्चं षष्ठं सूक्तम् । नारायण नामर्षिरन्त्या त्रिष्टुप् शिष्टा अनुष्टुभः । अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः ‘पुरुषाश्च परं किंचित्’ (कठोपनिषद वल्ली 3 सूक्त 11)

इत्यादिश्रुतिषु प्रसिद्धः स देवता । तथा चानुक्रान्तं--- सहस्रशीर्षा षोळश नारायणः

पौरुषमानुष्टुभं त्रिष्टुबन्तं तु' इति । गतो विनियोगः ।।

Page 159 of 523

Page 160 of 523

स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ।

स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम् ॥

सहस्रऽशीर्षा । पुरुषः । सहस्रऽअक्षः ।
सहस्रऽपात् । सः । भूमिम् । विश्वतः ।
वृत्वा। अति । अतिष्ठत् । दशऽअङ्गुलम् ॥ १
॥

सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा । सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः। यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तः

पातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षित्वं सहस्रपादत्वं च । “सः पुरुषः “भूमिं ब्रह्माण्डगोलकरूपां “विश्वतः सर्वतः “वृत्वा परिवेष्ट्य “दशाङ्गुलं दशाङ्गुलपरिमितं देशम् “अत्यतिष्ठत् अतिक्रम्य व्यवस्थितः । दशाङ्गुलमित्युपलक्षणम्।

Page 160 of 523

Page 161 of 523

ब्रह्माण्डाद्बहिरपि सर्वतो
व्याप्यावस्थित इत्यर्थः॥

पुरु॑ष ए॒वेदं सर्वं॒ यद्भू॒तं यच्च॒
भव्य॑म् । उ॒तामृ॑त॒त्वस्येशा॑नो॒
यदन्ने॑नाति॒रोह॑ति ॥

पुरुषः । एव । इदम् । सर्वम् । यत् । भूतम्
। यत् । च। भव्यम् ।

उत। अमृतऽत्वस्य । ईशानः । यत् । अन्नेन ।
अतिऽरोहति ।। २ ॥

यत् “इदं वर्तमानं जगत् तत् “सर्वं “पुरुष “एव । यत् च “भूतम् अतीतं जगत् “यच्च “भव्यं भविष्यज्जगत् तदपि पुरुष एव । यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः । "उत अपि च “अमृतत्वस्य देवत्वस्य अयम् “ईशानः स्वामी । “यत् यस्मात्कारणात् “अन्नेन प्राणिनां भोग्येनान्नेन निमित्तभूतेन “अतिरोहति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति

Page 161 of 523

Page 162 of 523

तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य
वस्तुत्वमित्यर्थः ॥

ए॒तावा॑नस्य महि॒मातो॒ ज्यायाँ॑श्च॒
पूरु॑षः ।पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑
त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥

एतावान् । अस्य । महिमा । अतः । ज्यायान् ।
च। पुरुषः ।

पादः । अस्य । विश्वा । भूतानि । त्रिऽपात्
। अस्य । अमृतम् । दिवि ।। ३ ।।

अतीतानागतवर्तमानरूपं जगद्यावदस्ति “एतावान् सर्वोऽपि “अस्य पुरुषस्य “महिमा स्वकीयसामर्थ्यविशेषः। न तु तस्य वास्तवस्वरूपम् । वास्तवस्तु "पुरुषः अतः महिम्नोऽपि “ज्यायान् अतिशयेनाधिकः । एतच्चोभयं स्पष्टीक्रियते। “अस्य पुरुषस्य “विश्वा सर्वाणि “भूतानि कालत्रयवर्तीनि प्राणिजातानि “पादः चतुर्थोंऽशः। “अस्य पुरुषस्य अवशिष्टं “त्रिपात् स्वरूपम् “अमृतं विनाशरहितं
सत् “दिवि द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेषः ।

Page 162 of 523

Page 163 of 523

यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तैतैत्तिरीय आरण्यक. ८.श्लोक १; तैत्तिरीय उपनिषद.

अनुवाक २. श्लोक १) इत्याम्नातस्य परब्रह्मण इयत्ताभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षितत्वात् पादत्वोपन्यासः ॥ ।

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑ष॒ः पादो॑ऽस्ये॒हाभ॑व॒त्पुनः॑ ।

ततो॒ विष्व॒ङ्व्य॑क्रामत्साशनानश॒ने अ॒भि ॥

त्रिऽपात् । ऊर्ध्वः । उत् । ऐत् । पुरुषः
। पादः । अस्य । इह । अभवत् । पुनरिति। ततः
। विष्वङ् । वि। अक्रामत् । साशनानशने इति
। अभि ।। ४ ।।

योऽयं “त्रिपात् "पुरुषः संसाररहितो ब्रह्मस्वरूपः सोऽयम् “ऊर्ध्व “उदैत्

अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतोऽ त्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान्। तस्य “अस्य सोऽयं “पादः लेशः

Page 163 of 523

Page 164 of 523

सोऽयम् “इह मायायां “पुनः अभवत् सृष्टिसंहाराभ्यां पुनःपुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं---- विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ' (भ. गीता. अध्याय१०. श्लोक४२) इति । “ततः मायायामागत्यानन्तरं “विष्वङ् देवमनुष्यतिर्यगादिरूपेण विविधः सन् “व्यक्रामत् व्याप्तवान् । किं कृत्वा । “साशनानशने अभिलक्ष्य । साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम् अनशनं तद्रहितमचेतनं गिरिनद्यादिकम् । तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥

तस्मा॑द्वि॒राळ॑जायत वि॒राजो॒ अधि॒
पूरु॑षः ।

स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑
पु॒रः ॥

तस्मात् । विऽराट्। अजायत । विऽराजः ।
अधि। पुरुषः ।।

सः । जातः । अति । अरिच्यत । पश्चात् ।
भूमिम् । अथो इति । पुरः ॥ ५ ॥

Page 164 of 523

Page 165 of 523

विष्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते । “तस्मात् आदिपुरुषात् “विराट् ब्रह्माण्डदेहः “अजायत उत्पन्नः
। विविधानि राजन्ते वस्तून्यत्रेति विराट् । “विराजोऽधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा “पुरुषः तद्देहाभिमानी कश्चित् पुमान् अजायत । सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् । एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति---- स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव' (नृ. ता. २. १, ९) इति । “स “जातः विराट् पुरुषः “अत्यरिच्यत अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । “पश्चात् देवादिजीवभावादूर्ध्वं “भूमिं ससर्जेति शेषः । “अथो भूमिसृष्टेरनन्तरं तेषां जीवानां “पुरः ससर्ज । पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि ॥॥१७॥

Page 165 of 523

Page 166 of 523

यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत ।

व॒स॒न्तो अ॑स्यासी॒दाज्यं॑ ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः ॥

यत् । पुरुषेण । हविषा । देवाः । यज्ञम् ।
अतन्वत ।

वसन्तः । अस्य । आसीत्। आज्यम् । ग्रीष्मः
। इध्मः । शरत् । हविः ॥ ६ ॥

“यत् यदा पूर्वोक्तक्रमेणैव शरीरेषुत्पन्नेषु सत्सु "देवाः उत्तरसृष्टिसिद्धयर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरसंभवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य “पुरुषेण पुरुषाख्येन “हविषा मानसं यज्ञम् “अतन्वत अन्वतिष्ठन् तदानीम् “अस्य यज्ञस्य “वसन्तः वसन्तर्तुरेव “आज्यम् “आसीत् अभूत् । तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः । एवं “ग्रीष्म “इध्मः आसीत्। तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः। तथा “शरद्धविः आसीत् । तामेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्त

Page 166 of 523

इत्यर्थः । पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पः । अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम् ॥

[(यजुर्वेदीय पु o सू o के इस श्लोक (ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ;) का अर्थ जो कि इसके 14 वें श्लोक में दिया है)]

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न्पुरु॑षं
जा॒तम॑ग्र॒तः । तेन॑ दे॒वा अ॑यजन्त
सा॒ध्या ऋष॑यश्च॒ ये ॥

तम् । यज्ञम् । बर्हिषि । प्र । औक्षन् । पुरुषम् । जातम् । अग्रतः । तेन । देवाः । अयजन्त। साध्याः । ऋषयः । च। ये ॥ ७ ॥

यज्ञं यज्ञसाधनभूतं “तं पुरुषं पशुत्वभावनया यूपे बद्धं “बर्हिषि मानसे यज्ञे “प्रौक्षन् प्रोक्षितवन्तः । कीदृशमित्यत्राह। “अग्रतः सर्वसृष्टेः पूर्वं “पुरुषं “जातं पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तं तस्माद्विराळजायत विराजो अधि पूरुषः ' इति । तेन पुरुषरूपेण पशुना

Page 168 of 523

“देवा "अयजन्त । मानसयागं निष्पादितवन्त इत्यर्थः । के ते देवा इत्यत्राह। “साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः

तदनुकूलाः “ऋषयः मन्त्रद्रष्टारः “च “ये सन्ति । ते सर्वेऽप्ययजन्तेत्यर्थः ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ः सम्भृ॑तं
पृषदा॒ज्यम् ।

प॒शून्ताँश्च॑क्रे
वाय॒व्या॑नार॒ण्यान्ग्रा॒म्याश्च॒ ये ॥

तस्मात् । यज्ञात् । सर्वऽहुतः ।
सम्ऽभृतम् । पृषत्ऽआज्यम् ।।

पशून् । तान् । चक्रे । वायव्यान् ।
आरण्यान्। ग्राम्याः । च । ये ॥८॥

“सर्वहुतः । सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत् । तादृशात् “तस्मात् पूर्वोक्तात् मानसात् "यज्ञात् “पृषदाज्यं दधिमिश्रमाज्यं “संभृतं संपादितम् । दधि चाज्यं चेत्येवमादिभोग्यजातं सर्वं

Page 168 of 523

Page 169 of 523

संपादितमित्यर्थः । तथा “वायव्यान् वायुदेवताकाँल्लोकप्रसिद्धान् “आरण्यान् “पशून “चक्रे उत्पादितवान् । आरण्या हरिणादयः । तथा “ये “च “ग्राम्याः गवाश्वादयः तानपि चक्रे। पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं यजुर्ब्राह्मणे समाम्नायते-- वायवः स्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षाः । अन्तरिक्षदेवत्याः खलु वै पशवः। वायव एवैनान्परिददाति ' (तै. ब्राह्मण. ३. २. १.
३) इति ।

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ ऋच॒ः सामा॑नि जज्ञिरे ।

छन्दां॑सि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥

तस्मात् । यज्ञात् । सर्वऽहुतः । ऋचः ।
सामनि । जज्ञिरे ।

छन्दांसि । जज्ञिरे । तस्मात् । यजुः । तस्मात् । अजायत ।। ९ ॥ "सर्वहुतः “तस्मात् पूर्वोक्तात् यज्ञात् “ऋचः “सामानि च जज्ञिरे उत्पन्नाः। “तस्मात्

Page 169 of 523

Page 170 of 523

यज्ञात् “छन्दांसि गायत्र्यादीनि “जज्ञिरे। “तस्मात् यज्ञात् "यजुः अपि अजायत ॥ तस्मा॒दश्वा॑ अजायन्त॒ ये के चो॑भ॒याद॑तः ।

गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता अ॑जा॒वयः॑ ॥

तस्मात् । अश्वाः । अजायन्त । ये । के। च ।
उभयादतः ।

गाव: । ह । जज्ञिरे । तस्मात् । तस्मात् ।
जाताः । अजावयः ॥ १०॥

“तस्मात् पूर्वोक्ताद्यज्ञात् “अश्वा “अजायन्त उत्पन्नाः। तथा “ये "के “च अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च उभयादतः ऊर्ध्वाधोभागयोरुभयोः दन्तयुक्ताः सन्ति तेऽप्यजायन्त। तथा “तस्मात् यज्ञात् "गावः च “जज्ञिरे । किंच “तस्मात् यज्ञात् "अजावयः च "जाताः ॥ ॥ १८
॥

यत्पुरु॑षं॒ व्यद॑धुः कति॒धा
व्य॑कल्पयन् ।

मुखं॒ किम॑स्य॒ कौ बा॒हू का ऊ॒रू पादा॑
उच्येते ॥

Page 170 of 523

Page 171 of 523

यत् । पुरुषम् । वि । अदधुः । कतिधा। वि ।
अकल्पयन् ।।

मुखम् । किम् । अस्य । कौ । बाहू इति । कौ ।
ऊरू इति । पादौ । उच्येते इति ॥११॥

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते । प्रजापतेः प्राणरूपा देवाः “यत् यदा “पुरुषं विराड्रूपं “व्यदधुः संकल्पेनोत्पादितवन्तः तदानीं “कतिधा कतिभिः प्रकारैः “व्यकल्पयन् विविधं कल्पितवन्तः । “अस्य पुरुषस्य “मुखं “किम् आसीत्। “कौ “बाहू अभूताम् “का “ऊरू। कौ च “पादावुच्येते । प्रथमं सामान्यरूपः प्रश्नः पश्चात् मुखं किमित्यादिना विशेष विषयाः प्रश्नाः॥

ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीद्बा॒हू
रा॑ज॒न्यः॑ कृ॒तः ।

ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ प॒द्भ्यां
शू॒द्रो अ॑जायत ॥

ब्राह्मणः । अस्य । मुखम् । आसीत् । बाहू इति । राजन्यः । कृतः ।

Page 171 of 523

Page 172 of 523

ऊरू इति । तत् । अस्य । यत् । वैश्यः । पत्ऽभ्याम् । शूद्रः । अजायत ॥ १२ ॥

इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि दर्शयति । “अस्य प्रजापतेः “ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषः “मुखमासीत मुखादुत्पन्न इत्यर्थः । योऽयं “राजन्यः क्षत्रियत्वजातिमान् पुरुषः सः "बाहू “कृतः बाहुत्वेन निष्पादितः । बाहुभ्यामुत्पादित इत्यर्थः । तत् तदानीम् अस्य प्रजापतेः “यत् यौ “ऊरू तद्रूपः "वैश्यः संपन्नः । ऊरुभ्यामुत्पन्न इत्यर्थः । तथास्य “पद्भ्यां पादाभ्यां "शूद्रः शूद्रत्वजातिमान् पुरुषः "अजायत । इयं च मुखादिभ्यो
ब्राह्मणादीनामुत्पत्तिर्यजुःसंहितायां सप्तमकाण्डे ‘स मुखतस्त्रिवृतं निरमिमीत' (तैत्तीरिय. संहिता. ७. १. १. ४) इत्यादौ विस्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये ॥

च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒ः सूर्यो॑ अजायत ।

Page 172 of 523

Page 173 of 523

मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ प्रा॒णाद्वा॒युर॑जायत ॥

चन्द्रमाः । मनसः । जातः । चक्षोः । सूर्यः
। अजायत ।

मुखात् । इन्द्रः । च। अग्निः । च।
प्राणात् । वायुः । अजायत ॥ १३ ॥

यथा दध्याज्यादिद्रव्याणि गवादयः पशव ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । प्रजापतेः “मनसः सकाशाद् “चन्द्रमाः “जातः । “चक्षोः च चक्षुषः “सूर्यः अपि “अजायत । अस्य “मुखादिन्द्रश्चाग्निश्च देवावुत्पन्नौ । अस्य “प्राणाद्वायुरजायत ॥

नाभ्या॑ आसीद॒न्तरि॑क्षं शी॒र्ष्णो
द्यौः सम॑वर्तत ।

प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा॒त्तथा॑
लो॒काँ अ॑कल्पयन् ॥

नाभ्यः । आसीत् । अन्तरिक्षम् । शीर्ष्णः
। द्यौः । सम् । अवर्तत ।

Page 173 of 523

Page 174 of 523

पत्ऽभ्याम् । भूमिः । दिशः । श्रोत्रात् । तथा । लोकान् । अकल्पयन् ॥ १४ ॥

यथा चन्द्रादीन् प्रजापतेर्मनःप्रभृतिभ्योऽकल्पयन तथा “अन्तरिक्षादीन् “लोकान् प्रजापतेः नाभ्यादिभ्यो देवाः “अकल्पयन् उत्पादितवन्तः । एतदेव दर्शयति । “नाभ्याः प्रजापतेर्नाभेः “अन्तरिक्षमासीत् । "शीर्ष्णः शिरसः “द्यौः “समवर्तत उत्पन्ना। अस्य “पद्भ्यां पादाभ्यां “भूमिः उत्पन्ना। अस्य “श्रोत्रात् "दिशः उत्पन्नाः।।

स॒प्तास्या॑सन्परि॒धय॒स्त्रिः स॒प्त
स॒मिधः॑ कृ॒ताः ।

दे॒वा यद्य॒ज्ञं त॑न्वा॒ना
अब॑ध्न॒न्पुरु॑षं प॒शुम् ॥

सप्त । अस्य । आसन् । परिऽधयः । त्रिः ।
सप्त । सम्ऽइधः । कृताः ।

देवाः । यत् । यज्ञम् । तन्वानाः । अबध्नन्
। पुरुषम् । पशुम् ॥ १५ ॥

“अस्य सांकल्पिकयज्ञस्य गायत्र्यादीनि “सप्त छन्दांसि परिधयः “आसन् ।

Page 174 of 523

Page 175 of 523

ऐष्टिकस्याहवनीयस्य त्रयः परिधय उत्तरवेदिकास्त्रय आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः । अत एवाम्नायते-- न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहन्ति' (तैत्तीरिय. संहिता २.६.६.३) इति । तत एत आदित्यसहिताः सप्त परिधयोऽत्र सप्त छन्दोरूपाः । तथा “समिधः “त्रिः सप्त त्रिगुणीकृतसप्तसंख्याकाः एकविंशतिः “कृताः । द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः (तैत्तीरिय. संहिता. ५.१.१०.३) इति श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः। यत् यः पुरुषो वैराजोऽस्ति ते “पुरुषं "देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं तन्वानाः कुर्वाणाः पशुम् "अबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र ‘ यत्पुरुषेण हविषा' इत्युक्तम्
॥

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।

Page 175 of 523

Page 176 of 523

ते ह॒ नाकं॑ महि॒मानः॑ सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥

यज्ञेन । यज्ञम् । अयजन्त। देवाः । तानि ।
धर्माणि । प्रथमानि । आसन् ।

ते । ह । नाकम् । महिमानः । सचन्त । यत्र ।
पूर्वे । साध्याः । सन्ति । देवाः ॥ १६ ॥

पूर्व प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति । "देवाः प्रजापतिप्राणरूपाः "यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिम् "अयजन्त पूजितवन्तः । तस्मात्पूजनात “तानि प्रसिद्धानि “धर्माणि जगद्रूपविकाराणां धारकाणि "प्रथमानि मुख्यानि आसन् । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः । अथोपासनतत्फलानुवादकभागार्थः संगृह्यते ।

"यत्र यस्मिन् विराटप्राप्तिरूपे नाके "पूर्वे "साध्याः पुरातना विराडुपास्तिसाधकाः “देवाः "सन्ति तिष्ठन्ति तत् "नाकं विराट्प्राप्तिरूपं स्वर्ग “ते “महिमानः तदुपासका महात्मानः

Page 176 of 523

Page 177 of 523

"सचन्त समवयन्ति प्राप्नुवन्ति ॥ ॥ १९॥ ॥
७ ॥

टिप्पणी

नारायणोपरि पौराणिकसंदर्भाः

सोमयागे प्राग्वंशे गार्हपत्य एवं आहवनीयाग्निखरयोः मध्ये दक्षिणाग्नेः अर्द्धचन्द्राकारं खरं भवति। अस्याः अग्नेः अधिपतिः नलः नैषिधो अस्ति। उत्तरवेदी मध्ये आग्नीध्रस्य खरः भवति। अनुमानमस्ति यत् प्राग्वंशे यः दक्षिणाग्निः अस्ति, सैव उत्तरवेद्यां उत्तरदिश्यां आग्नीध्रऋत्विजस्य खरमस्ति(आग्नीध्रोपरि टिप्पणी पठनीयः अस्ति)। पुराणेषु वर्णनमस्ति यत् बदरीतीर्थः नर-नारायणयोः तपःस्थानमस्ति। गंगायाः एके कूले नरः तपोरतः अस्ति, अपरे कूले नारायणः। आग्नीध्रऋत्विजस्य नारायणेन साकं समानता अस्ति वा न वा, अयं अन्वेषणीयं अस्ति।

पुरुषशब्दोपरि पौराणिकसंदर्भाः

पुरुषशब्दोपरि वैदिकसंदर्भाः

पुरुषसूक्तोपरि पौराणिकसंदर्भाः

Page 177 of 523

Page 178 of 523

पुरुषसूक्तोपरि टिप्पणी

वायुपुराणे अध्यायः १.सर्ग ७.सूक्त ५६ तः आरभ्य पुरुषसूक्तस्य विस्तृतव्याख्या उपलब्धमस्ति।

भागवतपुराणे स्कन्ध ३.अध्याय २६.सूक्त २५ एवं लिङ्गपुराणे १.८८.२८ पुरुषशब्दस्य व्याख्यारूपेण समाधितः व्युत्थानस्य वर्णनमस्ति।

१०.९०.१अ

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।

चतुर्मुखस्तु ब्रह्मत्वे कालत्वे चान्तकोऽभवत्।

सहस्रमूर्द्धा पुरुषस्तिस्रोऽवस्थाः स्वयम्भुवः ।।वायुपुराणम् सर्ग १.अध्याय ५.सूक्त २६।।

सहस्रशिरसं साक्षाद् यं अनन्तं प्रचक्षते ।

सङ्कर्षणाख्यं पुरुषं
भूतेन्द्रियमनोमयम् ॥ भागवतपु. स्कन्ध
३.अध्याय २६.सूक्त २५ ॥

Page 178 of 523

Page 179 of 523

सहस्राक्ष उपरि पौराणिकसंदर्भाः

सहस्रोपरि वैदिकसंदर्भाः

सहस्रशीर्षा -- कथितुं शक्यन्ते यत् अत्र शीर्षः साधारण शीर्षः नास्ति, अपितु यज्ञस्य शीर्षः अस्ति। सोमयागे प्रवर्ग्यकृत्ये द्वादशशीर्षाणां निर्माणं करणीयमस्ति(प्रवर्ग्योपरि टिप्पणी पठनीयः)। या प्रजाः अस्ति, तस्याः शिरोभवनम्, प्रवरणम्, तस्यां रेतः सिञ्चनम्। ये द्वादशशीर्षाः भवन्ति, तेषां प्रयोजनं तैत्तिरीयारण्यके ५.१२.१ कथितमस्ति। अनुमानमस्ति यत् सहस्रसंख्या सामवेदस्य, शतसंख्या यजुर्वेदस्य एवं दशसंख्या ऋग्वेदस्य प्रतीकमस्ति। शौनकीयअथर्ववेद ४.६.१ अनुसारेण - ब्राह्मणो जज्ञे प्रथमो दशशीर्षो दशास्यः । स सोमं प्रथमः पपौ स चकारारसं विषम् ॥
अतएव, दशशीर्षावस्थायां विषस्य अरसकरणं भवति। शतशीर्षावस्थायां ये प्राणाः रौद्राः सन्ति, तेषां शमनं भवति (शतरुद्रीयं)। ऋग्वेद ८.७८.१ अनुसारेण - पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर। शता च शूर गोनाम्॥ ८.०७८.०१। पुरोडाशः

Page 179 of 523

Page 180 of 523

मस्तिष्कस्य प्रतीकं भवति। अत्र अन्धसः रूपान्तरणं सहस्रप्रकारस्य पुरोडाशे कथितं अस्ति।

सहस्राक्ष विषये, अथर्ववेदे ४.२०.८ कथनमस्ति - तां मे सहस्राक्षो देवो दक्षिणे हस्त आ दधत्। तयाहं सर्वं पश्यामि यश्च शूद्र उतार्यः ॥४॥ आविष्कृणुष्व रूपाणि मात्मानमप गूहथाः । अथो सहस्रचक्षो त्वं प्रति पश्याः किमीदिनः ॥
५॥ दर्शय मा यातुधानान् दर्शय यातुधान्यः । पिशाचान्त्सर्वान् दर्शयेति त्वा रभ ओषधे ॥६॥ कश्यपस्य चक्षुरसि शुन्याश्च चतुरक्ष्याः । वीध्रे सूर्यमिव सर्पन्तं मा पिशाचं तिरस्करः ॥७॥ उदग्रभं परिपाणाद्यातुधानं किमीदिनम् । तेनाहं सर्वं पश्याम्युत शूद्रमुतार्यम् ॥ अयं संकेतमस्ति यत् सहस्राक्ष अथवा सहस्रचक्षु - अवस्थायां स्वदोषाणां दर्शनस्य क्षमतायाः प्राप्तिर्भवति। संसारे स्वदोषाणां दर्शनं सर्वाधिकं कठिनं अस्ति। पुराणेषु अक्षाणां चतुःप्रकाराः सन्ति - कृत, त्रेता, द्वापर, कलि। महाभारत वनपर्व ७२ मध्ये कथनमस्ति

Page 180 of 523

Page 181 of 523

यत् यदा नलः अक्षविद्यायां निपुणं भवति, तदा कलिः तस्य देहं विसृजति।


Page 307 of 523

करने कराने का सब काम शरण्य-(भगवान्-) का ही रहता है, शरणागत का नहीं I

लोकमान्य बाल गंगाधर तिलक द्वारा लिखित गीतारहस्य अथवा कर्मयोगशास्त्र में इसप्रकार बताया है---वायु, यम, अग्नि, वरुण, चंद्र, प्रजापति अर्थात् ब्रह्मा, और परदादा भी तुम्हीं हो I तुम्हें हजार बार नमस्कार है I और फिर भी तुम्हीं को नमस्कार है I

[ब्रह्मा से मरीचि आदि सात मानसपुत्र उत्पन्न हुए और मरीचि कश्यप, तथा कश्यप से सब प्रजा उत्पन्न हुई है (महाभारत आदिपर्व) इसलिए इन मरीचि आदि को ही प्रजापति कहते हैं (शांतिपर्व) I इसीसे कोई कोई प्रजापति शब्द का अर्थ कश्यप आदि प्रजापति करते हैं परन्तु यहाँ प्रजापति शब्द एकवचनांत है, इस कारण प्रजापति का अर्थ ब्रह्मदेव ही अधिक ग्राह्य दीख पड़ता है I इसके अतिरिक्त ब्रह्मा, मरीचि आदि के पिता अर्थात् सबके पितामह (दादा) हैं, अत: आगे उसकी सार्थकता व्यक्त हो जाती है I]

नम: पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व I

Page 307 of 523

अनन्तवीर्यामितविक्रमस्त्वं सर्वं
समाप्नोषि ततोऽसि सर्व : II

(श्रीमद्भगवद्गीता अध्याय 11 श्लोक 40)

अन्वय **:-** अथ पुरस्तात् पृष्ठत : ते नम :,सर्वत
एव सर्व नमो अस्तु ते I त्वं अनन्तवीर्या
अमितविक्रम अस्तु , ततो सर्व : असि सर्वं
समाप्नोषि I

शब्दार्थ **:-** अथ—इसलिए ; पुरस्तात् —आगे से ;
पृष्ठत :--पीछे से ; ते —आपको; नम:---नमस्कार है ;,
सर्वत ---सब ओर, सभी जगह , समस्त प्राणियों में
स्थित ; एव—ही ; सर्व —सब; नमो अस्तु ते ----आपको
नमस्कार है ; ! त्वं —-आप; अनन्तवीर्या ----
अंतहीन सामर्थ्यवान ; अमितविक्रम ---अत्यंत
पराक्रमी ; अस्तु ---सत्य रूप से , वास्तव मे ;
ततो —फैला हुआ ; सर्व :--सब; असि---है ; सर्वं —
सब; समाप्नोषि ---व्याप्त है ;

अर्थ **:-** आप अंतहीन सामर्थ्यवान अत्यंत
पराक्रमी हैं आपके लिए आगे से और पीछे से भी
नमस्कार है I हे सर्वात्मन ! आपके लिए सभी ओर
से नमस्कार हो I वास्तव में आप सभी में आपका
ही विस्तार है , आप ही समस्त संसार को व्याप्त
किये हुए हैं इससे आप ही सर्व रूप हैं I

Page 309 of 523

डॉ॰ सर्वेपल्लि राधाकृष्णन् के मतानुसार अर्थ इस प्रकार किया गया है:--

तुझे सामने से नमस्कार है; तुझे पीछे की ओर से नमस्कार है; हे सब कुछ तुझे सब ओर से नमस्कार है I तेरी शक्ति असीम है और तेरा बल अमाप है; तू सब में रमा हुआ है, इसलिए तू सब-कुछ है I

जगद्गुरु श्री आद्यशंकराचार्य कृत श्रीमद्भगवद्गीताभाष्य के अनुसार:---

भाष्य:- नम: पुरस्तात् पूर्वस्यां दिशि तुभ्यम् अथ पृष्ठत: ते पृष्ठत: अपि च ते I नम: अस्तु ते सर्वत एव सर्वासु दिक्षु सर्वत्र स्थिताय हे सर्व अनन्तवीर्यामितविक्रम: अनन्तं वीर्यम् अस्य अमितो विक्रम: अस्य I

वीर्यं सामर्थ्यं विक्रम: पराक्रम: I वीर्यवान अपि कश्चित् शस्त्रादिविषये न पराक्रमते मन्दपराक्रमो वा I त्वं तु अनन्तवीर्य: अमितविक्रम: च इति अनन्तवीर्यामितविक्रम: I

सर्व समस्तं जगत् समाप्नोषि सम्यग् एकेन आत्मना व्याप्नोषि

Page 309 of 523

Page 310 of 523

यत: तस्माद् असि भवसि सर्व:, त्वया विना भूतं न किन्चिद्

अस्ति इत्यर्थ: II

अर्थ:- आपको आगे से अर्थात पूर्व दिशा में और पीछे से भी नमस्कार है I हे सर्वरूप! आपको सब ओर से नमस्कार है अर्थात सर्वत्र स्थित हुए आपको सब दिशाओं में नमस्कार है I आप अनन्तवीर्य और अपार पराक्रम्वाले हैं I

वीर्य सामर्थ्य को कहते हैं और विक्रम पराक्रम को I कोई व्यक्ति सामर्थ्यवान् होकर भी शस्त्रादि चलाने में पराक्रम नहीं दिखा सकता, अथवा मन्दपराक्रमी होता है I परन्तु आप तो अनन्तवीर्य और अमित पराक्रम से युक्त हैं I इसलिये आप अनन्तवीर्य और अमितपराक्रमी हैं I

आप अपने एक स्वरूप से सारे जगत् को व्याप्त किये हुए स्थित हैं, इसलिए आप सर्वरूप हैं, अर्थात आपसे अतिरिक्त कुछ भी नहीं है I

स्वामी रामसुखदास ने साधक-संजीवनी में इस प्रकार लिखा है:-

हे सर्व I आपको आगे से नमस्कार हो I पीछे से नमस्कार हो I सब ओर से ही नमस्कार हो I हे

Page 310 of 523

Page 311 of 523

अनन्तवीर्य I अमित विक्रम वाले आपने सबको समावृत कर रख है; अत: सबकुछ आप ही हैं I

व्याख्या— ‘नाम: पुरस्तादच पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व’--- अर्जुन भयभीत है I मैं क्या बोलूं---यह उनकी समझ में नहीं आ रहा है I इसलिए वे आगे से, पीछे से, सब ओर से अर्थात दसों

दिशाओं से केवल नमस्कार- ही नमस्कार कर रहे हैं I

‘अनन्तवीर्यामितविक्रमस्त्वम्’-- ‘अनन्तवीर्य’ कहने का तात्पर्य है की आप तेज, बल आदि से भी अनन्त हैं; और ‘अमितविक्रम’ कहने का तात्पर्य है की आप के पराक्रमयुक्त संरक्षण आदि कार्य भी असीम हैं I इस तरह आपकी शक्ति भी अनन्त है और पराक्रम भी अनन्त हैI

‘सर्वं समाप्नोषि ततोऽसि सर्व:’--- आपने सबको समावृत कर रखा

है अर्थात सम्पूर्ण संसार आपके अन्तर्गत है I संसार का कोई भी अंश ऐसा नहीं है, जो की आपके अन्तर्गत न हो I

यहां अर्जुन एक बड़ी अलौकिक, विलक्षण बात देख रहे हैं की भगवान् अनन्त सृष्टियों में

Page 311 of 523

Page 312 of 523

परिपूर्ण, व्याप्त हो रहे हैं, और अनन्त सृष्टियाँ भगवान् के किसी अंश में हैं I

ज्ञानेश्वरी गीता में अध्याय के 39-40 श्लोक का अर्थइस प्रकार बताया गया है----

हे देव! ऐसी कौन-सी वस्तु है जिसमेंआप नहीं हैं, ऐसी कौन सी जगह है जहाँ आप नहीं हैं । पर अब इन बातों को छोड़िये I आप चाहे जैसे हों, मैं आपको नमन करता हूँ । हे अनन्त! आप वायु हैं,

सबका नियमन करने वाले यम हैं और प्राणिमात्र में रहने वाले अग्नि भी हैं I आप वरुण और सोम हैं I आप ही सृष्टि कर्ता ब्रह्मा और उस विश्वपितामह ब्रह्मा के आदि जनक हैं I इसके अतिरिक्त और जो-जो रूप हों अथवा अरूप हों; वह सब आप ही हैं I ऐसे जगन्नाथ भगवान् को मैं नमन करता हूँ I पाण्डुपुत्र अर्जुन ने इस प्रकार अनुरागयुक्तचित्त से भगवान् को नमन करके फिर कहना आरम्भ किया । “हे प्रभो! मैं आपको नमस्कार करता हूँ”। तदनन्तर, उसने (अर्जुन ने) भगवान् की श्रीमूर्ति को आपादमस्तक ठीक तरह देख कर बारम्बार नमस्ते, नमस्ते कहा । उस मूर्ति के पृथक्-पृथक् अवयवों को देख कर उसे अत्यन्त समाधान हुआ और उसने फिर कहा कि हे

Page 312 of 523

Page 313 of 523

प्रभो! नमस्ते, नमस्ते । इस चराचर जगत् के प्राणिमात्र में उन्हीं को देख कर उसने फिर कहा कि हे प्रभो, नमस्ते, नमस्ते । उसे इस प्रकार प्रभु के अत्यन्त आश्चर्यजनक अनन्त स्वरूपों का जैसे-जैसे स्मरण होने लगा वैसे- वैसे वह नमस्ते-नमस्ते कहने लगा । उसकी समझ में ही नहीं आता था कि इसके अलावा भगवान् की और कौन-सी स्तुति की जाय तथा उससे मौन भी नहीं रहा जाता था उसे इस बात का भी ज्ञान नहीं रहा कि प्रेमावेश में मैं क्या बका जा रहा हूँ । किंबहुना, उसने हजारों बार नमस्कार किया और फिर उसने कहा—“हे श्रीहरि! मैं आपके सम्मुख नमस्कार करता हूँ । मुझे इस बात से कुछ भी सरोकार नहीं है कि प्रभु के पीठ अथवा पेट हैं अथवा नहीं, पर फिर भी हे स्वामी! मैं आपके पृष्ठ-प्रान्त को भी नमस्कार करता हूँ । आप मेरे पृष्ठ भाग में मेरे पर्क्ष में खड़े हैं, इसीलिए मैं आपके पृष्ठ-प्रान्त का नाम लेता हूँ; परन्तु वास्तव में आप न तो संसार के सम्मुख ही हैं और न उसकी पीठ के पीछे ही हैं। मैं आपके अलग-अलग अवयवों का वर्णन नहीं कर सकता; इसलिए हे सर्वात्मक देव! मैं आपके सर्वरूप को ही नमस्कार करता हूँ । हे महाराज! जिसकी शक्ति-

Page 313 of 523

Page 314 of 523

सामर्थ्य अनन्त है, जो अमित पराक्रमी है, जो सभी कालों में समान रूप से रहने वाला है, जो सर्वरूप है, उसे मेरा नमस्कार है । जैसे आकाश ही समस्त आकाश को आच्छादित करके अवकाश रूप से रहता है, वैसे ही आप भी अपने सर्वत्व से सब में व्याप्त रहते हैं । किंबहुना, आप ही अखिल विश्व हैं; परन्तु जैसे क्षीरसिन्धु में क्षीर की ही लहरें उठती हैं, ठीक वैसे ही यह सम्बन्ध है । इसीलिए, हे देव! अब यह बात मेरे अंत:करण में ठीक-ठीक बैठ गयी है कि आप इस सारे संसार से भिन्न नहीं हैं और यह सबकुछ आप ही हैं ।

लोकमान्य बाल गंगाधर तिलक द्वारा लिखित गीतारहस्य अथवा कर्मयोगशास्त्र में इसप्रकार बताया है---

हे सर्वात्मक! तुम्हें सामने से नमस्कार है, पीछे से नमस्कार है और सभी ओर से तुम को नमस्कार है I तुम्हारा वीर्य अनंत है और तुम्हारा प्रक्रम अतुल है I सबका समापन करनेवाले हो, इसलिए तुम्हीं ‘सर्व’ हो I [सामने से नमस्कार, पीछेसे नमस्कार, ये शब्द परमेश्वर कि सर्वव्यापकता दिखलाते हैं उपनिषदों में ब्रह्म का ऐसा वर्णन है, कि “ब्रह्मैवेदं विश्वमिद् वरिष्ठम्” (मुण्डक

Page 314 of 523

Page 315 of 523

2 खंड 2 श्लोक 2 व 11 छान्दोग्योपनिषद प्रपाठक 7 खंड 25), उसी के अनुसार भक्ति- मार्ग की यह नमनात्मक स्तुति है I]

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् I

न त्वत्समोऽस्त्यभ्यधिक: कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव II (श्रीमद्भगवद्गीता अध्याय 11 श्लोक 43)

अन्वय:- त्वम् अस्य लोकस्य चराचरस्य पिता असि पूज्यश्च गुरुर्गरीयान् त्वत्समो अत्यभ्यधिक: न अस्ति, कुतो अन्यो लोकत्रये अपि अप्रतिम प्रभाव II

शब्दार्थः- त्वम्---आप; अस्य—इस; लोकस्य--- लोक के; चराचरस्य-

--जड़-चेतन; पिता---पिता; असि---है; पूज्य— पूजनीय; च---और; गुरुर्गरीयान्-----प्रभाव वाले; त्वत्समो---आप जैसा, आप के सामान; अत्यभ्यधिक:---आप से भी अधिक; न अस्ति---नहीं है; कुतो—कहीं; अन्यो—दूसरा; लोकत्रये--- तीनों लोकों में; अपि—भी; अप्रतिम---जिसका प्रतिद्वंदी न हो, अनुपम; प्रभाव---प्रभाव;

Page 315 of 523

Page 316 of 523

अर्थ:- आप इस लोक के जड़-चेतन, के पिता हैं, अति पूजनीय गुरु और अत्यधिक प्रभावशाली हैं I तीनों लोकों में आपसे अधिक तो कहाँ, आपका कोई प्रतिद्वंदी भी नहीं है II

डॉ॰ सर्वेपल्लि राधाकृष्णन् के मतानुसार अर्थ इस प्रकार किया गया है:--

तू इस सारे चराचर जगत् का पिता है! तू इस संसार का पूजनीय है और आदरणीय गुरु है! हे अनुपम महिमा वाले, तीनों लोकों मे कोई तेरे सामान ही नहींफिर, तो फिर तुझसे अधिक तो हो ही किस प्रकार सकता है I

जगद्गुरु श्री आद्यशंकराचार्य कृत श्रीमद्भगवद्गीताभाष्य के अनुसार:---

भाष्य:-- पिता असि जनयिता असि लोकस्य प्राणिजातस्य चराचरस्य स्थावरजङगमस्य, न केवलं त्वम् अस्य जगत: पिता पूज्य: च पूजार्हो यतो गुरु: गरीयान् गुरुतर: I कस्मात् गुरुतर: त्वम् इति आह---

न च त्वत्सम: त्वत्तुल्य: अन्य: अस्ति I न हि ईश्वरद्वयं सम्भवति अनेकेश्वरत्वे व्यवहारानुपपत्ते: I त्वत्सम एव तावद् अन्यो

Page 316 of 523

Page 317 of 523

न सम्भवति कुत एव अन्य: अभ्यधिक: स्यात् I लोकत्रये अपि सर्वास्मिन् अप्रतिमप्रभाव!

प्रतिमीयते यया सा प्रतिमा, न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वम् अप्रतिमप्रभाव:, हे अप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थ:II
अर्थ:-- इस स्थावर-जंगमरूप समस्त जगत् के यानी प्राणिमात्र के उत्पन्न करने वाले पिता हैं I केवल पिता ही नहीं, आप पूजनीय भी हैं, क्योंकि आप बड़े-से बड़े गुरु हैं I

हे अप्रतिमप्रभाव! सारी त्रिलोकी में आपके सामान दूसरा कोई नहीं है; क्योंकि अनेक ईश्वर मान लेने पर व्यवहार सिद्ध नहीं हो सकता I इसलिए ईश्वर दो नहीं हो सकते I जबकि सारे त्रिभुवन में आपके सामान ही दूसरा कोई नहीं है, फिर अधिक तो कोई हो ही कैसे सकता है ?

जिससे किसी वास्तु की समानता की जाय उसका नाम ‘प्रतिमा’ है, जिन आपके प्रभाव की कोई प्रतिमा नहीं है, वह आप अप्रतिमप्रभाव हैं I इस प्रकार हे अप्रतिमप्रभाव! अर्थात हे निरतिशयप्रभाव!

Page 317 of 523

Page 318 of 523

स्वामी रामसुखदास ने साधक-संजीवनी में इस प्रकार लिखा है:-

आप ही इस चराचर संसार के पिता हैं, आप ही पूजनीय हैं और आप ही गुरुओं के महान गुरु हैं I हे अनन्त प्रभावशाली भगवन् I इस त्रिलोकी में आपके सामान भी दूसरा कोई नहीं है, फिर अधिक तो हो ही कैसे सकता है I

व्याख्या— ‘पितासि लोकस्य चराचरस्य’--- अनेक ब्रम्हाण्डों में

मनुष्य, पशु, पक्षी, आदि जितने जङगम प्राणी हैं, और वृक्ष, लता आदि जितने स्थावर प्राणी हैं, उन सबको उत्पन्न करने वाले और उनका पालन करने वाले पिता भी आप हैं, उनके पूजनीय भी आप हैं तथा उनको शिक्षा देनेवाले महान् गुरु भी आप ही हैं-- ‘त्वमस्य पूज्यश्च गुरुर्गरीयान्’ !---------------

‘गुरुर्गरीयान’ का तात्पर्य है की मनुष्य मात्र को व्यवहार और परमार्थ में जहां-कहीं भी गुरुजनों से शिक्षा मिलाती है, उन शिक्षा देने वाले गुरुओं के भी महान् गुरु आप ही हैं अर्थात् मात्र शिक्षा का, मात्र ज्ञान का उद्गम-स्थान आप ही हैं I

Page 318 of 523

Page 319 of 523

‘न त्वत्समोऽस्त्यभ्यधिक: कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव’---- इस त्रिलोकी में जब आपके सामान भी कोई नहीं है, कोई होगा नहीं और कोई हो सकता ही नहीं, तब आपसे अधिक विलक्षण कोई हो ही कैसे सकता है? इसलिए आपका प्रभाव अतुलनीय है, उसकी तुलना किसी से भी नहीं की जा सकती I

ज्ञानेश्वरी गीता में इस श्लोक का अर्थ इस प्रकार बताया गया है----

हे देव! अब आपकी वास्तविक महिमा मेरी समझ में पूरी तरह से आ गयी है । आप ही इस चराचर जगत् के जन्मस्थान हैं; आप जी हरि और हर इत्यादि समस्त देवताओं के परम देवता हैं । वेदों को भी आप से ही ज्ञान प्राप्त हुआ है और आप ही आदि गुरु हैं । हे श्रीराम! आप भूतमात्र के साथ समानभाव से व्यवहार करते हैं । आप समस्त गुणों में अप्रतिम और अद्वितीय हैं । यह कहने की आवश्यकता ही क्या है कि आपके समान दूसरा कोई नहीं है । आप आकाश हैं और आप में ही यह सारा संसार समाविष्ट है । ऐसी स्थिति में यह कहना सिर्फ लज्जा का विषय है कि आपकी ही भांति और कोई सर्वव्यापी है । अब इस सम्बन्ध में और अधिक क्या कहा जाय! अतएव

Page 319 of 523

Page 320 of 523

त्रिभुवन में एकमात्र आप ही अद्वितीय हैं । आपकी समकक्षता का अथवा आप से बढ़ कर दूसरा कोई नहीं है । आपकी महीमा अलौकिक और अवर्णनीय है ।”

लोकमान्य बाल गंगाधर तिलक द्वारा लिखित गीतारहस्य अथवा कर्मयोगशास्त्र में इसप्रकार बताया है---इस चराचर जगतके पिता तुम्हीं हो,तुम पूज्य हो, और गुरु के भी गुरु हो I त्रैलोक्यभर में तुम्हारी बराबरी का कोई नहीं है I फिर हे अतुलप्रभाव! अधिक खान से होगा?

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् I

पितेव पुत्रस्य सखेव सख्यु: प्रिय: प्रियायार्हसि देव सोढुम् II

(श्रीमद्भगवद्गीता अध्याय 11 श्लोक 44)

अन्वय:-- तस्मात् अहम् ईश मीड्यम प्रणम्य कायं प्रणिधाय तवाम् प्रसादये I देव पितेव पुत्रस्य सखेव सख्यु: प्रिय: प्रियाया सोढुम् अर्हसि I

शब्दार्थः—तस्मात्---इसीलिए, इसी कारण से; अहम्---मैं; ईश—परमात्मा; मीड्यम---बोधक;

Page 320 of 523

Page 321 of 523

प्रणम्य---प्रणाम करके; कायं—शरीर को; प्रणिधाय---पूजा के लिए,निवेदित करना, अर्पित करना; तवाम्---आपको; प्रसादये---प्रसन्न करने के लिये; देव—प्रभु; पितेव—पिता ही; पुत्रस्य—पुत्र का; सखेव—सखा ही; सख्यु:--- सखा के लिये; प्रिय:---पति; प्रियाया---पत्नी का; सोढुम्---सहनशील; अर्हसि---योग्य होता है;

अर्थ:- इसीलिए मैं परमात्मा का बोध करवाने वाले इस शरीर को आप ईश्वर को प्रसन्न करने के लिए, आपको प्रणाम करके अर्पित करता हूं I हे प्रभु! पिता जैसे पुत्र के लिए, सखा जैसे सखा के लिय और पति जैसे पत्नी के लिए अपराध करने पर सहनशीलता दिखाते हैं वैसे ही आप भी मेरे अपराध सहन करने योग्य हैं I

डॉ॰ सर्वेपल्लि राधाकृष्णन् के मतानुसार अर्थ इस प्रकार किया गया

है:--

इसलिए प्रणाम करके और अपने शारीर को तेरे सम्मुख साष्टांग

झुकाकर मैं तुझ आराधनीय प्रभु को प्रसान करना चाहता हूं I हे देव, तु मेरे व्यवहार को उसी प्रकार क्षमा कर, जैसे पिता पुत्र के, या

Page 321 of 523

Page 322 of 523

मित्र मित्र के या प्रेमी अपने प्रिय के व्यवहार को सहन करता हैI

जगद्गुरु श्री आद्यशंकराचार्य कृत श्रीमद्भगवद्गीताभाष्य के अनुसार:---

भाष्य:- तस्मात् प्रणम्य नमस्कृत्य प्रणिधाय प्रकर्षेण नीचै: धृत्वा कायं शरीरं प्रसादये प्रसादं कारये त्वाम् अहम् ईषम् ईशितारम् ईड्यं स्तुत्यम्! त्वं पुन: पुत्रस्य अपराधं पिता यथा क्षमते सर्वं सखा इव च सख्यु: अपराधं यथा वा प्रियाया अपराधं प्रिय:क्षमते एवम् अर्हसि हे देव सोढुं प्रसाहितुं क्षन्तुम् इत्यर्थ: II

अर्थ:- इसीलिये मैं अपने शरीर को भली प्रकार नीचा करके अर्थात आपके चरणों में रख कर प्रणाम करके स्तुति करने योग्य शासन-करता आप ईश्वर को प्रसन्ना करता हूं I अर्थात आपसे अनुग्रह करता हूं I जैसे पुत्र का समस्त अपराध पिता क्षमा करता है तथा जैसे मित्र का अपराध मित्र अथवा प्रिया (पत्नी) का अपराध प्रिय (पति) क्षमा करता है---सहन करता है,

Page 322 of 523

Page 323 of 523

वैसे ही हे देव I आपको भी (मेरे समस्त अपराधों को सर्वथा) सहन करना अर्थात क्षमा करना उचित

है I

स्वामी रामसुखदास ने साधक-संजीवनी में इस प्रकार लिखा है:-

इसलिये शरीर से लम्बा पड़कर स्तुति करने योग्य आप ईश्वर को मैं प्रणाम करके प्रसन्न करना चाहता हूं I जैसे पिता पुत्र के, मित्र मित्र के और पति पानी के अपमान को श लेता है, ऐसे ही हे देव I आप मेरे द्वारा किया गया अपमान सहने में समर्थ हैं I

व्याख्या---‘तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमी-

ड्यम्’

----- आप अनन्त ब्रम्हाण्डों के ईश्वर
हैं I इसलिए सबके द्वारा स्तुति करने योग्य आप ही हैं! आपके गुण, प्रभाव, महत्त्व आदि अनन्त हैं, अत: ऋषि, महर्षि, देवता,महापुरुष आपकी नित्य-निरन्तर स्तुति करते रहें, तो भी पार नहीं प् सकते I ऐसे स्तुति करने योग्य आपकी मैं क्या स्तुति कर सकता हूं? मेरेमें आपकी स्तुति करने का बल नहीं है, सामर्त्य

Page 323 of 523

Page 324 of 523

नहीं है! इसलिए मैं तो केवल आपके चरणों में लंबा पड़कर दण्डवत् प्रणाम ही कर सकता हूं और इसी से आपको प्रसन्न करना चाहता हूं I

‘पितेव पुत्रस्य सखेव सख्यु: प्रिय: प्रियायार्हसि देव सोढुम्’—किसीका अपमान होता है तो उसमें मुख्य तीन कारण होते हैं-----(1) प्रमाद— (असावधानी-) से (2) हँसी— दिल्लगी, विनोद में ख्याल न रहने से और (3) अपनेपन की घनिष्ठता होने पर अपने

साथ रहने वाले का महत्त्व न जानने से I

जैसे, गोदी में बैठा हुआ छोटा बच्चा अज्ञानवश पिता की दाढ़ी-मूँछ खींचता है, मुंह पर थप्पड़ लगाता है, कभी कहीं लात मार देता है तो बच्चे की चेष्टा देख कर पिता राजी ही होते हैं, प्रसन्न ही होते हैं I वे अपने में यह भाव लाते ही नहीं पुत्र मेरा अपमान कर रहा है I

मित्र मित्र के साथ चलते--फिरते, उठाते- बैठते आदि, समय चाहे जैसा व्यवहार करता है, चाहे जैसा बोल देता है जैसे---‘तुम बड़े सत्य बोलते हो जी I तुम तो बड़े सत्यप्रतिज्ञ हो I अब तो तुम बड़े आदमी हो गए हो I तुम तो खूब

Page 324 of 523

Page 325 of 523

अभिमान करने लग गये हो I आज मानो तुम राजा ही बन गए हो I आदि, पर उसका मित्र उसकी इन बातों का ख्याल नहीं करता I वह तो यही समझता है की हम बराबरी के मित्र हैं, ऐसी हँसी-दिल्लगी तो होती ही रहती है I पत्नी के द्वारा आपस के प्रेम के कारण उठने-बैठने, बातचीत करने आदि में पति की जो कुछ अवहेलना होती है, उसे पति सह लेता है I जैसे, पति नीचे बैठा है तो वह ऊंचे आसन पर बैठ जाती है, कभी किसी बात को लेकर अवहेलना भी कर देती है, पर पति उसे स्वाभाविक ही सह लेता है I अर्जुन कहते हैं कि जैसे पिता पुत्र के, मित्र मित्र के और पति पत्नी के अपमान को सह लेता है अर्थात् क्षमा कर देता है, ऐसे ही भगवन् I आप मेरे अपमान को सहने में

समर्थ हैं अर्थात् इसके लिए मैं आपसे क्षमा मांगता हूं I

ज्ञानेश्वरी गीता में इस श्लोक का अर्थ इस प्रकार बताया गया है----अर्जुन ने ये सब बातें कह कर भगवान् को दण्डवत् किया और तत्क्षण ही उसके शरीर में सात्त्विक भावों की बाढ़—सी आ गयी । फिर वह गद्गद स्वर से कहने लगा “हे प्रभु! आप प्रसन्न हों ।इस

Page 325 of 523

Page 326 of 523

अपराधसिन्धु से मुझे निकालें । आप समस्त जगत् के सुहृद है; पर मैंने भाईचारेके नाते से कभी आपका विशेष सम्मान नहींकिया । हे विश्वेश्वर! आपके साथ मैंने ऐसा आश्चर्यजनक और लज्जास्पद आचरण किया है । यदि सचमुच देखा जाय तो प्रशंसा के पात्र स्वयं आप ही थे; पर आपने भरी सभा में मेरी प्रशंसा की और मैं अहंकार पूर्वक बैठा हुआ डींगहाँकता रहा । हे मुकुन्द! मेरे ऐसे अपराधों का कहीं अन्त नहीं है । इसलिये आप इन अपराधों से मुझे उबारें । मुझ में तो इस प्रकार की क्षमा- याचना करने की योग्यता नहीं है । परन्तु जिस प्रकार बालक अपने पिता के समक्ष बड़े प्रेम से बोलता है और यदि उसका अपराध भी होता है, तो भी जिस प्रकार पिता अपने चित्त में परायेपन का भाव न रख कर प्रेम से उसके समस्त अपराध क्षमा कर देता है, उसी प्रकार आप भी मेरे सारे अपराध क्षमा करेंगे, मित्र का अपराध मित्र ही सहन करते हैं । बस इसी प्रकार आप भी मेरा अपराध सहन करें । जैसे कोई प्रेमी व्यक्ति अपने किसी प्रेमी व्यक्ति से सम्मान की कामना नहीं करता, वैसे ही हे देव! आपने जो मेरे घर में जूठन उठायी और मैंने आपको उठाने दी, उसके लिये भी आप मुझे क्षमा

Page 326 of 523

Page 327 of 523

करें अथवा जिस समय किसी घनिष्ठ और प्रियजन से भेंट होती है, उस समय संसार में अनुभव किये हुए समस्त संकटोंका वर्णन करने में कोई संकोच नहीं होता अथवा जब अपना तन, मन, और आत्मा-इन तीनों को पूर्ण रूप से अपने पति को समर्पित कर चुकी कोई पतिपरायणा स्त्री मिलती है, तब उसके साथ बिना खुले दिल से बातें किये रहा ही नहीं जाता । इसी प्रकार, हे गोस्वामी! मैंने भी आपसे विनती की है। इसके अतिरिक्तयेबातें कहने का और भी एक कारण है ।

लोकमान्य बाल गंगाधर तिलक द्वारा लिखित गीतारहस्य अथवा कर्मयोगशास्त्र में इसप्रकार बताया है---
तुम स्तुत्य और समर्थ हो, इसलिए शरीर झुकाकर नमस्कार करके तुमसे प्रार्थना करता हूँ, कि ‘प्रसन्न हो जाओ’ I जिसप्रकार पिता अपने पुत्र के, अथवा सखा अपने सखाके, अपराध क्षमा करता है, उसी प्रकार हे देव! प्रेमी आपको प्रिय के अर्थात् अपने प्रेमपात्र के (अर्थात् मेरे सब) अपराध क्षमा करने चाहिए I

Page 327 of 523

[कुछ लोग "प्रियः प्रियायार्हसि" इन शब्दोंका "प्रिय पुरुष जिस प्रकार अपनी प्रिय स्त्रीके' ऐसा अर्थ करते हैं। परतु हमारे मतमें यह ठीक नहीं है। क्योंकि व्याकरणकी रीतिसे 'प्रियायाऽर्हसि'के प्रियायाः + अर्हसि अथवा प्रियायै + अर्हसि ऐसे पद नहीं किये जा सकते. और उपमाद्योतक 'इव' शब्दभी इस श्लोकमें दो बारही आया है। "अतः प्रियः प्रियायार्हसि" को तीसरी उपमा न समझकर उपमेय माननाही अधिक प्रशस्त है। 'पुत्रके' (पुत्रस्य), 'सखाके' (सख्युः), इन दोनों उपमानात्मक षठचन्त शब्दोंके समान आदि उपमेयमेंभी 'प्रियस्य' (प्रियके) यह षष्ठचन्त पद होता, तो बहुत अच्छा होता। परंतु अब 'स्थितस्य गतिश्चिन्तनीया' इस न्यायके अनुसार यहाँ व्यवहार करना चाहिये। हमारी समझमें यह बात बिलकुल युक्तिसंगत नहीं दीख पड़ती, कि 'प्रियस्य' इस षष्ठचन्त पुलिंग, पदके अभावमें, व्याकरणके विरुद्ध 'प्रियायाः' यह षष्ठचन्त स्त्रीलिंगका पद किया जावे, और जब वह अर्जुनके लिये लागू न हो सके तब, 'इव' शब्दको अध्याहार मानकर प्रियः प्रियायाः" – प्रेमी अपनी प्यारी स्त्रीके – ऐसी तीसरी उपमा मानी जावे, और वहभी शृंगारिक अतएव अप्रासंगिक हो। इसके सिवा एक और बात है, कि पुत्रस्य सख्युः, प्रियायाः, इन तीनों पदोंके उपमानमें चले जानेसे उपमेयमें षष्ठचन्त पद बिलकुलही नहीं रह जाता, और 'मे' अथवा 'मम' पदका फिरभी अध्याहार करना पड़ता है; एवं इतनी माथा-पच्ची करनेपर उपमान और उपमेयमें जैसे तैसे विभक्तिकी समता हो गई, तोभी दोनोंमें लिंगकी विषमताका नया दोष बनाही रहता है। दूसरे पक्षमें – अर्थात् प्रियाय + अर्हसि ऐसे व्याकरणकी रीतिसे शुद्ध और सरल पद किये जावें, तो उपमेयमें – जहाँ षष्ठी होनी चाहिये, वहाँ 'प्रियाय' यह चतुर्थी आती है, – बस; इतनाही दोष रहता है और यह दोषभी विशेष महत्त्वका नहीं है। क्योंकि षष्ठीका अर्थ यहाँ चतुर्थीका-सा है और अन्यत्रभी कई बार ऐसा होता है। परमार्थप्रपा टीकामें इस श्लोकका अर्थ वैसाही है, जैसा कि हमने किया है।]

"नारायणाथर्वशीर्षोपनिषत् " के अनुसार स्तुति -

(ऊँ सहनाववतु ......)

ऊँ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः
सृजायेति । नारायणात् प्राणो जायते। मनः
सर्वेन्द्रियाणि च ।

Page 329 of 523

खं ज्योतिरापः पृथिवी विश्वस्य धारिणी ।
नारायणाद् ब्रह्मा जायते। नारायणाद् रुद्रो जायते । नारायणादिन्द्रो जायते ।

नारायणाद् प्रजापतयः प्रजायन्ते ।
नारायणाद् द्वादशादित्या रुद्रा वसवः सर्वाणि च छन्दांसि । नारायणादेव समुत्पद्यन्ते। नारायणे प्रवर्तन्ते ।
नारायणे प्रलीयन्ते ॥१॥

ऊँ। अथ नित्यो नारायणः । ब्रह्मानारायणः ।
शिवश्च नारायणः । शक्रश्च नारायणः ।
द्यावापृथिव्यौ च नारायणः । कालश्च नारायणः ।
दिशश्च नारायणः । ऊर्ध्वश्च नारायणः ।
अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वम् । यद्भूतं यच्च भव्यम् । निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः । न द्वितीयोऽस्ति कश्चित् । य एवं वेद । स विष्णुरेव भवति स विष्णुरेव भवति॥२॥

ओमित्यग्रे व्याहरेत् । नम इति पश्चात्। नारायणायेत्युपरिष्टात् ।

ओमित्येकाक्षरम् । नम इति द्वे अक्षरे ।
नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम् ।यो ह वै नारायणस्याष्टाक्षरं पदमध्येति ।

Page 329 of 523

Page 330 of 523

अनपब्रुवः सर्वमायुरेति । विन्दते प्राजापत्यं रायस्पोषं गौपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति ।
य एवं वेद ॥३॥

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् । अकार उकार मकार
इति। तानेकधा समभवत्तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसार-बन्धनात् । ऊँ नमो नारायणायेति मन्त्रोपासकः । वैकुण्ठभुवनलोकं गमिष्यति । तदिदं परं पुण्डरीकं विज्ञानघनम् । तस्मात् तडिदाभमात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम् ।

सर्वभूतस्थमेकं नारायणम् । कारणरूपमकार परब्रह्मोम् । एतदथर्वशिरो योऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो

दिवसकृतं पापं नाशयति । माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात् प्रमुच्यते ।
सर्ववेदपारायणपुण्यं लभते ।
नारायणसायुज्यमवाप्नोति नारायणसायुज्यमवाप्नोति । य एवं वेद ।
इत्युपनिषत् ॥४॥

“विष्णु सहस्र नाम” :------

Page 330 of 523

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
❖ अव्ययः पुरुषस्साक्षी क्षेत्रज्ञोऽक्षर एव च ॥२॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥३॥

सर्वश्शर्वशिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
❖ संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥४॥

स्वयम्भूश्शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
❖ अनादिनिधनो धाता विधाता धातुरुत्तमः ॥५॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठस्थविरो ध्रुवः ॥६॥

“□□□□□ □□□□□□ □□ 1000 □□□-“

□ □□□ □□□□□ □□□□□□□□□ □□:

□ □□□□□□ □□□□□□: □□□□□□□□ □□□-□□□□-□□□-□□□□□□ □
□□□-□□□ □□□-□□□ □□□□ □□□□□□□□ □□□□□□□□ □□ 1 □□

□□□□□□□□ □□□□□□□□ □ □□□□□□□□□ □□□□ □□□□□ □□□□□□ □□□□□ □□□□□□ □□□□□□□□□□□ □□□□□ □□ □ □□ 2 □□

Page 332 of 523

योगो योग-विदां नेता प्रधान-पुरुषेश्वरः ।
नारसिंह-वपुः श्रीमान केशवः पुरुषोत्तमः ।।
3 ।।

सर्वः शर्वः शिवः स्थाणु: भूतादि: निधि:
अव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभु: ईश्वरः ।।
4 ।।

स्वयंभूः शम्भु: आदित्यः पुष्कराक्षो
महास्वनः ।
अनादि-निधनो धाता विधाता धातुरुत्तमः ।। 5
।।

अप्रमेयो हृषीकेशः पद्मनाभो-अमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः
स्थविरो ध्रुवः ।। 6 ।।

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः
प्रतर्दनः ।
प्रभूतः त्रिककुब-धाम पवित्रं मंगलं परं ।।
7।।

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्य-गर्भो भू-गर्भो माधवो मधुसूदनः ।। 8

Page 332 of 523

Page 333 of 523

।।

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः
।
अनुत्तमो दुराधर्षः कृतज्ञः कृति: आत्मवान
।। 9 ।।

सुरेशः शरणं शर्म विश्व-रेताः प्रजा-भवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः
।। 10 ।।

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादि:
अच्युतः ।
वृषाकपि: अमेयात्मा सर्व-योग-विनिःसृतः ।।
11 ।।

वसु:वसुमनाः सत्यः समात्मा संमितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः
।। 12 ।।

रुद्रो बहु-शिरा बभ्रु: विश्वयोनिः शुचि- श्रवाः ।
अमृतः शाश्वतः स्थाणु: वरारोहो महातपाः ।।
13 ।।

सर्वगः सर्वविद्-भानु:विष्वक-सेनो जनार्दनः ।

Page 333 of 523

Page 334 of 523

वेदो वेदविद-अव्यंगो वेदांगो वेदवित् कविः ।। 14 ।।

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः
कृता-कृतः ।
चतुरात्मा चतुर्व्यूह:-चतुर्दंष्ट्र:- चतुर्भुजः ।। 15 ।।

भ्राजिष्णु भोजनं भोक्ता सहिष्णु: जगदादिजः
।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ।।
16 ।।

उपेंद्रो वामनः प्रांशु: अमोघः शुचि:
ऊर्जितः ।
अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः
।। 17 ।।
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः।
अति-इंद्रियो महामायो महोत्साहो महाबलः ।।
18 ।।

महाबुद्धि: महा-वीर्यो महा-शक्ति: महा- द्युतिः।
अनिर्देश्य-वपुः श्रीमान अमेयात्मा
महाद्रि-धृक ।। 19 ।।

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।

Page 334 of 523

Page 335 of 523

अनिरुद्धः सुरानंदो गोविंदो गोविदां-पतिः
।। 20 ।।

मरीचि:दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ।।
21 ।।

अमृत्युः सर्व-दृक् सिंहः सन-धाता संधिमान
स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा
सुरारिहा ।। 22 ।।
गुरुःगुरुतमो धामः सत्यः सत्य-पराक्रमः ।
निमिषो-अ-निमिषः स्रग्वी वाचस्पति: उदार-धीः
।। 23 ।।

अग्रणी: ग्रामणीः श्रीमान न्यायो नेता
समीरणः ।
सहस्र-मूर्धा विश्वात्मा सहस्राक्षः
सहस्रपात ।। 24 ।।

आवर्तनो निवृत्तात्मा संवृतः सं-प्रमर्दनः
।
अहः संवर्तको वह्निः अनिलो धरणीधरः ।। 25 ।।

सुप्रसादः प्रसन्नात्मा विश्वधृक्-

Page 335 of 523

Page 336 of 523

विश्वभुक्-विभुः ।
सत्कर्ता सकृतः साधु: जह्नु:-नारायणो नरः ।।
26 ।।

असंख्येयो-अप्रमेयात्मा विशिष्टः शिष्ट-कृत्-शुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः
सिद्धिसाधनः ।। 27।।
वृषाही वृषभो विष्णु: वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुति-सागरः
।। 28 ।।

सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः
।
नैक-रूपो बृहद-रूपः शिपिविष्टः प्रकाशनः ।।
29 ।।

ओज: तेजो-द्युतिधरः प्रकाश-आत्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मंत्र:चंद्रांशु:
भास्कर-द्युतिः ।। 30 ।।

अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्य-धर्म-पराक्रमः ।। 31
।।

Page 336 of 523

Page 337 of 523

भूत-भव्य-भवत्-नाथः पवनः पावनो-अनलः ।
कामहा कामकृत-कांतः कामः कामप्रदः प्रभुः
।। 32 ।।
युगादि-कृत युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजित्-अनंतजित
।। 33 ।।

इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो
वृषः ।
क्रोधहा क्रोधकृत कर्ता विश्वबाहु: महीधरः
।। 34 ।।

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः
।
अपाम निधिरधिष्टानम् अप्रमत्तः
प्रतिष्ठितः ।। 35 ।।
स्कन्दः स्कन्द-धरो धुर्यो वरदो वायुवाहनः
।
वासुदेवो बृहद भानु: आदिदेवः पुरंदरः ।। 36
।।

अशोक: तारण: तारः शूरः शौरि: जनेश्वर: ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ।।
37 ।।

Page 337 of 523

Page 338 of 523

पद्मनाभो-अरविंदाक्षः पद्मगर्भः शरीरभृत ।
महर्धि-ऋद्धो वृद्धात्मा महाक्षो
गरुड़ध्वजः ।। 38 ।।

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षण लक्षण्यो लक्ष्मीवान समितिंजयः
।। 39 ।।

विक्षरो रोहितो मार्गो हेतु: दामोदरः सहः ।
महीधरो महाभागो वेगवान-अमिताशनः ।। 40 ।।
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ।। 41
।।

व्यवसायो व्यवस्थानः संस्थानः स्थानदो- ध्रुवः ।
परर्रद्वि परमस्पष्टः तुष्टः पुष्टः
शुभेक्षणः ।। 42 ।।

रामो विरामो विरजो मार्गो नेयो नयो-अनयः ।
वीरः शक्तिमतां श्रेष्ठ: धर्मो
धर्मविदुत्तमः ।। 43 ।।
वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।

Page 338 of 523

Page 339 of 523

हिरण्यगर्भः शत्रुघ्नो व्याप्तो
वायुरधोक्षजः ।। 44।।
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्व-दक्षिणः ।। 45 ।।

“शिवसहस्रनाम” —
ॐ श्रीगणेशाय नमः ।
पूर्वपीठिका
ॐकारनिलयं देवं गजवक्त्रं चतुर्भुजम् ।
पिचण्डिलमहं वन्दे सर्वविघ्नोपशान्तये ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनःपुनः ॥

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणं

Page 339 of 523

Page 340 of 523

वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनाम्पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं
शङ्करम् ॥

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥

ऋषय ऊचुः-
सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण ।
मुक्त्युपायं वदास्मभ्यं कृपालो मुनिसत्तम
॥ १॥

कः सेव्यः सर्वदेवेषु को वा जप्यो मनुः सदा
।
स्थातव्यं कुत्र वा नित्यं किं वा
सर्वार्थसाधकम् ॥ २॥

श्रीसूत उवाच-
धन्यान्मन्यामहे नूनमनन्यशरणान्मुनीन् ।
वन्याशिनो वनेवासान्
न्यस्तमानुष्यकल्मषान् ॥ ३॥

Page 340 of 523

Page 341 of 523

भवद्भिः सर्ववेदार्थतत्त्वं ज्ञातमतन्द्रितैः ।
भवद्भिः सर्ववेदार्थो ज्ञात एवास्ति
यद्यपि ॥ ४॥

तथापि किञ्चिद्वक्ष्यामि यथा ज्ञातं मया
तथा ।
पुरा कैलासशिखरे सुखासीनं जगत्प्रभुम् ॥ ५॥

वेदान्तवेद्यमीशानं शङ्करं लोकशङ्करम् ।
विलोक्यातीव सन्तुष्टः षण्मुखः
साम्बमीश्वरम् ॥ ६॥

मत्वा कृतार्थमात्मानं प्रणिपत्य सदाशिवम्
।
पप्रच्छ सर्वलोकानां मुक्त्युपायं
कृताञ्जलिः ॥ ७॥

श्रीस्कन्द उवाच-
विश्वेश्वर महादेव विष्णुब्रह्मादिवन्दित
।
देवानां मानवानां च किं मोक्षस्यास्ति
साधनम् ॥ ८॥

तव नामान्यनन्तानि सन्ति यद्यपि शङ्कर ।

Page 341 of 523

Page 342 of 523

तथापि तानि दिव्यानि न ज्ञायन्ते मयाधुना ॥
९॥

प्रियाणि शिवनामानि सर्वाणि शिव यद्यपि ।
तथापि कानि रम्याणि तेषु प्रियतमानि ते ॥

तानि सर्वार्थदान्यद्य कृपया वक्तुमर्हसि
॥ १०॥

श्रीसूत उवाच-
कुमारोदीरितां वाचं सर्वलोकहितावहाम् ।
श्रुत्वा प्रसन्नवदनस्तमुवाच सदाशिवः ॥
११॥

श्रीसदाशिव उवाच-
साधु साधु महाप्राज्ञ सम्यक्पृष्ठं
त्वयाधुना ।
यदिदानीं त्वया पृष्टं तद्वक्ष्ये शृणु
सादरम् ॥ १२॥

एवमेव पुरा गौर्या पृष्टः काश्यामहं तदा ।
समाख्यातं मया सम्यक्सर्वेषां मोक्षसाधनम्
॥ १३॥

Page 342 of 523

Page 343 of 523

दिव्यान्यनन्तनामानि सन्ति तन्मध्यगं परम्
।
अष्टोत्तरसहस्रं तु नाम्नां प्रियतरं मम ॥
१४॥

एकैकमेव तन्मध्ये नाम सर्वार्थसाधकम् ।
मयापि नाम्नां सर्वेषां फलं वक्तुं न
शक्यते ॥ १५॥

तिलाक्षतैर्बिल्वपत्रैः कमलैः
कोमलैर्नवैः ।
पूजयिष्यति मां भक्त्या
यस्त्वेतन्नामसङ्ख्यया ॥ १६॥

स पापेभ्यः संसृतेश्च मुच्यते नात्र संशयः
।
ततो ममान्तिकं याति पुनरावृत्तिदुर्लभम् ॥
१७॥

एकैकेनैव नाम्ना मां अर्चयित्वा दृढव्रताः ।
स्वेष्टं फलं प्राप्नुवन्ति सत्यमेवोच्यते
मया ॥ १८॥

एतन्नामावलीं यस्तु पठन्मां प्रणमेत्सदा ।

Page 343 of 523

Page 344 of 523

स याति मम सायुज्यं स्वेष्टं बन्धुसमन्वितः ॥ १९॥

स्पृष्ट्वा मल्लिङ्गममलं एतन्नामानि यः
पठेत् ।
स पातकेभ्यः सर्वेभ्यः सत्यमेव प्रमुच्यते
॥ २०॥

यस्त्वेतन्नामभिः सम्यक् त्रिकालं
वत्सरावधि ।
मामर्चयति निर्दम्भः स देवेन्द्रो
भविष्यति ॥ २१॥

एतन्नामानुसन्धाननिरतः सर्वदाऽमुना ।
मम प्रियकरस्तस्मान्निवसाम्यत्र सादरम् ॥
२२॥

तत्पूजया पूजितोऽहं स एवाहं मतो मम ।
तस्मात्प्रियतरं स्थानमन्यन्नैव हि
दृश्यते ॥ २३॥

हिरण्यबाहुरित्यादिनाम्नां शम्भुरहं ऋषिः
।
देवताप्यहमेवात्र शक्तिर्गौरी मम प्रिया ॥
२४॥

Page 344 of 523

Page 345 of 523

महेश एव संसेव्यः सर्वैरिति हि कीलकम् ।
धर्माद्यर्थाः फलं ज्ञेयं फलदायी सदाशिवः ॥
२५॥

ॐसौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥

॥ न्यासः ॥

ॐ अस्य
श्रीशिवसहस्रनामस्तोत्रमहामन्त्रस्य शम्भुरृषिः ।
अनुष्टुप् छन्दः । परमात्मा श्रीसदाशिवो देवता ।
महेश्वर इति बीजम् । गौरी शक्तिः ।
महेश एव संसेव्यः सर्वैरिति कीलकम् ।
श्रीसाम्बसदाशिव प्रीत्यर्थे मुख्यसहस्रनामजपे विनियोगः ।
॥ ध्यानम् ॥

शान्तं पद्मासनस्थं शशिधरमकुटं पञ्चवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम् ।

Page 345 of 523

Page 346 of 523

नागं पाशं च घण्टां वरडमरुयुतं चाङ्कुशं वामभागे
नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

ॐ नमो भगवते रुद्राय ।
ॐ हिरण्यबाहुः सेनानीर्दिक्पतिस्तरुराट्
हरः ।
हरिकेशः पशुपतिर्महान् सस्पिञ्जरो मृडः ॥
१॥

विव्याधी बभ्लुशः श्रेष्ठः परमात्मा
सनातनः ।
सर्वान्नराट् जगत्कर्ता पुष्टेशो
नन्दिकेश्वरः ॥ २॥

आततावी महारुद्रः संसारास्त्रः सुरेश्वरः
।
उपवीतिरहन्त्यात्मा क्षेत्रेशो वननायकः ॥
३॥

रोहितः स्थपतिः सूतो वाणिजो
मन्त्रिरुन्नतः ।
वृक्षेशो हुतभुग्देवो
भुवन्तिर्वारिवस्कृतः ॥ ४॥

Page 346 of 523

उच्चैर्घोषो घोररूपः पत्तीशः पाशमोचकः ।
ओषधीशः पञ्चवक्त्रः कृत्स्नवीतो भयानकः ॥
५॥

सहमानः स्वर्णरेताः निर्व्याधिर्निरुपप्लवः
।
आव्याधिनीशः ककुभो निषङ्गी स्तेनरक्षकः ॥
६॥

मन्त्रात्मा तस्कराध्यक्षो वञ्चकः
परिवञ्चकः ।
अरण्येशः परिचरो निचेरुः स्तायुरक्षकः ॥ ७॥

प्रकृन्तेशो गिरिचरः कुलुञ्चेशो गुहेष्टदः
।
भवः शर्वो नीलकण्ठः कपर्दी त्रिपुरान्तकः ॥
८॥

व्युप्तकेशो गिरिशयः सहस्राक्षः सहस्रपात्
।
शिपिविष्टश्चन्द्रमौलिर्ह्रस्वो
मीढुष्टमोऽनघः ॥ ९॥

वामनो व्यापकः शूली वर्षीयानजडोऽणुः ।

Page 348 of 523

ऊर्व्यः सूर्म्योऽग्रियः शीभ्यः प्रथमः
पावकाकृतिः ॥ १०॥

आचारस्तारकस्तारोऽवस्वन्योऽनन्तविग्रहः ।
द्वीप्यः स्रोतस्य ईशानो धुर्यो गव्ययनो
यमः ॥ ११॥

पूर्वजोऽपरजो ज्येष्ठः कनिष्ठो विश्वलोचनः
।
अपगल्भो मध्यमोर्म्यो जघन्यो बुध्नियः
प्रभुः ॥ १२॥

प्रतिसर्योऽनन्तरूपः सोभ्यो याम्यो
सुराश्रयः ।
खल्योर्वर्योऽभयः क्षेम्यः श्लोक्यः पथ्यो
नभोऽग्रणीः ॥ १३॥

वन्योऽवसान्यः पूतात्मा श्रवः कक्ष्यः
प्रतिश्रवः ।
आशुषेणो महासेनो महावीरो महारथः ॥ १४॥

शूरोऽतिघातको वर्मी वरूथी बिल्मिरुद्यतः ।
श्रुतसेनः श्रुतः साक्षी कवची वशकृद्वशी ॥
१५॥

Page 348 of 523

Page 349 of 523

आहनन्योऽनन्यनाथो दुन्दुभ्योऽरिष्टनाशकः ।
धृष्णुः प्रमृश इत्यात्मा वदान्यो वेदसम्मतः ॥ १६॥

तीक्ष्णेषुपाणिः प्रहितः स्वायुधः
शस्त्रवित्तमः ।
सुधन्वा सुप्रसन्नात्मा विश्ववक्त्रः
सदागतिः ॥ १७॥

स्रुत्यः पथ्यो विश्वबाहुः काट्यो नीप्यो
शुचिस्मितः ।
सूद्यः सरस्यो वैशन्तो नाद्यः कूप्यो
ऋषिर्मनुः ॥ १८॥

सर्वो वर्ष्यो वर्षरूपः कुमारः कुशलोऽमलः ।
मेघ्योऽवर्ष्योऽमोघशक्तिः
विद्युत्योऽमोघविक्रमः ॥ १९॥

दुरासदो दुराराध्यो निर्द्वन्द्वो
दुःसहर्षभः ।
ईध्रियः क्रोधशमनो जातुकर्णः पुरुष्टुतः ॥
२०॥

आतप्यो वायुरजरो वात्यः कात्यायनीप्रियः ।

Page 349 of 523

Page 350 of 523

वास्तव्यो वास्तुपो रेष्म्यो विश्वमूर्धा
वसुप्रदः ॥ २१॥

सोमस्ताम्रोऽरुणः शङ्गः रुद्रः सुखकरः
सुकृत् ।
उग्रोऽनुग्रो भीमकर्मा भीमो भीमपराक्रमः ॥
२२॥

अग्रेवधो हनीयात्मा हन्ता दूरेवधो वधः ।
शम्भुर्मयोभवो नित्यः शङ्करः कीर्तिसागरः
॥ २३॥

मयस्करः शिवतरः खण्डपर्शुरजः शुचिः ।
तीर्थ्यः कूल्योऽमृताधीशः
पार्योऽवार्योऽमृताकरः ॥ २४॥

शुद्धः प्रतरणो मुख्यः शुद्धपाणिरलोलुपः ।
उच्च
उत्तरणस्तार्यस्तार्यज्ञस्तार्यहृद्गतिः ॥ २५॥

आतार्यः सारभूतात्मा सारग्राही दुरत्ययः ।
आलाद्यो मोक्षदः पथ्योऽनर्थहा सत्यसङ्गरः
॥ २६॥

Page 350 of 523

Page 351 of 523

शष्प्यः फेन्यः प्रवाह्योढा सिकत्यः सैकताश्रयः ।
इरिण्यो ग्रामणीः पुण्यः शरण्यः
शुद्धशासनः ॥ २७॥

वरेण्यो यज्ञपुरुषो यज्ञेशो यज्ञनायकः ।
यज्ञकर्ता यज्ञभोक्ता यज्ञविघ्नविनाशकः ॥
२८॥

यज्ञकर्मफलाध्यक्षो यज्ञमूर्तिरनातुरः ।
प्रपथ्यः किंशिलो गेह्यो गृह्यस्तल्प्यो
धनाकरः ॥ २९॥

पुलस्त्यः क्षयणो गोष्ठ्यो गोविन्दो
गीतसत्क्रियः ।
हृदय्यो हृद्यकृत् हृद्यो गह्वरेष्ठः
प्रभाकरः ॥ ३०॥

निवेष्प्यो नियतोऽयन्ता पांसव्यः
सम्प्रतापनः ।
शुष्क्यो हरित्योऽपूतात्मा रजस्यः
सात्विकप्रियः ॥ ३१॥

लोप्योलप्यः पर्णशद्यः पर्ण्यः पूर्णः पुरातनः ।

Page 351 of 523

Page 352 of 523

भूतो भूतपतिर्भूपो भूधरो भूधरायुधः ॥ ३२॥

भूतसङ्घो भूतमूर्तिर्भूतहा भूतिभूषणः ।
मदनो मादको माद्यो मदहा मधुरप्रियः ॥ ३३॥

मधुर्मधुकरः क्रूरो मधुरो मदनान्तकः ।
निरञ्जनो निराधारो निर्लुप्तो निरुपाधिकः
॥ ३४॥

निष्प्रपञ्चो निराकारो निरीहो निरुपद्रवः
।
सत्त्वः सत्त्वगुणोपेतः सत्त्ववित्
सत्त्ववित्प्रियः ॥ ३५॥

सत्त्वनिष्ठः सत्त्वमूर्तिः सत्त्वेशः
सत्त्ववित्तमः ।
समस्तजगदाधारः समस्तगुणसागरः ॥ ३६॥

समस्तदुःखविध्वंसी समस्तानन्दकारणः ।
रुद्राक्षमालाभरणो रुद्राक्षप्रियवत्सलः
॥ ३७॥

रुद्राक्षवक्षा रुद्राक्षरूपो रुद्राक्षपक्षकः ।

Page 352 of 523

Page 353 of 523

विश्वेश्वरो वीरभद्रः सम्राट्
दक्षमखान्तकः ॥ ३८॥

विघ्नेश्वरो विघ्नकर्ता
गुरुर्देवशिखामणिः ।
भुजगेन्द्रलसत्कण्ठो भुजङ्गाभरणप्रियः ॥
३९॥

भुजङ्गविलसत्कर्णो भुजङ्गवलयावृतः ।
मुनिवन्द्यो मुनिश्रेष्ठो
मुनिवृन्दनिषेवितः ॥ ४०॥

मुनिहृत्पुण्डरीकस्थो मुनिसङ्घैकजीवनः ।
मुनिमृग्यो वेदमृग्यो मृगहस्तो मुनीश्वरः
॥ ४१॥

मृगेन्द्रचर्मवसनो नरसिंहनिपातनः ।
मृत्युञ्जयो मृत्युमृत्युरपमृत्युविनाशकः
॥ ४२॥

दुष्टमृत्युरदुष्टेष्टः मृत्युहा
मृत्युपूजितः ।
ऊर्ध्वो हिरण्यः परमो निधनेशो धनाधिपः ॥
४३॥

Page 353 of 523

Page 354 of 523

यजुर्मूर्तिः साममूर्तिः ऋङ्मूर्तिर्मूर्तिवर्जितः ।
व्यक्तो व्यक्ततमोऽव्यक्तो व्यक्ताव्यक्तस्तमो जवी ॥ ४४॥

लिङ्गमूर्तिरलिङ्गात्मा
लिङ्गालिङ्गात्मविग्रहः ।
ग्रहग्रहो ग्रहाधारो ग्रहाकारो ग्रहेश्वरः
॥ ४५॥

ग्रहकृद् ग्रहभिद् ग्राही ग्रहो
ग्रहविलक्षणः ।
कल्पाकारः कल्पकर्ता कल्पलक्षणतत्परः ॥
४६॥

कल्पो कल्पाकृतिः कल्पनाशकः कल्पकल्पकः ।
परमात्मा प्रधानात्मा प्रधानपुरुषः शिवः ॥
४७॥

वेद्यो वैद्यो वेदवेद्यो
वेदवेदान्तसंस्तुतः ।
वेदवक्त्रो वेदजिह्वो विजिह्वो जिह्मनाशकः
॥ ४८॥

कल्याणरूपः कल्याणः कल्याणगुणसंश्रयः ।

Page 354 of 523

Page 355 of 523

भक्तकल्याणदो भक्तकामधेनुः सुराधिपः ॥ ४९॥

पावनः पावको वामो महाकालो मदापहः ।
घोरपातकदावाग्निर्दवभस्मकणप्रियः ॥ ५०॥

अनन्तसोमसूर्याग्निमण्डलप्रतिमप्रभः ।
जगदेकप्रभुःस्वामी जगद्वन्द्यो जगन्मयः ॥
५१॥

जगदानन्ददो जन्मजरामरणवर्जितः ।
खट्वाङ्गी नीतिमान् सत्यो
देवतात्माऽऽत्मसम्भवः ॥ ५२॥

कपालमालाभरणः कपाली विष्णुवल्लभः ।
कमलासनकालाग्निः कमलासनपूजितः ॥ ५३॥

कालाधीशस्त्रिकालज्ञो दुष्टविग्रहवारकः ।
नाट्यकर्ता नटपरो महानाट्यविशारदः ॥ ५४॥

विराड्रूपधरो धीरो वीरो वृषभवाहनः ।
वृषाङ्को वृषभाधीशो वृषात्मा वृषभध्वजः ॥
५५॥

महोन्नतो महाकायो महावक्षा महाभुजः ।

Page 355 of 523

महास्कन्धो महाग्रीवो महावक्त्रो महाशिराः
॥ ५६॥

महाहनुर्महादंष्ट्रो महदोष्ठो महोदरः ।
सुन्दरभ्रूः सुनयनः सुललाटः सुकन्दरः ॥ ५७॥

सत्यवाक्यो धर्मवेत्ता सत्यज्ञः
सत्यवित्तमः ।
धर्मवान् धर्मनिपुणो धर्मो धर्मप्रवर्तकः
॥ ५८॥

कृतज्ञः कृतकृत्यात्मा कृतकृत्यः कृतागमः
।
कृत्यवित् कृत्यविच्छ्रेष्ठः
कृतज्ञप्रियकृत्तमः ॥ ५९॥

व्रतकृद् व्रतविच्छ्रेष्ठो व्रतविद्वान्
महाव्रती ।
व्रतप्रियो व्रताधारो व्रताकारो
व्रतेश्वरः ॥ ६०॥

अतिरागी वीतरागी रागहेतुर्विरागवित् ।
रागघ्नो रागशमनो रागदो रागिरागवित् ॥ ६१॥

विद्वान् विद्वत्तमो
विद्वज्जनमानससंश्रयः ।
विद्वज्जनाश्रयो विद्वज्जनस्तव्यपराक्रमः
॥ ६२॥

नीतिकृन्नीतिविन्नीतिप्रदाता
नीतिवित्प्रियः ।
विनीतवत्सलो नीतिस्वरूपो नीतिसंश्रयः ॥
६३॥

क्रोधवित् क्रोधकृत् क्रोधिजनकृत्
क्रोधरूपधृक् ।
सक्रोधः क्रोधहा क्रोधिजनहा क्रोधकारणः ॥
६४॥

गुणवान् गुणविच्छ्रेष्ठो निर्गुणो
गुणवित्प्रियः ।
गुणाधारो गुणाकारो गुणकृद् गुणनाशकः ॥ ६५॥

वीर्यवान् वीर्यविच्छ्रेष्ठो
वीर्यविद्वीर्यसंश्रयः ।
वीर्याकारो वीर्यकरो वीर्यहा वीर्यवर्धकः
॥ ६६॥

कालवित्कालकृत्कालो बलकृद् बलविद्बली ।

मनोन्मनो मनोरूपो बलप्रमथनो बलः ॥ ६७॥

विश्वप्रदाता विश्वेशो
विश्वमात्रैकसंश्रयः ।
विश्वकारो महाविश्वो विश्वविश्वो विशारदः
॥ ६८॥

Variation--
विद्याप्रदाता विद्येशो
विद्यामात्रैकसंश्रयः ।
विद्याकारो महाविद्यो विद्याविद्यो
विशारदः ॥६८॥

वसन्तकृद्वसन्तात्मा वसन्तेशो वसन्तदः ।
ग्रीष्मात्मा ग्रीष्मकृद् ग्रीष्मवर्धको
ग्रीष्मनाशकः ॥ ६९॥

प्रावृट्कृत् प्रावृडाकारः
प्रावृट्कालप्रवर्तकः ।
प्रावृट्प्रवर्धकः प्रावृण्णाथः
प्रावृड्विनाशकः ॥ ७०॥

शरदात्मा शरद्धेतुः शरत्कालप्रवर्तकः ।
शरन्नाथः शरत्कालनाशकः शरदाश्रयः ॥ ७१॥

Page 359 of 523

हिमस्वरूपो हिमदो हिमहा हिमनायकः ।
शैशिरात्मा शैशिरेशः शैशिरर्तुप्रवर्तकः ॥
७२॥

प्राच्यात्मा दक्षिणाकारः
प्रतीच्यात्मोत्तराकृतिः ।
आग्नेयात्मा निरृतीशो वायव्यात्मेशनायकः ॥
७३॥

ऊर्ध्वाधःसुदिगाकारो नानादेशैकनायकः ।
सर्वपक्षिमृगाकारः सर्वपक्षिमृगाधिपः ॥
७४॥

सर्वपक्षिमृगाधारो मृगाद्युत्पत्तिकारणः
।
जीवाध्यक्षो जीववन्द्यो जीवविज्जीवरक्षकः
॥ ७५॥

जीवकृज्जीवहा जीवजीवनो जीवसंश्रयः ।
ज्योतिःस्वरूपो विश्वात्मा विश्वनाथो
वियत्पतिः ॥ ७६॥

वज्रात्मा वज्रहस्तात्मा वज्रेशो
वज्रभूषितः ।
कुमारगुरुरीशानो गणाध्यक्षो गणाधिपः ॥ ७७॥

Page 359 of 523

Page 360 of 523

पिनाकपाणिः सूर्यात्मा
सोमसूर्याग्निलोचनः ।
अपायरहितः शान्तो दान्तो दमयिता दमः ॥ ७८॥

ऋषिः पुराणपुरुषः पुरुषेशः पुरन्दरः ।
कालाग्निरुद्रः सर्वेशः शमरूपः शमेश्वरः ॥
७९॥

प्रलयानलकृद् दिव्यः प्रलयानलनाशकः ।
त्रियम्बकोऽरिषड्वर्गनाशको धनदप्रियः ॥
८०॥

अक्षोभ्यः क्षोभरहितः क्षोभदः क्षोभनाशकः
।
सदम्भो दम्भरहितो दम्भदो दम्भनाशकः ॥ ८१॥

कुन्देन्दुशङ्खधवलो भस्मोद्धूलितविग्रहः
।
भस्मधारणहृष्टात्मा तुष्टिः
पुष्ट्यरिसूदनः ॥ ८२॥

स्थाणुर्दिगम्बरो भर्गो भगनेत्रभिदुद्यमः ।

Page 360 of 523

Page 361 of 523

त्रिकाग्निः कालकालाग्निरद्वितीयो
महायशाः ॥ ८३॥

सामप्रियः सामवेत्ता सामगः सामगप्रियः ।
धीरोदात्तो महाधीरो धैर्यदो धैर्यवर्धकः ॥
८४॥

लावण्यराशिः सर्वज्ञः
सुबुद्धिर्बुद्धिमान्वरः ।
तुम्बवीणः कम्बुकण्ठः शम्बरारिनिकृन्तनः ॥
८५॥

शार्दूलचर्मवसनः पूर्णानन्दो जगत्प्रियः ।
जयप्रदो जयाध्यक्षो जयात्मा जयकारणः ॥ ८६॥

जङ्गमाजङ्गमाकारो जगदुत्पत्तिकारणः ।
जगद्रक्षाकरो वश्यो जगत्प्रलयकारणः ॥ ८७॥

पूषदन्तभिदुत्कृष्टः पञ्चयज्ञः प्रभञ्जकः
।
अष्टमूर्तिर्विश्वमूर्तिरतिमूर्तिरमूर्ति
मान् ॥ ८८॥

कैलासशिखरावासः कैलासशिखरप्रियः ।

Page 361 of 523

Page 362 of 523

भक्तकैलासदः सूक्ष्मो मर्मज्ञः
सर्वशिक्षकः ॥ ८९॥

सोमः सोमकलाकारो महातेजा महातपाः ।
हिरण्यश्मश्रुरानन्दः स्वर्णकेशः
सुवर्णदृक् ॥ ९०॥

ब्रह्मा विश्वसृगुर्वीशो मोचको
बन्धवर्जितः ।
स्वतन्त्रः सर्वमन्त्रात्मा
द्युतिमानमितप्रभः ॥ ९१॥

पुष्कराक्षः पुण्यकीर्तिः
पुण्यश्रवणकीर्तनः ।
पुण्यमूर्तिः पुण्यदाता
पुण्यापुण्यफलप्रदः ॥ ९२॥

सारभूतः स्वरमयो रसभूतो रसाश्रयः ।
ॐकारः प्रणवो नादो प्रणतार्तिप्रभञ्जनः ॥
९३॥

निकटस्थोऽतिदूरस्थो वशी ब्रह्माण्डनायकः ।
मन्दारमूलनिलयो मन्दारकुसुमावृतः ॥ ९४॥

वृन्दारकप्रियतमो वृन्दारकवरार्चितः ।

Page 362 of 523

Page 363 of 523

श्रीमाननन्तकल्याणपरिपूर्णो महोदयः ॥ ९५॥

महोत्साहो विश्वभोक्ता विश्वाशापरिपूरकः ।
सुलभोऽसुलभो लभ्योऽलभ्यो लाभप्रवर्धकः ॥
९६॥

लाभात्मा लाभदो वक्ता द्युतिमाननसूयकः ।
ब्रह्मचारी दृढाचारी देवसिंहो धनप्रियः ॥
९७॥

वेदपो देवदेवेशो देवदेवोत्तमोत्तमः ।
बीजराजो बीजहेतुर्बीजदो बीजवृद्धिदः ॥ ९८॥

बीजाधारो बीजरूपो निर्बीजो बीजनाशकः ।
परापरेशो वरदः पिङ्गलोऽयुग्मलोचनः ॥ ९९॥

पिङ्गलाक्षः सुरगुरुः गुरुः सुरगुरुप्रियः
।
युगावहो युगाधीशो युगकृद्युगनाशकः ॥ १००॥

कर्पूरगौरो गौरीशो गौरीगुरुगुहाश्रयः ।
धूर्जटिः पिङ्गलजटो जटामण्डलमण्डितः ॥
१०१॥

मनोजवो जीवहेतुरन्धकासुरसूदनः ।

Page 363 of 523

Page 364 of 523

लोकबन्धुः कलाधारः पाण्डुरः प्रमथाधिपः ॥
१०२॥

अव्यक्तलक्षणो योगी योगीशो योगपुङ्गवः ।
श्रितावासो जनावासः सुरवासः सुमण्डलः ॥
१०३॥

भववैद्यो योगिवैद्यो योगिसिंहहृदासनः ।
उत्तमोऽनुत्तमोऽशक्तः कालकण्ठो विषादनः ॥
१०४॥

आशास्यः कमनीयात्मा शुभः सुन्दरविग्रहः ।
भक्तकल्पतरुः स्तोता स्तव्यः
स्तोत्रवरप्रियः ॥ १०५॥

अप्रमेयगुणाधारो वेदकृद्वेदविग्रहः ।
कीर्त्याधारः कीर्तिकरः
कीर्तिहेतुरहेतुकः ॥ १०६॥

अप्रधृष्यः शान्तभद्रः कीर्तिस्तम्भो
मनोमयः ।
भूशयोऽन्नमयोऽभोक्ता महेष्वासो महीतनुः ॥
१०७॥

विज्ञानमय आनन्दमयः प्राणमयोऽन्नदः ।

Page 364 of 523

Page 365 of 523

सर्वलोकमयो यष्टा धर्माधर्मप्रवर्तकः ॥
१०८॥

अनिर्विण्णो गुणग्राही सर्वधर्मफलप्रदः ।
दयासुधार्द्रनयनो निराशीरपरिग्रहः ॥ १०९॥

परार्थवृत्तिर्मधुरो मधुरप्रियदर्शनः ।
मुक्तादामपरीताङ्गो निःसङ्गो मङ्गलाकरः ॥
११०॥

सुखप्रदः सुखाकारः सुखदुःखविवर्जितः ।
विशृङ्खलो जगत्कर्ता जितसर्वः पितामहः ॥
१११॥

अनपायोऽक्षयो मुण्डी सुरूपो रूपवर्जितः ।
अतीन्द्रियो महामायो मायावी विगतज्वरः ॥
११२॥

अमृतः शाश्वतः शान्तो मृत्युहा मूकनाशनः ।
महाप्रेतासनासीनः पिशाचानुचरावृतः ॥ ११३॥

गौरीविलाससदनो नानागानविशारदः ।
विचित्रमाल्यवसनो दिव्यचन्दनचर्चितः ॥
११४॥

Page 365 of 523

Page 366 of 523

विष्णुब्रह्मादिवन्द्याङ्घ्रिः
सुरासुरनमस्कृतः ।
किरीटलेढिफालेन्दुर्मणिकङ्कणभूषितः ॥
११५॥

रत्नाङ्गदाङ्गो रत्नेशो रत्नरञ्जितपादुकः
।
नवरत्नगणोपेतकिरीटी रत्नकञ्चुकः ॥ ११६॥

नानाविधानेकरत्नलसत्कुण्डलमण्डितः ।
दिव्यरत्नगणाकीर्णकण्ठाभरणभूषितः ॥ ११७॥

गलव्यालमणिर्नासापुटभ्राजितमौक्तिकः ।
रत्नाङ्गुलीयविलसत्करशाखानखप्रभः ॥ ११८॥

रत्नभ्राजद्धेमसूत्रलसत्कटितटः पटुः ।
वामाङ्कभागविलसत्पार्वतीवीक्षणप्रियः ॥
११९॥

लीलावलम्बितवपुर्भक्तमानसमन्दिरः ।
मन्दमन्दारपुष्पौघलसद्वायुनिषेवितः ॥
१२०॥

कस्तूरीविलसत्फालो दिव्यवेषविराजितः ।
दिव्यदेहप्रभाकूटसन्दीपितदिगन्तरः ॥ १२१॥

Page 366 of 523

Page 367 of 523

देवासुरगुरुस्तव्यो देवासुरनमस्कृतः ।
हस्तराजत्पुण्डरीकः पुण्डरीकनिभेक्षणः ॥
१२२॥

सर्वाशास्यगुणोऽमेयः सर्वलोकेष्टभूषणः ।
सर्वेष्टदाता सर्वेष्टः
स्फुरन्मङ्गलविग्रहः ॥ १२३॥

अविद्यालेशरहितो नानाविद्यैकसंश्रयः ।
मूर्तिभवः कृपापूरो भक्तेष्टफलपूरकः ॥
१२४॥

सम्पूर्णकामः सौभाग्यनिधिः सौभाग्यदायकः ।
हितैषी हितकृत्सौम्यः परार्थैकप्रयोजनः ॥
१२५॥

शरणागतदीनार्तपरित्राणपरायणः ।
जिष्णुर्नेता वषट्कारो भ्राजिष्णुर्भोजनं
हविः ॥ १२६॥

भोक्ता भोजयिता जेता जितारिर्जितमानसः ।
अक्षरः कारणं क्रुद्धसमरः शारदप्लवः ॥ १२७॥

Page 367 of 523

Page 368 of 523

आज्ञापकेच्छो गम्भीरः कविर्दुःस्वप्ननाशकः ।
पञ्चब्रह्मसमुत्पत्तिः क्षेत्रज्ञः
क्षेत्रपालकः ॥ १२८॥

व्योमकेशो भीमवेषो गौरीपतिरनामयः ।
भवाब्धितरणोपायो भगवान् भक्तवत्सलः ॥ १२९॥

वरो वरिष्ठो नेदिष्ठः प्रियः प्रियदवः
सुधीः ।
यन्ता यविष्ठः क्षोदिष्ठो स्थविष्ठो
यमशासकः ॥ १३०॥

हिरण्यगर्भो हेमाङ्गो हेमरूपो हिरण्यदः ।
ब्रह्मज्योतिरनावेक्ष्यश्चामुण्डाजनको
रविः ॥ १३१॥

मोक्षार्थिजनसंसेव्यो मोक्षदो मोक्षनायकः
।
महाश्मशाननिलयो वेदाश्वो भूरथः स्थिरः ॥
१३२॥

मृगव्याधो चर्मधामा प्रच्छन्नः स्फटिकप्रभः ।

Page 368 of 523

Page 369 of 523

सर्वज्ञः परमार्थात्मा ब्रह्मानन्दाश्रयो
विभुः ॥ १३३॥

महेश्वरो महादेवः परब्रह्म सदाशिवः ॥ १३४॥

श्रीपरब्रह्म सदाशिव ॐ नम इति ।
उत्तर पीठिका
एवमेतानि नामानि मुख्यानि मम षण्मुख ।
शुभदानि विचित्राणि गौर्यै प्रोक्तानि
सादरम् ॥ १॥

विभूतिभूषितवपुः शुद्धो रुद्राक्षभूषणः ।
शिवलिङ्गसमीपस्थो निस्सङ्गो निर्जितासनः ॥
२॥

एकाग्रचित्तो नियतो वशी भूतहिते रतः ।
शिवलिङ्गार्चको नित्यं शिवैकशरणः सदा ॥ ३॥

मम नामानि दिव्यानि यो जपेद्भक्तिपूर्वकम्
।
एवमुक्तगुणोपेतः स देवैः पूजितो भवेत् ॥ ४॥

संसारपाशसंबद्धजनमोक्षैकसाधनम् ।
मन्नामस्मरणं नूनं तदेव सकलार्थदम् ॥ ५॥

Page 369 of 523

Page 370 of 523

मन्नामैव परं जप्यमहमेवाक्षयार्थदः ।
अहमेव सदा सेव्यो ध्येयो
मुक्त्यर्थमादरात् ॥ ६॥

विभूतिवज्रकवचैः मन्नामशरपाणिभिः ।
विजयः सर्वतो लभ्यो न तेषां दृश्यते भयम् ॥
७॥

न तेषां दृश्यते भयम् ॐ नम इति ।
श्रीसूत उवाच-
इत्युदीरितमाकर्ण्य महादेवेन तद्वचः ।
सन्तुष्टः षण्मुखः शम्भुं तुष्टाव
गिरिजासुतः ॥ ८॥

श्रीस्कन्द उवाच-
नमस्ते नमस्ते महादेव शम्भो
नमस्ते नमस्ते प्रपन्नैकबन्धो ।
नमस्ते नमस्ते दयासारसिन्धो
नमस्ते नमस्ते नमस्ते महेश ॥ ९॥

नमस्ते नमस्ते महामृत्युहारिन्
नमस्ते नमस्ते महादुःखहारिन् ।
नमस्ते नमस्ते महापापहारिन्
नमस्ते नमस्ते नमस्ते महेश ॥ १०॥

Page 370 of 523

Page 371 of 523

नमस्ते नमस्ते सदा चन्द्रमौले नमस्ते नमस्ते सदा शूलपाणे । नमस्ते नमस्ते सदोमैकजाने नमस्ते नमस्ते नमस्ते महेश ॥ ११॥

वेदान्तवेद्याय महादयाय
कैलासवासाय शिवाधवाय ।
शिवस्वरूपाय सदाशिवाय
शिवासमेताय नमःशिवाय ॥ १२॥

ॐ नमःशिवाय इति
श्रीसूत उवाच-
इति स्तुत्वा महादेवं सर्वव्यापिनमीश्वरम्
।
पुनःप्रणम्याथ ततः स्कन्दस्तस्थौ
कृताञ्जलिः ॥ १३॥

भवन्तोऽपि मुनिश्रेष्ठाः
साम्बध्यानपरायणाः ।
शिवनामजपं कृत्वा तिष्ठन्तु सुखिनः सदा ॥
१४॥

शिव एव सदा ध्येयः सर्वदेवोत्तमः प्रभुः ।
शिव एव सदा पूज्यो मुक्तिकामैर्न संशयः ॥
१५॥

Page 371 of 523

Page 372 of 523

महेशान्नाधिको देवः स एव सुरसत्तमः ।
स एव सर्ववेदान्तवेद्यो नात्रास्ति संशयः ॥
१६॥

जन्मान्तरसहस्रेषु यदि तप्तं तपस्तदा ।
तस्य श्रद्धा महादेवे भक्तिश्च भवति
ध्रुवम् ॥ १७॥

सुभगा जननी तस्य तस्यैव कुलमुन्नतम् ।
तस्यैव जन्म सफलं यस्य भक्तिः सदाशिवे ॥ १८॥

ये शम्भुं सुरसत्तमं सुरगणैराराध्यमीशं शिवं
शैलाधीशसुतासमेतममलं सम्पूजयन्त्यादरात् ।
ते धन्याः शिवपादपूजनपराः ह्यन्यो न धन्यो जनः
सत्यं सत्यमिहोच्यते मुनिवराः सत्यं पुनः
सर्वथा ॥ १९॥

सत्यं पुनः सर्वथा ॐ नम इति ।
नमः शिवाय साम्बाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तहेतवे ॥
२०॥

Page 372 of 523

Page 373 of 523

नमस्ते गिरिजानाथ भक्तानामिष्टदायक ।
देहि भक्तिं त्वयीशान सर्वाभीष्टं च देहि
मे ॥ २१॥

साम्ब शम्भो महादेव दयासागर शङ्कर ।
मच्चित्तभ्रमरो नित्यं तवास्तु पदपङ्कजे ॥
२२॥

सर्वार्थ शर्व सर्वेश सर्वोत्तम महेश्वर ।
तव नामामृतं दिव्यं जिह्वाग्रे मम तिष्ठतु ॥ २३॥

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्
भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥
२४॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत् क्षमस्व
जयजय करुणाब्धे श्रीमहादेव शम्भो ॥ २५॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।

Page 373 of 523

Page 374 of 523

करोमि यद्यत् सकलं परस्मै
सदाशिवायेति समर्पयामि ॥ २६॥

॥ ॐ तत्सत् इति
श्रीमुख्यशिवसहस्रनामस्तोत्रं सम्पूर्णम्
॥

॥ श्रीशिवसहस्रनामस्तोत्रम् ॥
महाभारतान्तर्गतम्
(अथ सहस्रनामस्तोत्रम् ।)

स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो
वरः । var प्रभुर्भानुः
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः
॥ ३१॥

जटी चर्मी शिखी खड्गी सर्वाङ्गः सर्वभावनः
। var शिखण्डी च
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥ ३२॥

प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो
ध्रुवः ।
श्मशानवासी भगवान्खचरो गोचरोऽर्दनः ॥ ३३॥

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।

Page 374 of 523

Page 375 of 523

उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ॥
३४॥

महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ॥
३५॥

लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः
।
पवित्रं च महांश्चैव नियमो नियमाश्रितः ॥
३६॥

सर्वकर्मा स्वयम्भूत आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः
॥ ३७॥

चन्द्रः सूर्यः शनिः केतुर्ग्रहो
ग्रहपतिर्वरः ।
अत्रिरत्र्यानमस्कर्ता मृगबाणार्पणोऽनघः
॥ ३८॥

महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ ३९॥

Page 375 of 523

Page 376 of 523

योगी योज्यो महाबीजो महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः ॥
४०॥

दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयंश्रेष्ठो बलवीरो बलो गणः ॥
४१॥
var बलवीरोऽबलो

गणकर्ता गणपतिर्दिग्वासाः काम एव च ।
मन्त्रवित्परमो मन्त्रः सर्वभावकरो हरः ॥
४२॥

कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान् ॥
४३॥

स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः
।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ॥
४४॥

दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
शृगालरूपः सिद्धार्थो मुण्डः सर्वशुभङ्करः
॥ ४५॥

Page 376 of 523

Page 377 of 523

अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिङ्ग ऊर्ध्वशायी
नभःस्थलः ॥ ४६॥

त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः
।
अहश्चरो नक्तञ्चरस्तिग्ममन्युः सुवर्चसः ॥
४७॥

गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः
॥ ४८॥

कालयोगी महानादः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ ४९॥

बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः
॥ ५०॥
घोरो महातपाः पाशो नित्यो गिरिरुहो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यतन्द्रितः ॥
५१॥

अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः ।

Page 377 of 523

Page 378 of 523

दक्षयागापहारी च सुसहो मध्यमस्तथा ॥ ५२॥

तेजोपहारी बलहा मुदितोऽर्थोऽजितोऽवरः ।
var ऽजितो वरः
गम्भीरघोषा गम्भीरो गम्भीरबलवाहनः ॥ ५३॥

न्यग्रोधरूपो न्यग्रोधो
वृक्षपर्णस्थितिर्विभुः । var वृक्षकर्ण
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥ ५४॥

विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित्
॥ ५५॥

विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥
५६॥

उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च ॥
५७॥

शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्धगो
बली ।
वेणवी पणवी ताली खली कालकटङ्कटः ॥ ५८॥

Page 378 of 523

Page 379 of 523

नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयो गमः । var लयोऽगमः
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोमुखः ॥ ५९॥ var सर्वगोऽमुखः

विमोचनः सुसरणो हिरण्यकवचोद्भवः ॥ var
सुशरणो
मेढ्रजो बलचारी च महीचारी स्रुतस्तथा ॥ ६०॥

सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः ।
व्यालरूपो गुहावासी गुहो माली तरङ्गवित् ॥
६१॥

त्रिदशस्त्रिकालधृक्कर्मसर्वबन्धविमोचनः
।
बन्धनस्त्वसुरेन्द्राणां युधि
शत्रुविनाशनः ॥ ६२॥

साङ्ख्यप्रसादो दुर्वासाः
सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञो अतुल्यो
यज्ञभागवित् ॥ ६३॥

सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः ।

Page 379 of 523

Page 380 of 523

हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ॥ ६४॥

लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
सङ्ग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥
६५॥

मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः
। var मुख्यो मुख्यश्च
सर्वकासप्रसादश्च सुबलो बलरूपधृत् ॥ ६६॥

सर्वकामवरश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिर्विरूपश्च निपाती ह्यवशः खगः ॥ ६७॥

रौद्ररूपोंऽशुरादित्यो बहुरश्मिः
सुवर्चसी ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥ ६८॥

सर्ववासी श्रियावासी उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः सम्भग्नश्च सहस्रदः ॥
६९॥

पक्षी च पक्षरूपश्च अतिदीप्तो विशाम्पतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ॥
७०॥

Page 380 of 523

Page 381 of 523

वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः
सिद्धसाधकः ॥ ७१॥

भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः
।
महासेनो विशाखश्च षष्टिभागो गवाम्पतिः ॥
७२॥

वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः ॥ ७३॥

वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ॥
७४॥

ईशान ईश्वरः कालो निशाचारी पिनाकवान् ।
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो
हरिः ॥ ७५॥

नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्धनः ।
भगहारी निहन्ता च कालो ब्रह्मा पितामहः ॥
७६॥

चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ।

Page 381 of 523

Page 382 of 523

लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो
युगावहः ॥ ७७॥

बीजाध्यक्षो बीजकर्ता अव्यात्माऽनुगतो बलः
।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ॥ ७८॥

दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ॥ ७९॥

अक्षरं परमं ब्रह्म बलवच्छक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो
गतागतः ॥ ८०॥

बहुप्रसादः सुस्वप्नो दर्पणोऽथ
त्वमित्रजित् ।
वेदकारो मन्त्रकारो विद्वान्समरमर्दनः ॥
८१॥

महामेघनिवासी च महाघोरो वशीकरः ।
अग्निर्ज्वालो महाज्वालो अतिधूम्रो हुतो
हविः ॥ ८२॥

वृषणः शङ्करो नित्यं वर्चस्वी धूमकेतनः ।
var नित्यवर्चस्वी

Page 382 of 523

Page 383 of 523

नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ॥
८३॥

स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः
।
उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः ॥ ८४॥

कृष्णवर्णः सुवर्णश्च इन्द्रियं
सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ॥ ८५॥

महामूर्धा महामात्रो महानेत्रो निशालयः ।
महान्तको महाकर्णो महोष्ठश्च महाहनुः ॥ ८६॥

महानासो महाकम्बुर्महाग्रीवः श्मशानभाक् ।
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ॥
८७॥

लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥
८८॥

महानखो महारोमा महाकेशो महाजटः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः
॥ ८९॥

Page 383 of 523

Page 384 of 523

स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥ ९०॥

गण्डली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥
९१॥

यजुःपादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥
९२॥

उपकारः प्रियः सर्वः कनकः काञ्चनच्छविः ।
नाभिर्नन्दिकरो भावः पुष्करस्थपतिः स्थिरः
॥ ९३॥

द्वादशस्त्रासनश्चाद्यो यज्ञो
यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥ ९४॥

सगणो गणकारश्च भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥
९५॥

Page 384 of 523

Page 385 of 523

लोकपालस्तथा लोको महात्मा सर्वपूजितः । var लोकपालस्तथाऽलोको
शुक्लस्त्रिशुक्लः सम्पन्नः शुचिर्भूतनिषेवितः ॥ ९६॥

आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः
।
विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः
सुनिश्चलः ॥ ९७॥

कपिलः कपिशः शुक्ल आयुश्चैवि परोऽपरः ।
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः
सुशारदः ॥ ९८॥

परश्वधायुधो देव अनुकारी सुबान्धवः ।
तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः ॥
९९॥

उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ।
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः ॥
१००॥

बन्धनो बन्धकर्ता च सुबन्धनविमोचनः ।
स यज्ञारिः स कामारिर्महादंष्ट्रो महायुधः
॥ १०१॥

Page 385 of 523

Page 386 of 523

बहुधानिन्दितः शर्वः शङ्करः शङ्करोऽधनः ।
var शङ्करोऽनघः
अमरेशो महादेवो विश्वदेवः सुरारिहा ॥ १०२॥

अहिर्बुध्न्योऽनिलाभश्च चेकितानो
हविस्तथा ।
अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः ॥
१०३॥

धन्वन्तरिर्धूमकेतुः स्कन्दो
वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥ १०४॥

प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
var सर्वगोवायुरर्यमा
उषङ्गुश्च विधाता च मान्धाता भूतभावनः ॥
१०५॥

विभुर्वर्णविभावी च सर्वकामगुणावहः ।
पद्मनाभो
महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥ १०६॥

बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ।

Page 386 of 523

Page 387 of 523

कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ॥
१०७॥

सर्वाशयो दर्भचारी सर्वेषां प्राणिनां
पतिः ।
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित् ॥
१०८॥

कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥
१०९॥

वणिजो वर्धकी वृक्षो बकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः ॥ ११०॥

सिद्धार्थकारी
सिद्धार्थश्छन्दोव्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥
१११॥

प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः ।
सारङ्गो नवचक्राङ्गः केतुमाली सभावनः ॥
११२॥

भूतालयो भूतपतिरहोरात्रमनिन्दितः ॥ ११३॥

Page 387 of 523

Page 388 of 523

वाहिता सर्वभूतानां निलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ॥
११४॥ var प्राणधारकः धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधिपः
।
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः।
११५॥

हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो जितकामो
जितेन्द्रियः ॥ ११६॥

गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः ।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः ॥
११७॥

महाकेतुर्महाधातुर्नैकसानुचरश्चलः ।
आवेदनीय आदेशः सर्वगन्धसुखावहः ॥ ११८॥

तोरणस्तारणो वातः परिधी पतिखेचरः ।
संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिकः ॥
११९॥

नित्य आत्मसहायश्च देवासुरपतिः पतिः ।

Page 388 of 523

Page 389 of 523

युक्तश्च युक्तबाहुश्च देवो दिवि सुपर्वणः
॥ १२०॥

आषाढश्च सुषाण्ढश्च ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ॥
१२१॥

शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च सर्वयोगी महाबलः ॥ १२२॥

समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मन्त्रः शुभाक्षो
बहुकर्कशः ॥ १२३॥

रत्नप्रभूतो रत्नाङ्गो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो
व्यक्ताव्यक्तस्तपोनिधिः ॥ १२४॥

आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥
१२५॥

युगरूपो महारूपो महानागहनो वधः ।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः ॥
१२६॥

Page 389 of 523

बहुमालो महामालः शशी हरसुलोचनः ।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ॥
१२७॥

त्रिलोचनो विषण्णाङ्गो मणिविद्धो जटाधरः ।
बिन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः
॥ १२८॥

निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम् ॥
१२९॥

मन्थानो बहुलो वायुः सकलः सर्वलोचनः ।
तलस्तालः करस्थाली ऊर्ध्वसंहननो महान् ॥
१३०॥

छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः
क्रमः ।
मुण्डो विरूपो विकृतो दण्डी कुण्डी
विकुर्वणः। १३१॥

हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः
॥ १३२॥

Page 391 of 523

सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः। १३३॥

ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान्
।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः
॥ १३४॥

गभस्तिर्ब्रह्मकृद्ब्रह्मी
ब्रह्मविद्ब्राह्मणो गतिः ।
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयम्भुवः
॥ १३५॥

ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥
१३६॥

कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत् ।
उमापतिरुमाकान्तो जाह्नवीधृगुमाधवः ॥ १३७॥

वरो वराहो वरदो वरेण्यः सुमहास्वनः ।

Page 391 of 523

महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥
१३८॥

पीतात्मा परमात्मा च प्रयतात्मा
प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो
वरः ॥ १३९॥

चराचरात्मा सूक्ष्मात्मा अमृतो
गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो
विवस्वान्सविताऽमृतः १४०॥

व्यासः सर्गः सुसङ्क्षेपो विस्तरः पर्ययो
नरः ।
ऋतु संवत्सरो मासः पक्षः सङ्ख्यासमापनः ॥
१४१॥

कला काष्ठा लवा मात्रा मुहूर्ताहःक्षपाः
क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्तु
निर्गमः ॥ १४२॥

सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ।

Page 393 of 523

स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं
त्रिविष्टपम् ॥ १४३॥

निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः
।
देवासुरविनिर्माता देवासुरपरायणः ॥ १४४॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुगणाश्रयः ॥ १४५॥

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ॥
१४६॥

देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो
देवतात्माऽऽत्मसम्भवः ॥ १४७॥

उद्भित्त्रिविक्रमो वैद्यो विरजो
नीरजोऽमरः ॥

ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो
नरर्षभः ॥ १४८॥

विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।

Page 393 of 523

Page 394 of 523

सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः ॥ १४९॥

गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः
।
शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः
॥ १५०॥

अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥
१५१॥

स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः
सत्यव्रतः शुचिः ॥ १५२॥

व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः ।
विमुक्तो मुक्ततेजाश्च
श्रीमान्श्रीवर्धनो जगत् ॥ १५३॥

(इति सहस्रनामस्तोत्रम् ।)

अथ लिङ्गपुराणान्तर्गत-श्रीशिवसहस्रनामस्तोत्रमन्त्रैः

Page 394 of 523

Page 395 of 523

अभिषेकः ।
ॐ ।
ऋषय ऊचुः -
कथं देवेन वै सूत देवदेवान्महेश्वरात् ।
सुदर्शनाख्यं वै लब्धं वक्तुमर्हसि
विष्णुना ॥ १॥

सूत उवाच -
देवानामसुरेन्द्राणामभवच्च सुदारुणः ।
सर्वेषामेव भूतानां विनाशकरणो महान् ॥ २॥

ते देवाः शक्तिमुशलैः सायकैर्नतपर्वभिः ।
प्रभिद्यमानाः कुन्तैश्च
दुद्रुवुर्भयविह्वलाः ॥ ३॥

पराजितास्तदा देवा देवदेवेश्वरं हरिम् ।
प्रणेमुस्तं सुरेशानं शोकसंविग्नमानसाः ॥
४॥

तान् समीक्ष्याथ भगवान्देवदेवेश्वरो हरिः
।
प्रणिपत्य स्थितान्देवानिदं वचनमब्रवीत् ॥
५॥

Page 395 of 523

Page 396 of 523

वत्साः किमिति वै देवाश्च्युतालङ्कारविक्रमाः ।
समागताः ससंतापा वक्तुमर्हथ सुव्रताः ॥ ६॥

तस्य तद्वचनं श्रुत्वा तथाभूताः
सुरोत्तमाः ।
प्रणम्याहुर्यथावृत्तं देवदेवाय विष्णवे ॥
७॥

भगवन्देवदेवेश विष्णो जिष्णो जनार्दन ।
दानवैः पीडिताः सर्वे वयं शरणमागताः ॥ ८॥

त्वमेव देवदेवेश गतिर्नः पुरुषोत्तम ।
त्वमेव परमात्मा हि त्वं पिता जगतामपि ॥ ९॥

त्वमेव भर्ता हर्ता च भोक्ता दाता जनार्दन ।
हन्तुमर्हसि तस्मात्त्वं
दानवान्दानवार्दन ॥ १०॥

दैत्याश्च वैष्णवैर्ब्राह्मै
रौद्रैर्याम्यैः सुदारुणैः ।
कौबेरैश्चैव सौम्यैश्च
नैरृत्यैर्वारुणैर्दृढैः ॥ ११॥

Page 396 of 523

Page 397 of 523

वायव्यैश्च तथाग्नेयैरैशानैर्वार्षिकैः शुभैः ।
सौरै रौद्रैस्तथा भीमैः
कम्पनैर्जृम्भणैर्दृढैः ॥ १२॥

अवध्या वरलाभात्ते सर्वे वारिजलोचन ।
सूर्यमण्डलसम्भूतं त्वदीयं चक्रमुद्यतम् ॥
१३॥

कुण्ठितं हि दधीचेन च्यावनेन जगद्गुरो ।
दण्डं शार्ङ्गं तवास्त्रं च लब्धं दैत्यैः
प्रसादतः ॥१४॥

पुरा जलन्धरं हन्तुं निर्मितं
त्रिपुरारिणा ।
रथाङ्गं सुशितं घोरं तेन तान् हन्तुमर्हसि
॥ १५॥

तस्मात्तेन निहन्तव्या नान्यैः
शस्त्रशतैरपि ।
ततो निशम्य तेषां वै वचनं वारिजेक्षणः ॥ १६॥

वाचस्पतिमुखानाह स हरिश्चक्रभृत्स्वयम् ।
श्रीविष्णुरुवाच -

Page 397 of 523

Page 398 of 523

भोभो देवा महादेवं सर्वैर्देवैः सनातनैः ॥
१७॥

सम्प्राप्य साम्प्रतं सर्वं करिष्यामि
दिवौकसाम् ।
देवा जलंधरं हन्तुं निर्मितं हि पुरारिणा ॥
१८॥

लब्ध्वा रथाङ्गं तेनैव निहत्य च महासुरान्
।
सर्वान्धुन्धुमुखान्दैत्यानष्टषष्टिशतान्
सुरान् ॥ १९॥

सबान्धवान्क्षणादेव युष्मान् संतारयाम्यहम् ।
सूत उवाच -
एवमुक्त्वा सुरश्रेष्ठान्
सुरश्रेष्ठमनुस्मरन् ॥ २०॥

सुरश्रेष्ठस्तदा श्रेष्ठं पूजयामास
शङ्करम् ।
लिङ्गं स्थाप्य यथान्यायं हिमवच्छिखरे
शुभे ॥ २१॥

मेरुपर्वतसंकाशं निर्मितं विश्वकर्मणा ।

Page 398 of 523

Page 399 of 523

त्वरिताख्येन रुद्रेण रौद्रेण च जनार्दनः ॥
२२॥

स्नाप्य सम्पूज्य गन्धाद्यैर्ज्वालाकारं
मनोरमम् ।
तुष्टाव च तदा रुद्रं सम्पूज्याग्नौ
प्रणम्य च ॥ २३॥

देवं नाम्नां सहस्रेण भवाद्येन यथाक्रमम् ।
पूजयामास च शिवं प्रणवाद्यं नमोन्तकम् ॥
२४॥

देवं नाम्नां सहस्रेण भवाद्येन महेश्वरम् ।
प्रतिनाम सपद्मेन पूजयामास शङ्करम् ॥ २५॥

अग्नौ च नामभिर्देवं भवाद्यैः समिदादिभिः ।
स्वाहान्तैर्विधिवद्धुत्वा प्रत्येकमयुतं प्रभुम् ॥ २६॥

तुष्टाव च पुनः शम्भुं
भवाद्यैर्भवमीश्वरम् ।
श्री विष्णुरुवाच -
भवः शिवो हरो रुद्रः पुरुषः पद्मलोचनः ॥ २७॥

अर्थितव्यः सदाचारः सर्वशम्भुर्महेश्वरः ।

Page 399 of 523

ईश्वरः स्थाणुरीशानः सहस्राक्षः सहस्रपात्
॥ २८॥

वरीयान् वरदो वन्द्यः शङ्करः परमेश्वरः ।
गङ्गाधरः शूलधरः परार्थैकप्रयोजनः ॥ २९॥

सर्वज्ञः सर्वदेवादिगिरिधन्वा जटाधरः ।
चन्द्रापीडश्चन्द्रमौलिर्विद्वान्विश्वाम
रेश्वरः ॥ ३०॥

वेदान्तसारसन्दोहः कपाली नीललोहितः ।
ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता
गणेश्वरः ॥ ३१॥

अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः
स्वर्गसाधनः ।
ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः
॥ ३२॥

वामदेवो महादेवः पाण्डुः परिदृढो दृढः ।
विश्वरूपो विरूपाक्षो वागीशः शुचिरन्तरः ॥
३३॥

सर्वप्रणयसंवादीवृषाङ्को वृषवाहनः ।

ईशः पिनाकी खट्वाङ्गी चित्रवेषश्चिरन्तनः
॥ ३४॥

तमोहरो महायोगी गोप्ता ब्रह्माङ्गहृज्जटी
।
कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ॥
३५॥

उन्मत्तवेषश्चक्षुष्योदुर्वासाः
स्मरशासनः ।
दृढायुधः स्कन्दगुरुः परमेष्ठी परायणः ॥
३६॥

अनादिमध्यनिधनो गिरिशो गिरिबान्धवः ।
कुबेरबन्धुः श्रीकण्ठो
लोकवर्णोत्तमोत्तमः ॥ ३७॥

सामान्यदेवः कोदण्डी नीलकण्ठः परश्वधी ।
विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः ॥
३८॥

धर्मकर्माक्षमः क्षेत्रं भगवान्
भगनेत्रभित् ।
उग्रः पशुपतिस्तार्क्ष्यप्रियभक्तः
प्रियंवदः ॥ ३९॥

Page 402 of 523

दाता दयाकरो दक्षः कपर्दी कामशासनः ।
श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः
॥ ४०॥

लोककर्ता भूतपतिर्महाकर्ता महौषधी ।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः
॥ ४१॥

नीतिः सुनीतिः शुद्धात्मा सोमसोमरतः सुखी ।
सोमपोऽमृतपः सोमो महानीतिर्महामतिः ॥ ४२॥

अजातशत्रुरालोकः सम्भाव्यो हव्यवाहनः ।
लोककारो वेदकारः सूत्रकारः सनातनः ॥ ४३॥

महर्षिः कपिलाचार्यो
विश्वदीप्तिस्त्रिलोचनः ।
पिनाकपाणिभूदेवः स्वस्तिदः
स्वस्तिकृत्सदा ॥ ४४॥

त्रिधामा सौभगः शर्वः सर्वज्ञः सर्वगोचरः ।
ब्रह्मधृग्विश्वसृक्स्वर्गः कर्णिकारः
प्रियः कविः ॥ ४५॥

शाखो विशाखो गोशाखः शिवोनैकः क्रतुः समः ।

Page 402 of 523

Page 403 of 523

गङ्गाप्लवोदको भावः सकलस्थपतिस्थिरः ॥ ४६॥

विजितात्मा विधेयात्मा भूतवाहनसारथिः ।
सगणो गणकार्यश्च सुकीर्तिश्छिन्नसंशयः ॥
४७॥

कामदेवः कामपालो भस्मोद्धूलितविग्रः ।
भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ॥
४८॥

समायुक्तो निवृत्तात्मा धर्मयुक्तः
सदाशिवः ।
चतुर्मुखश्चतुर्बाहुर्दुरावासो दुरासदः ॥
४९॥

दुर्गमो दुर्लभो दुर्गः सर्वायुधविशारदः ।
अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्धनः ॥
५०॥

शुभाङ्गो लोकसारङ्गो जगदीशोऽमृताशनः ।
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥
५१॥

हिरण्यरेतास्तरणिर्मरीचिर्महिमालयः ।

Page 403 of 523

Page 404 of 523

महाह्रदो महागर्भः सिद्धवृन्दारवन्दितः ॥
५२॥

व्याघ्रचर्मधरो व्याली महाभूतो महानिधिः ।
अमृताङ्गोऽमृतवपुः पञ्चयज्ञः प्रभञ्जनः ॥
५३॥

पञ्चविंशतितत्त्वज्ञः पारिजातः परावरः ।
सुलभः सुव्रतः शूरो वाङ्मयैकनिधिर्निधिः ॥
५४॥

वर्णाश्रमगुरुर्वर्णी
शत्रुजिच्छत्रुतापनः ।
आश्रमः क्षपणः क्षामो ज्ञानवानचलाचलः ॥ ५५॥

प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः
।
धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ॥
५६॥

अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः ।
अभिवाद्यो महाचार्यो विश्वकर्मा विशारदः ॥
५७॥

वीतरागो विनीतात्मा तपस्वी भूतभावनः ।

Page 404 of 523

Page 405 of 523

उन्मत्तवेषः प्रच्छन्नो जितकामो जितप्रियः
॥ ५८॥

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।
तपस्वी तारको धीमान् प्रधानप्रभुरव्ययः ॥
५९॥

लोकपालोऽन्तर्हितात्मा कल्यादिः
कमलेक्षणः ।
वेदशास्त्रार्थतत्त्वज्ञो नियमो
नियमाश्रयः ॥ ६०॥

चन्द्रः सूर्यः शनिः केतुर्विरामो
विद्रुमच्छविः ।
भक्तिगम्यः परं ब्रह्म मृगबाणार्पणोऽनघः ॥
६१॥

अद्रिराजालयः कान्तः परमात्मा जगद्गुरुः ।
सर्वकर्माचलस्त्वष्टा माङ्गल्यो
मङ्गलावृतः ॥ ६२॥

महातपा दीर्घतपाः स्थविष्ठः स्थविरो
ध्रुवः ।
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥
६३॥

Page 405 of 523

Page 406 of 523

संवत्सरकरो मन्त्रः प्रत्ययः सर्वदर्शनः ।
अजः सर्वेश्वरः स्निग्धो महारेता महाबलः ॥
६४॥

योगी योग्यो महारेताः सिद्धः
सर्वादिरग्निदः ।
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥ ६५॥

अमृतः शाश्वतः शान्तो बाणहस्तः प्रतापवान्
।
कमण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनिः ॥
६६॥

भ्राजिष्णुर्भोजनं भोक्ता लोकनेता दुराधरः
।
अतीन्द्रियो महामायः सर्वावासश्चतुष्पथः ॥
६७॥

कालयोगी महानादो महोत्साहो महाबलः ।
महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः ॥
६८॥

निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ।

Page 406 of 523

Page 407 of 523

अनिर्देश्यवपुः श्रीमान्सर्वहार्यमितो
गतिः ॥ ६९॥

बहुश्रुतो बहुमयो नियतात्मा भवोद्भवः ।
ओजस्तेजो द्युतिकरो नर्तकः सर्वकामकः ॥ ७०॥

नृत्यप्रियो नृत्यनृत्यः प्रकाशात्मा
प्रतापनः ।
बुद्धः स्पष्टाक्षरो मन्त्रः सन्मानः
सारसम्प्लवः ॥ ७१॥

युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः ।
इष्टो विशिष्टः शिष्टेष्टः शरभः शरभो धनुः
॥ ७२॥

अपांनिधिरधिष्ठानं विजयो जयकालवित् ।
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥
७३॥

विरोचनः सुरगणो विद्येशो विबुधाश्रयः ।
बालरूपो बलोन्माथी विवर्तो गहनो गुरुः ॥
७४॥

करणं कारणं कर्ता सर्वबन्धविमोचनः ।

Page 407 of 523

Page 408 of 523

विद्वत्तमो वीतभयो विश्वभर्ता निशाकरः ॥
७५॥

व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ।
दुन्दुभो ललितो विश्वो
भवात्मात्मनिसंस्थितः ॥ ७६॥

वीरेश्वरो वीरभद्रो वीरहा वीरभृद्विराट् ।
वीरचूडामणिर्वेत्ता तीव्रनादो नदीधरः ॥
७७॥

आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः
।
वालखिल्यो महाचापस्तिग्मांशुर्निधिरव्ययः
॥ ७८॥

अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ।
मघवान्कौशिको गोमान् विश्रामः सर्वशासनः ॥
७९॥

ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ।
अमोघदण्डी मध्यस्थो हिरण्यो ब्रह्मवर्चसी
॥ ८०॥

परमार्थः परमयः शम्बरो व्याघ्रकोऽनलः ।

Page 408 of 523

Page 409 of 523

रुचिर्वररुचिर्वन्द्यो वाचस्पतिरहर्पतिः
॥ ८१॥

रविर्विरोचनः स्कन्धः शास्ता वैवस्वतो जनः
।
युक्तिरुन्नतकीर्तिश्च शान्तरागः पराजयः ॥
८२॥

कैलासपतिकामारिः सविता रविलोचनः ।
विद्वत्तमो वीतभयो विश्वहर्ताऽनिवारितः ॥
८३॥

नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ।
दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः
॥ ८४॥

उत्तारको दुष्कृतिहा दुर्धर्षो दुःसहोऽभयः
।
अनादिर्भूर्भुवो लक्ष्मीः
किरीटित्रिदशाधिपः ॥ ८५॥

विश्वगोप्ता विश्वभर्ता सुधीरो
रुचिराङ्गदः ।
जननो जनजन्मादिः प्रीतिमान्नीतिमान्नयः ॥
८६॥

Page 409 of 523

विशिष्टः काश्यपो भानुर्भीमो भीमपराक्रमः
।
प्रणवः सप्तधाचारो महाकायो महाधनुः ॥ ८७॥

जन्माधिपो महादेवः सकलागमपारगः ।
तत्त्वातत्त्वविवेकात्मा
विभूष्णुर्भूतिभूषणः ॥ ८८॥

ऋषिर्ब्राह्मणविज्जिष्णुर्जन्ममृत्युजरात
िगः ।
यज्ञो यज्ञपतिर्यज्वा
यज्ञान्तोऽमोघविक्रमः ॥ ८९॥

महेन्द्रो दुर्भरः सेनी यज्ञाङ्गो
यज्ञवाहनः ।
पञ्चब्रह्मसमुत्पत्तिर्विश्वेशो विमलोदयः
॥ ९०॥

आत्मयोनिरनाद्यन्तो षड्विंशत्सप्तलोकधृक्
।
गायत्रीवल्लभः प्रांशुर्विश्वावासः
प्रभाकरः ॥ ९१॥

Page 411 of 523

शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ।
अमोघोऽरिष्टमथनो मुकुन्दो विगतज्वरः ॥ ९२॥

स्वयंज्योतिरनुज्योतिरात्मज्योतिरचञ्चलः
।
पिङ्गलः कपिलश्मश्रुः
शास्त्रनेत्रस्त्रयीतनुः ॥ ९३॥

ज्ञानस्कन्धो महाज्ञानी
निरुत्पत्तिरुपप्लवः ।
भगो विवस्वानादित्यो योगाचार्यो बृहस्पतिः
॥ ९४॥

उदारकीर्तिरुद्योगी सद्योगीसदसन्मयः ।
नक्षत्रमाली राकेशः साधिष्ठानः षडाश्रयः ॥
९५॥

पवित्रपाणिः पापारिर्मणिपूरो मनोगतिः ।
हृत्पुण्डरीकमासीनः शुक्लः शान्तो
वृषाकपिः ॥ ९६॥

विष्णुर्ग्रहपतिः कृष्णः समर्थोऽनर्थनाशनः ।

Page 411 of 523

Page 412 of 523

अधर्मशत्रुरक्षय्यः पुरुहूतः पुरुष्टुतः ॥
९७॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः
।
जगद्धितैषिसुगतः कुमारः कुशलागमः ॥ ९८॥

हिरण्यवर्णो ज्योतिष्मान्नानाभूतधरो
ध्वनिः ।
अरोगो नियमाध्यक्षो विश्वामित्रो
द्विजोत्तमः ॥ ९९॥

बृहज्योतिः सुधामा च महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥
१००॥

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः
पराशरः ।
निरावरणधर्मज्ञो विरिञ्चो विष्टरश्रवाः ॥
१०१॥

आत्मभूरनिरुद्धोऽत्रि
ज्ञानमूर्तिर्महायशाः ।
लोकचूडामणिर्वीरश्चण्डसत्यपराक्रमः ॥
१०२॥

Page 412 of 523

Page 413 of 523

व्यालकल्पो महाकल्पो महावृक्षः कलाधरः ।
अलंकरिष्णुस्त्वचलो
रोचिष्णुर्विक्रमोत्तमः ॥ १०३॥

आशुशब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिः शक्रः प्रमाथी पापनाशनः ॥
१०४॥

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।
जर्यो जराधिशमनो लोहितश्च तनूनपात् ॥ १०५॥

पृषदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेघः पक्षः परपुरञ्जयः ॥ १०६॥

मुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥
१०७॥

अङ्गिरामुनिरात्रेयो विमलो विश्ववाहनः ।
पावनः पुरुजिच्छक्रस्त्रिविद्यो नरवाहनः ॥
१०८॥

Page 413 of 523

Page 414 of 523

मनो बुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः । तेजोनिधिर्ज्ञाननिधिर्विपाको विघ्नकारकः
॥ १०९॥

अधरोऽनुत्तरोज्ञेयो ज्येष्ठो
निःश्रेयसालयः ।
शैलो नगस्तनुर्दोहो दानवारिररिन्दमः ॥
११०॥

चारुधीर्जनकश्चारु विशल्यो लोकशल्यकृत् ।
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥
१११॥

आम्नायोऽथ समाम्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥ ११२॥

न्यायनिर्वाहको न्यायो न्यायगम्यो
निरञ्जनः ।
सहस्रमूर्धा देवेन्द्रः
सर्वशस्त्रप्रभञ्जनः ॥ ११३॥

मुण्डो विरूपो विकृतो दण्डी दान्तो गुणोत्तमः ।

Page 414 of 523

Page 415 of 523

पिङ्गलाक्षोऽथ हर्यक्षो नीलग्रीवो निरामयः
॥ ११४॥

सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकभृत् ।
पद्मासनः परंज्योतिः परावरफलप्रदः ॥ ११५॥

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
परावरज्ञो बीजेशः सुमुखः सुमहास्वनः ॥ ११६॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरमहाश्रयः ॥ ११७॥

देवादिदेवो देवर्षिर्देवासुरवरप्रदः ।
देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ॥
११८॥

सर्वदेवमयोऽचिन्त्यो देवतात्मात्मसम्भवः ।
ईड्योऽनीशः सुरव्याघ्रो देवसिंहो दिवाकरः ॥ ११९॥

विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः
।
शिवज्ञानरतः श्रीमान्
शिखिश्रीपर्वतप्रियः ॥ १२०॥

Page 415 of 523

Page 416 of 523

जयस्तम्भो विशिष्टम्भो नरसिंहनिपातनः ।
ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ॥
१२१॥

नन्दी नन्दीश्वरो नग्नो नग्नव्रतधरः शुचिः
।
लिङ्गाध्यक्षः सुराध्यक्षो युगाध्यक्षो
युगावहः ॥ १२२॥

स्ववशः सवशः स्वर्गः स्वरः स्वरमयः स्वनः ।
बीजाध्यक्षो बीजकर्ता धनकृद्धर्मवर्धनः ॥
१२३॥

दम्भोऽदम्भो महादम्भः सर्वभूतमहेश्वरः ।
श्मशाननिलयस्तिष्यः सेतुरप्रतिमाकृतिः ॥
१२४॥

लोकोत्तरस्फुटालोकस्त्र्यम्बको नागभूषणः
।
अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः ॥
१२५॥

वीतदोषोऽक्षयगुणो दक्षारिः पूषदन्तहृत् ।

Page 416 of 523

Page 417 of 523

धूर्जटिः खण्डपरशुः सकलो निष्कलोऽनघः ॥
१२६॥

आधारः सकलाधारः पाण्डुराभो मृडो नटः ।
पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ॥
१२७॥

सामगेयः प्रियकरः पुण्यकीर्तिरनामयः ।
मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ॥ १२८॥

जीवितान्तकरो नित्यो वसुरेता वसुप्रियः ।
सद्गतिः सत्कृतिः सक्तः कालकण्ठः कलाधरः ॥
१२९॥

मानी मान्यो महाकालः सद्भूतिः सत्परायणः ।
चन्द्रसञ्जीवनः शास्ता लोकगूढोऽमराधिपः ॥
१३०॥

लोकबन्धुर्लोकनाथः कृतज्ञः कृतिभूषणः ।
अनपाय्यक्षरः कान्तः सर्वशास्त्रभृतां वरः
॥ १३१॥

तेजोमयो द्युतिधरो लोकमायोऽग्रणीरणुः ।
शुचिस्मितः प्रसन्नात्मा दुर्जयो
दुरतिक्रमः ॥ १३२॥

Page 417 of 523

Page 418 of 523

ज्योतिर्मयो निराकारो जगन्नाथो जलेश्वरः ।
तुम्बवीणी महाकायो विशोकः शोकनाशनः ॥ १३३॥

त्रिलोकात्मा त्रिलोकेशः शुद्धः
शुद्धिरथाक्षजः ।
अव्यक्तलक्षणोऽव्यक्तो व्यक्ताव्यक्तो
विशाम्पतिः ॥ १३४॥

वरशीलो वरतुलो मानो मानधनो मयः ।
ब्रह्मा विष्णुः प्रजापालो हंसो
हंसगतिर्यमः ॥ १३५॥

वेधा धाता विधाता च अत्ता हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सतां गतिः ॥ १३६॥

हिरण्यगर्भो हरिणः पुरुषः पूर्वजः पिता ।
भूतालयो भूतपतिर्भूतिदो भुवनेश्वरः ॥ १३७॥

संयोगी योगविद्ब्रह्मा ब्रह्मण्यो
ब्राह्मणप्रियः ।
देवप्रियो देवनाथो देवज्ञो देवचिन्तकः ॥
१३८॥

Page 418 of 523

Page 419 of 523

विषमाक्षः कलाध्यक्षो वृषाङ्को वृषवर्धनः
।
निर्मदो निरहंकारो निर्मोहो निरुपद्रवः ॥
१३९॥

दर्पहा दर्पितो दृप्तः सर्वर्तुपरिवर्तकः
।
सप्तजिह्वः सहस्रार्चिः स्निग्धः
प्रकृतिदक्षिणः ॥ १४०॥

भूतभव्यभवन्नाथः प्रभवो भ्रान्तिनाशनः ।
अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः ॥
१४१॥

निष्कण्टकः कृतानन्दो निर्व्याजो
व्याजमर्दनः ।
सत्त्ववान्सात्त्विकः
सत्यकीर्तिस्तम्भकृतागमः ॥ १४२॥

अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत्
।
सुप्रीतः सुमुखः सूक्ष्मः सुकरो
दक्षिणोऽनलः ॥ १४३॥

Page 419 of 523

स्कन्धः स्कन्धधरो धुर्यः प्रकटः
प्रीतिवर्धनः ।
अपराजितः सर्वसहो विदग्धः सर्ववाहनः ॥ १४४॥

अधृतः स्वधृतः साध्यः पूर्तमूर्तिर्यशोधरः
।
वराहशृङ्गधृग्वायुर्बलवानेकनायकः ॥ १४५॥

श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेकधृक्
।
श्रीवल्लभशिवारम्भः शान्तभद्रः समञ्जसः ॥
१४६॥

भूशयो भूतिकृद्भूतिर्भूषणो भूतवाहनः ।
अकायो भक्तकायस्थः कालज्ञानी कलावपुः ॥
१४७॥

सत्यव्रतमहात्यागी निष्ठाशान्तिपरायणः ।
परार्थवृत्तिर्वरदो विविक्तः श्रुतिसागरः
॥ १४८॥

अनिर्विण्णो गुणग्राही कलङ्काङ्कः कलङ्कहा
।
स्वभावरुद्रो मध्यस्थः शत्रुघ्नो
मध्यनाशकः ॥ १४९॥

Page 421 of 523

शिखण्डी कवची शूली चण्डी मुण्डी च कुण्डली ।
मेखली कवची खड्गी मायी संसारसारथिः ॥ १५०॥

अमृत्युः सर्वदृक्
सिंहस्तेजोराशिर्महामणिः ।
असंख्येयोऽप्रमेयात्मा
वीर्यवान्कार्यकोविदः ॥ १५१॥

वेद्यो वेदार्थविद्गोप्ता सर्वाचारो
मुनीश्वरः ।
अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ॥
१५२॥

सुरेशः शरणं सर्वः शब्दब्रह्मसतां गतिः ।
कालभक्षः कलङ्कारिः कङ्कणीकृतवासुकिः ॥
१५३॥

महेष्वासो महीभर्ता निष्कलङ्को विशृङ्खलः
।
द्युमणिस्तरणिर्धन्यः सिद्धिदः
सिद्धिसाधनः ॥ १५४॥

निवृत्तः संवृतः शिल्पो व्यूढोरस्को महाभुजः ।

Page 421 of 523

Page 422 of 523

एकज्योतिर्निरातङ्को नरो नारायणप्रियः ॥
१५५॥

निर्लेपो निष्प्रपञ्चात्मा निर्व्यग्रो
व्यग्रनाशनः ।
स्तव्यस्तवप्रियः स्तोता
व्यासमूर्तिरनाकुलः ॥ १५६॥

निरवद्यपदोपायो विद्याराशिरविक्रमः ।
प्रशान्तबुद्धिरक्षुद्रः क्षुद्रहा
नित्यसुन्दरः ॥ १५७॥

धैर्याग्र्यधुर्यो धात्रीशः शाकल्यः
शर्वरीपतिः ।
परमार्थगुरुर्दृष्टिर्गुरुराश्रितवत्सलः
॥ १५८॥

रसो रसज्ञः सर्वज्ञः सर्वसत्त्वावलम्बनः ।
सूत उवाच -
एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् ॥
१५९॥

स्नापयामास च विभुः पूजयामास पङ्कजैः ।
परीक्षार्थं हरेः पूजाकमलेषु महेश्वरः ॥
१६०॥

Page 422 of 523

गोपयामासकमलं तदैकं भुवनेश्वरः ।
हृतपुष्पो हरिस्तत्र किमिदं
त्वभ्यचिन्तयन् ॥ १६१॥

ज्ञात्वा स्वनेत्रमुद्धृत्य
सर्वसत्त्वावलम्बनम् ।
पूजयामास भावेन नाम्ना तेन जगद्गुरुम् ॥
१६२॥

ततस्तत्र विभुर्दृष्ट्वा तथाभूतं हरो
हरिम् ।
तस्मादवतताराशु मण्डलात्पावकस्य च ॥ १६३॥

कोटिभास्करसंकाशं जटामुकुटमण्डितम् ।
ज्वालामालावृतं दिव्यं तीक्ष्णदंष्ट्रं
भयङ्करम् ॥ १६४॥

शूलटङ्कगदाचक्रकुन्तपाशधरं हरम् ।
वरदाभयहस्तं च दीपिचर्मोत्तरीयकम् ॥ १६५॥

इत्थम्भूतं तदा दृष्ट्वा भवं
भस्मविभूषितम् ।
हृष्टो नमश्चकाराशु देवदेवं जनार्दनः ॥
१६६॥

Page 424 of 523

दुद्रुवुस्तं परिक्रम्य सेन्द्रा देवास्त्रिलोचनम् ।
चचाल ब्रह्मभुवनं चकम्पे च वसुन्धरा ॥ १६७॥

ददाह तेजस्तच्छम्भोः प्रान्तं वै शतयोजनम्
।
अधस्ताच्चोर्ध्वतश्चैव हाहेत्यकृत भूतले ॥
१६८॥

तदा प्राह महादेवः प्रहसन्निव शङ्करः ।
सम्प्रेक्ष्य प्रणयाद्विष्णुं
कृताञ्जलिपुटं स्थितम् ॥ १६९॥

ज्ञातं मयेदमधुना देवकार्यं जनार्दन ।
सुदर्शनाख्यं चक्रं च ददामि तव शोभनम् ॥
१७०॥

यद्रूपं भवता दृष्टं सर्वलोकभयङ्करम् ।
हिताय तव यत्नेन तव भावाय सुव्रत ॥ १७१॥

शान्तं रणाजिरे विष्णो देवानां दुःखसाधनम्
।
शान्तस्य चास्त्रं शान्तं
स्याच्छान्तेनास्त्रेण किं फलम् ॥१७२॥

Page 424 of 523

Page 425 of 523

शान्तस्य समरे चास्त्रं शान्तिरेव तपस्विनाम् ।
योद्धुः शान्त्या बलच्छेदः परस्य
बलवृद्धिदः ॥ १७३॥

देवैरशान्तैर्यद्रूपं मदीयं भावयाव्ययम् ।
किमायुधेन कार्यं वै योद्धुं देवारिसूदन ॥
१७४॥

क्षमा युधि न कार्यं वै योद्धुं देवारिसूदन
।
अनागते व्यतीते च दौर्बल्ये स्वजनोत्करे ॥
१७५॥

अकालिके त्वधर्मे च अनर्थेवारिसूदन ।
एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम् ॥
१७६॥

नेत्रं च नेता जगतां प्रभुर्वै
पद्मसन्निभम् ।
तदाप्रभृति तं प्राहुः पद्माक्षमिति
सुव्रतम् ॥ १७७॥

दत्त्वैनं नयनं चक्रं विष्णवे नीललोहितः ।

Page 425 of 523

Page 426 of 523

पस्पर्श च कराभ्यां वै सुशुभाभ्यामुवाच ह ॥
१७८॥

वरदोहं वरश्रेष्ठ वरान्वरय चेप्सितान् ।
भक्त्या वशीकृतो नूनं त्वयाहं पुरुषोत्तम ॥
१७९॥

इत्युक्तो देवदेवेन देवदेवं प्रणम्य तम् ।
त्वयि भक्तिर्महादेव प्रसीद वरमुत्तमम् ॥
१८०॥

नान्यमिच्छामि भक्तानामार्तयो नास्ति
यत्प्रभो ।
तच्छ्रुत्वा वचनं तस्य दयावान् सुतरां भवः
॥ १८१॥

पस्पर्श च ददौ तस्मै श्रद्धां शीतांशुभूषणः
।
प्राह चैवं महादेवः परमात्मानमच्युतम् ॥
१८२॥

मयि भक्तश्च वन्द्यश्च पूज्यश्चैव
सुरासुरैः ।
भविष्यति न संदेहो मत्प्रसादात्सुरोत्तम ॥
१८३॥

Page 426 of 523

Page 427 of 523

यदा सती दक्षपुत्री विनिन्द्येव सुलोचना ।
मातरं पितरं दक्षं भविष्यति सुरेश्वरी ॥
१८४॥

दिव्या हैमवती विष्णो तदा त्वमपि सुव्रत ।
भगिनीं तव कल्याणीं देवीं हैमवतीमुमाम् ॥
१८५॥

नियोगाद्ब्रह्मणः साध्वीं प्रदास्यसि ममैव
ताम् ।
मत्सम्बन्धी च लोकानां मध्ये पूज्यो
भविष्यसि ॥ १८६॥

मां दिव्येन च भावेन तदा प्रभृति शङ्करम् ।
द्रक्ष्यसे च प्रसन्नेन मित्रभूतमिवात्मना
॥ १८७॥

इत्युक्त्वान्तर्दधे रुद्रो
भगवान्नीललोहितः ।
जनार्दनोपि भगवान्देवानामपि सन्निधौ ॥
१८८॥

अयाचत महादेवं ब्रह्माणं मुनिभिः समम् ।

Page 427 of 523

Page 428 of 523

मया प्रोक्तं स्तवं दिव्यं पद्मयोने सुशोभनम् ॥ १८९॥

यः पठेच्छृणुयाद्वापि श्रावयेद्वा
द्विजोत्तमान् ।
प्रतिनाम्नि हिरण्यस्य दत्तस्य
फलमाप्नुयात् ॥ १९०॥

अश्वमेधसहस्रेण फलं भवति तस्य वै ।
घृताद्यैः स्नापयेद्रुद्रं स्थाल्या वै
कलशैः शुभैः ॥१९१॥

नाम्नां सहस्रेणानेन श्रद्धया शिवमीश्वरम्
।
सोपि यज्ञसहस्रस्य फलं लब्ध्वा सुरेश्वरैः
॥ १९२॥

पूज्यो भवति रुद्रस्य प्रीतिर्भवति तस्य वै
।
तथास्त्विति तथा प्राह
पद्मयोनेर्जनार्दनम् ॥ १९३॥

जग्मतुः प्रणिपत्यैनं देवदेवं जगद्गुरुम् ।

Page 428 of 523

Page 429 of 523

तस्मान्नाम्नां सहस्रेण पूजयेदनघो द्विजाः
॥ १९४॥

जपीन्नाम्नां सहस्रं च स याति परमां गतिम् ॥
१९५॥

॥ इति श्रीलिङ्गमहापुराणे पूर्वभागे
सहस्रनामभिः
पूजनाद्विष्णुचक्रलाभो
नामाष्टनवतितमोध्यायः ॥

॥ श्रीशिवसहस्रनामस्तोत्रं वायुपुराणे
अध्याय ३० ॥

॥ दक्ष उवाच ॥

नमस्ते देवदेवेश देवारिबलसूदन ।
देवेन्द्र ह्यमरश्रेष्ठ देवदानवपूजित ॥
३०.१८०॥

सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय ।
सर्वतः पाणिपादस्त्वं सर्वतोऽक्षिशिरोमुखः ।

Page 429 of 523

Page 430 of 523

सर्वतः श्रुतिमान् लोके सर्वानावृत्य
तिष्ठसि ॥ ३०.१८१॥

शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय ।
गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते
॥ ३०.१८२॥

शतोदर शतावर्त्त शतजिह्व शतानन ।
गायन्ति त्वां गायत्रिणो ह्यर्च्चयन्ति
तथार्च्चिनः ॥ ३०.१८३॥

देवदानवगोप्ता च ब्रह्मा च त्वं शतक्रतुः ।
मूर्त्तीशस्त्वं महामूर्ते समुद्राम्बु
धराय च ॥ ३०.१८४॥

सर्वा ह्यस्मिन् देवतास्ते गावो गोष्ठ
इवासते ।
शरीरन्ते प्रपश्यामि सोममग्निं जलेश्वरम्
॥ ३०.१८५॥

आदित्यमथ विष्णुञ्च ब्रह्माणं सबृहस्पतिम्
।
क्रिया कार्य्यं कारणञ्च कर्त्ता करणमेव च
॥ ३०.१८६॥

Page 430 of 523

Page 431 of 523

असच्च सदसच्चैव तथैव प्रभवाव्ययम् ।
नमो भवाय शर्वाय रुद्राय वरदाय च ॥ ३०.१८७॥

पशूनां पतये चैव नमस्त्वन्धकघातिने ।
त्रिजटाय त्रिशीर्षाय त्रिशूलवरधारिणे ॥
३०.१८८॥

त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै
नमः ।
नमश्चण्डाय मुण्डाय प्रचण्डाय धराय च ॥
३०.१८९॥

दण्डि मासक्तकर्णाय दण्डिमुण्डाय वै नमः ।
नमोऽर्द्धदण्डकेशाय निष्काय विकृताय च ॥
३०.१९०॥

विलोहिताय धूम्राय नीलग्रीवाय ते नमः ।
नमस्त्वप्रतिरूपाय शिवाय च नमोऽस्तु ते ॥
३०.१९१॥

सूर्य्याय सूर्य्यपतये
सूर्य्यध्वजपताकिने ।
नमः प्रमथनाथाय वृषस्कन्धाय धन्विने ॥
३०.१९२॥

Page 431 of 523

नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
हिरण्यकृतचूडाय हिरण्यपतये नमः ॥ ३० .१९३॥

सत्रघाताय दण्डाय वर्णपानपुटाय च ।
नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः ॥
३०.१९४॥

सर्वायाभक्ष्यभक्ष्याय
सर्वभूतान्तरात्मने ।
नमो होत्राय मन्त्राय शुक्लध्वजपताकिने ॥
३०.१९५॥

नमो नमाय नम्याय नमः किलिकिलाय च ।
नमस्ते शयमानाय शयितायोत्थिताय च ॥ ३० .१९६॥

स्थिताय चलमानाय मुद्राय कुटिलाय च ।
नमो नर्त्तनशीलाय मुखवादित्रकारिणे ॥
३०.१९७॥

नाट्योपहारलुब्धाय गीतवाद्यरताय च ।
नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च ॥
३०.१९८॥

कलनाय च कल्पाय क्षयायोपक्षयाय च ।

भीमदुन्दुभिहासाय भीमसेनप्रियाय च ॥
३० . १९९॥

उग्राय च नमो नित्यं नमस्ते दशबाहवे ।
नमः कपालहस्ताय चिताभस्मप्रियाय च ॥
३० . २००॥

विभीषणाय भीष्माय भीष्मव्रतधराय च ।
नमो विकृतवक्षाय खड्गजिह्वाग्रदंष्ट्रिणे
॥ ३० . २०१॥

पक्वाममांसलुब्धाय तुम्बवीणाप्रियाय च ।
नमो वृषाय वृष्याय वृष्णये वृषणाय च ॥
३० . २०२॥

कटङ्कटाय चण्डाय नमः सावयवाय च ।
नमस्ते वरकृष्णाय वराय वरदाय च ॥ ३० .२०३॥

वरगन्धमाल्यवस्त्राय वरातिवरये नमः ।
नमो वर्षाय वाताय छायायै आतपाय च ॥ ३० .२०४॥

नमो रक्तविरक्ताय शोभनायाक्षमालिने ।
सम्भिन्नाय विभिन्नाय विविक्तविकटाय च ॥
३० . २०५॥

Page 434 of 523

अघोररूपरूपाय घोरघोरतराय च ।
नमः शिवाय शान्ताय नमः शान्ततराय च ॥
३०.२०६॥

एकपाद्बहुनेत्राय एकशीर्षन्नमोऽस्तु ते ।
नमो वृद्धाय लुब्धाय संविभागप्रियाय च ॥
३०.२०७॥

पञ्चमालार्चिताङ्गाय नमः पाशुपताय च ।
नमश्चण्डाय घण्टाय घण्टया जग्धरन्ध्रिणे ॥
३०.२०८॥

सहस्रशतघण्टाय घण्टामालाप्रियाय च ।
प्राणदण्डाय त्यागाय नमो हिलिहिलाय च ॥
३०.२०९॥

हूंहूङ्काराय पाराय हूंहूङ्कारप्रियाय च ।
नमश्च शम्भवे नित्यं गिरि वृक्षकलाय च ॥
३०.२१०॥

गर्भमांसशृगालाय तारकाय तराय च ।
नमो यज्ञाधिपतये द्रुतायोपद्रुताय च ॥
३०.२११॥

यज्ञवाहाय दानाय तप्याय तपनाय च ।

Page 434 of 523

नमस्तटाय भव्याय तडितां पतये नमः ॥ ३० .२१२॥

अन्नदायान्नपतये नमोऽस्त्वन्नभवाय च ।
नमः सहस्रशीर्ष्णे च सहस्रचरणाय च ॥ ३० .२१३॥

सहस्रोद्यतशूलाय सहस्रनयनाय च ।
नमोऽस्तु बालरूपाय बालरूपधराय च ॥ ३० .२१४॥

बालानाञ्चैव गोप्त्रे च बालक्रीडनकाय च ।
नमः शुद्धाय बुद्धाय क्षोभणायाक्षताय च ॥
३० .२१५॥

तरङ्गाङ्कितकेशाय मुक्तकेशाय वै नमः ।
नमः षट्कर्मनिष्ठाय त्रिकर्मनिरताय च ॥
३० .२१६॥

वर्णाश्रमाणां विधिवत्
पृथक्कर्मप्रवर्तिने ।
नमो घोषाय घोष्याय नमः कलकलाय च ॥ ३० .२१७॥

श्वेतपिङ्गलनेत्राय कृष्णरक्तक्षणाय च ।
धर्मार्थ काममोक्षाय क्रथाय कथनाय च ॥
३० .२१८॥

साङ्ख्याय साङ्ख्यमुख्याय योगाधिपतये नमः
।
नमो रथ्यविरथ्याय चतुष्पथरताय च ॥ ३० .२१९॥

कृष्णा जिनोत्तरीयाय व्यालयज्ञोपवीतिने ।
ईशानवज्रसंहाय हरिकेश नमोऽस्तु ते ।
अविवेकैकनाथाय व्यक्ताव्यक्त नमोऽस्तु ते
॥ ३० .२२०॥

काम कामद कामध्न धृष्टोदृप्तनिषूदन ।
सर्व सर्वद सर्वज्ञ सन्ध्याराग नमोऽस्तु ते
॥ ३० .२२१॥

महाबाल महाबाहो महासत्त्व महाद्युते ।
महामेघवरप्रेक्ष महाकाल नमोऽस्तु ते ॥
३० .२२२॥

स्थूलजीर्णाङ्गजटिने वल्कलाजिनधारिणे ।
दीप्तसूर्याग्निजटिने वल्कलाजिनवाससे ।
सहस्रसूर्यप्रतिम तपोनित्य नमोऽस्तु ते ॥
३० .२२३॥

उन्मादनशतावर्त्त गङ्गातोयार्द्धमूर्द्धज
।

Page 437 of 523

चन्द्रावर्त्त युगावर्त्त मेघावर्त्त
नमोऽस्तु ते ॥ ३०.२२४॥

त्वमन्नमन्नकर्त्ता च अन्नदश्च त्वमेव हि ।
अन्नस्रष्टा च पक्ता च पक्वभुक्तपचे नमः ॥
३०.२२५॥

जरायुजोऽण्डजश्चैव स्वेदजोद्भिज्ज एव च ।
त्वमेव देवदेवशो भूतग्रामश्चतुर्विधः ॥
३०.२२६ ।
चराचरस्य ब्रह्मा त्वं प्रतिहर्त्ता
त्वमेव च ।
त्वमेव ब्रह्मविदुषामपि ब्रह्मविदां वरः ॥
३०.२२७॥

सत्त्वस्य परमा योनिरब्वायुज्योतिषां
निधिः ।
ऋक्सामानि तथोङ्कारमाहुस्त्वां
ब्रह्मवादिनः ॥ ३०.२२८॥

हविर्हावी हवो हावी हुवां वाचाहुतिः सदा ।
गायन्ति त्वां सुरश्रेष्ठ सामगा
ब्रह्मवादिनः ॥ ३०.२२९॥

यजुर्मयो ऋङ्मयश्च सामाथर्वमयस्तथा ।

Page 437 of 523

Page 438 of 523

पठ्यसे ब्रह्मविद्भिस्त्वं कल्पोपनिषदां गणैः ॥ ३०.२३०॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा
वर्णावराश्च ये ।
त्वामेव मेघसङ्घाश्च विश्वस्त
नितगर्ज्जितम् ॥ ३०.२३१॥

संवत्सरस्त्वमृतवो मासा मासार्द्धमेव च ।
कला काष्ठा निमेषाश्च नक्षत्राणि युगा
ग्रहाः ॥ ३०.२३२॥

वृषाणां ककुदं त्वं हि गिरीणां शिखराणि च ।
सिंहो मृगाणां पततां तार्क्ष्योऽनन्तश्च
भोगिनाम् ॥ ३०.२३३॥

क्षीरोदो ह्युदधीनाञ्च यन्त्राणां धनुरेव
च ।
वज्रम्प्रहरणानाञ्च व्रतानां सत्यमेव च ॥
३०.२३४॥

इच्छा द्वेषश्च रागश्च मोहः क्षामो दमः शमः
।
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥
३०.२३५॥

Page 438 of 523

Page 439 of 523

त्वं गदी त्वं शरी चापि खट्वाङ्गी झर्झरी तथा ।
छेत्ता भेत्ता प्रहर्त्ता च त्वं
नेताप्यन्तको मतः ॥ ३०.२३६॥

दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च ।
इन्द्रः समुद्राः सरितः पल्वलानि सरांसि च
॥ ३०.२३७॥

लतावल्ली तृणौषध्यः पशवो मृगपक्षिणः ।
द्रव्यकर्मगुणारम्भः कालपुष्पफलप्रदः ॥
३०.२३८॥

आदिश्चान्तश्च मध्यश्च गायत्र्योङ्कार एव
च ।
हरितो लोहितः कृष्णो नीलः पीतस्तथारुणः ॥
३०.२३९॥

कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा ।
सुवर्णरेता विख्यातः सुवर्णश्चाप्यतो मतः
॥ ३०.२४०॥

सुवर्णनामा च तथा सुवर्णप्रिय एव च ।

Page 439 of 523

Page 440 of 523

त्वमिन्द्रोऽथ यमश्चैव वरुणो धनदोऽनलः ॥
३०.२४१॥

उत्फुल्लश्चित्रभानुश्च
स्वर्भानुर्भानुरेव च ।
होत्रं होता च होमस्त्वं हुतञ्च प्रहुतं
प्रभुः ॥ ३०.२४२॥

सुपर्णञ्च तथा ब्रह्म यजुषां शतरुद्रियम् ।
पवित्राणां पवित्रं च मङ्गलानाञ्च मङ्गलम्
॥ ३०.२४३॥

गिरिः स्तोकस्तथा वृक्षो जीवः पुद्गल एव च ।
सत्त्वं त्वञ्च रजस्त्वञ्च तमश्च प्रजनं
तथा ॥ ३०.२४४॥

प्राणोऽपानः समानश्च उदानो व्यान एव च ।
उन्मेषश्चैव मेषश्च तथा जृम्भितमेव च ॥
३०.२४५॥

लोहिताङ्गो गदी दंष्ट्री महावक्त्रो
महोदरः ।
शुचिरोमा
हरिच्छ्मश्रुरूर्द्ध्वकेशस्त्रिलोचनः ॥
३०.२४६॥

Page 440 of 523

गीतवादित्रनृत्याङ्गो गीतवादनकप्रियः ।
मत्स्यो जली जलो जल्यो जवः कालः कली कलः ॥
३०.२४७॥

विकालश्च सुकालश्च दुष्कालः कलनाशनः ।
मृत्युश्चैव क्षयोऽन्तश्च क्षमापायकरो हरः
॥ ३०.२४८॥

संवर्त्तकोऽन्तकश्चैव संवर्त्तकबलाहकौ ।
घटो घटीको घण्टीको चूडालोलबलो बलम् ॥
३०.२४९॥

ब्रह्मकालोऽग्निवक्त्रश्च दण्डी मुण्डी च
दण्डधृक् ।
चतुर्युगश्चतुर्वेदश्चतुर्होत्रश्चतुष्पथ
ः ॥ ३०.२५०॥

चतुरा श्रमवेत्ता च चातुर्वर्ण्यकरश्च ह ।
क्षराक्षरप्रियो
धूर्त्तोऽगण्योऽगण्यगणाधिपः ॥ ३० .२५१॥

रुद्राक्षमाल्याम्बरधरो गिरिको
गिरिकप्रियः ।

शिल्पीशः शिल्पिनां श्रेष्ठः
सर्वशिल्पप्रवर्त्तकः ॥ ३० .२५२॥

भगनेत्रान्तकश्चन्द्रः पूष्णो
दन्तविनाशनः ।
गूढावर्त्तश्च गूढश्च गूढप्रतिनिषेविता ॥
३०.२५३॥

तरणस्तारकश्चैव सर्वभूतसुतारणः ।
धाता विधाता सत्वानां निधाता धारणो धरः ॥
३०.२५४॥

तपो ब्रह्म च सत्यञ्च ब्रह्मचर्यमथार्जवम्
।
भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ॥
३०.२५५॥

भूर्भुवःस्वरितश्चैव
तथोत्पत्तिर्महेश्वरः ।
ईशानो वीक्षणः शान्तो दुर्दान्तो
दन्तनाशनः ॥ ३० .२५६॥

ब्रह्मावर्त्त सुरावर्त्त कामावर्त्त
नमोऽस्तु ते ।

Page 443 of 523

कामबिम्बनिहर्त्ता च कर्णिकाररजःप्रियः ॥
३०.२५७॥

मुखचन्द्रो भीममुखः सुमुखो दुर्मुखो मुखः ।
चतुर्मुखो बहुमुखो रणे ह्यभिमुखः सदा ॥
३०.२५८॥

हिरण्यगर्भः शकुनिर्महोदधिः परो विराट् ।
अधर्महा महादण्डो दण्डधारी रणप्रियः ॥
३०.२५९॥

गोतमो गोप्रतारश्च गोवृषेश्वरवाहनः ।
धर्मकृद्धर्मस्रष्टा च धर्मो
धर्मविदुत्तमः ॥ ३०.२६०॥

त्रैलोक्यगोप्ता गोविन्दो मानदो मान एव च ।
तिष्ठन् स्थिरश्च स्थाणुश्च निष्कम्पः
कम्प एव च ॥ ३०.२६१॥

दुर्वारणो दुर्विषदो दुःसहो दुरतिक्रमः ।
दुर्द्धरो दुष्प्रकम्पश्च दुर्विदो
दुर्ज्जयो जयः ॥ ३०.२६२॥

शशः शशाङ्कः शमनः शीतोष्णं दुर्जराऽथ तृट् ।

Page 443 of 523

आधयो व्याधयश्चैव व्याधिहा व्याधिगश्च ह ॥
३०.२६३॥

सह्यो यज्ञो मृगा व्याधा
व्याधीनामाकरोऽकरः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकावलोकनः ॥
३०.२६४॥

दण्डधरः सदण्डश्च दण्डमुण्डविभूषितः ।
विषपोऽमृतपश्चैव सुरापः क्षीरसोमपः ॥
३०.२६५॥

मधुपश्चाज्यपश्चैव सर्वपश्च महाबलः ।
वृषाश्ववाह्यो वृषभस्तथा वृषभलोचनः ॥
३०.२६६॥

वृषभश्चैव विख्यातो लोकानां लोकसत्कृतः ।
चन्द्रादित्यौ चक्षुषी ते हृदयञ्च पितामहः
।
अग्निरापस्तथा देवो धर्मकर्मप्रसाधितः ॥
३०.२६७॥

न ब्रह्मा न च गोविन्दः पुराणऋषयो न च ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते
शिव ॥ ३० .२६८॥

Page 445 of 523

या मूर्त्तयः सुसूक्ष्मास्ते न मह्यं
यान्ति दर्शनम् ।
ताभिर्मां सततं रक्ष पिता पुत्रमिवौरसम् ॥
३०.२६९॥

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते ॥

भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि
॥ ३०.२७०॥

यः सहस्राण्यनेकानि पुंसामाहृत्य
दुर्द्दशः ।
तिष्ठत्येकः समुद्रान्ते स मे गोप्तास्तु
नित्यशः ॥ ३०.२७१॥

यं विनिद्रा जितश्वासाः सत्त्वस्थाः
समदर्शिनः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै
योगात्मने नमः ॥ ३०.२७२॥

सम्भक्ष्य सर्व भूतानि युगान्ते
समुपस्थिते ।
यः शेते जलमध्यस्थस्तं
प्रपद्येऽप्सुशायिनम् ॥ ३०.२७३॥

Page 445 of 523

Page 446 of 523

प्रविश्य वदने राहोर्यः सोमं ग्रसते निशि ।
ग्रसत्यर्कञ्च स्वर्भानुर्भूत्वा सोमाग्निरेव च ॥ ३०.२७४॥

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः
सर्वदेहिनाम् ।
रक्षन्तु ते हि मां नित्यं
नित्यमाप्याययन्तु माम् ॥ ३०.२७५॥

ये चाप्युत्पतिता गर्भादधोभागगताश्च ये ।
तेषां स्वाहाः स्वधाश्चैव आप्नुवन्तु
स्वदन्तु च ॥ ३०.२७६॥

ये न रोदन्ति देहस्थाः प्राणिनो रोदयन्ति च
।
हर्षयन्ति च हृष्यन्ति नमस्तेभ्योऽस्तु
नित्यशः ॥ ३०.२७७॥

ये समुद्रे नदीदुर्गे पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु न ॥
३०.२७८॥

चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च ।

Page 446 of 523

Page 447 of 523

चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ॥ ३०.२७९॥

रसातलगता ये च ये च तस्मात्परङ्गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यश्च
नित्यशः ।
सूक्ष्माः स्थूलाः कृशा ह्रस्वा
नमस्तेभ्यस्तु नित्यशः ॥ ३०.२८०॥

सर्वस्त्वं सर्वगो देव सर्वभूतपतिर्भवान्
।
सर्वभूतान्तरात्मा च तेन त्वं न
निमन्त्रितः ॥ ३०.२८१॥

त्वमेव चेज्यसे
यस्माद्यज्ञैर्विविधदक्षिणैः ।
त्वमेव कर्त्ता सर्वस्य तेन त्वं न
निमन्त्रितः ॥ ३०.२८२॥

अथ वा मायया देव मोहितः सूक्ष्मया त्वया ।
एतस्मात् कारणाद्वापि तेन त्वं न
निमन्त्रितः ॥ ३०.२८३॥

प्रसीद मम देवेश त्वमेव शरणं मम ।

Page 447 of 523

Page 448 of 523

त्वं गतिस्त्वं प्रतिष्ठा च न चान्यास्ति न
मे गतिः ॥ ३०.२८४॥

स्तुत्वैवं स महादेवं विरराम प्रजापतिः ।
भगवानपि सुप्रीतः पुनर्दक्षमभाषत ॥ ३०.२८५॥

परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत
।
बहुनात्र किमुक्तेन मत्समीपं गमिष्यसि ॥
३०.२८६॥

अथैनमब्रवीद्वाक्यं त्रैलोक्याधिपतिर्भवः
।
कृत्वाश्वासकरं वाक्यं वाक्यज्ञो
वाक्यमाहतम् ॥ ३०.२८७॥

दक्ष दक्ष न कर्त्तव्यो मन्युर्विघ्नमिमं
प्रति ।
अहं यज्ञहा न त्वन्यो दृश्यते तत्पुरा
त्वया ॥ ३०.२८८॥

भूयश्च तं वरमिमं मत्तो गृह्णीष्व सुव्रत ।
प्रसन्नवदनो भूत्वा त्वमेकाग्रमनाः शृणु ॥
३०.२८९॥

Page 448 of 523

अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
प्रजापते मत्प्रसादात् फलभागी भविष्यसि ॥
३०.२९०॥

वेदान् षडङ्गानुद्धृत्य
साङ्ख्यान्योगांश्च कृत्स्नशः ।
तपश्च विपुलं तप्त्वा दुश्चरं देवदानवैः ॥
३०.२९१॥

अर्थैर्द्दशार्द्धसंयुक्तैर्गूढमप्राज्ञन
िर्म्मितम् ।
वर्णाश्रमकृतैर्धर्मैर्विपरीतं
क्वचित्समम् ॥ ३०   .२९२॥

श्रुत्यर्थैरध्यवसितं पशुपाशविमोक्षणम् ।
सर्वेषामाश्रमाणान्तु मया पाशुपतं व्रतम्
।
उत्पादितं शुभं दक्ष सर्वपापविमोक्षणम् ॥
३०.२९३॥

अस्य चीर्णस्य यत्सम्यक् फलं भवति पुष्कलम्
।
तदस्तु ते महाभाग मानसस्त्यज्यतां ज्वरः ॥
३०.२९४॥

Page 450 of 523

एवमुक्त्वा महादेवः सपत्नीकः सहानुगः ।
अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः ॥
३०.२९५॥

अवाप्य च तदा भागं यथोक्तं ब्रह्मणा भवः ।
ज्वरञ्च सर्वधर्मज्ञो बहुधा व्यभजत्तदा ।
शान्त्यर्थं सर्वभूतानां शृणुध्वं तत्र वै
द्विजाः ॥ ३०.२९६॥

शीर्षाभितापो नागानां पर्वतानां शिलारुजः
।
अपान्तु नालिकां
विद्यान्निर्मोकम्भुजगेष्वपि ॥ ३०.२९७॥

स्वौरकः सौरभेयाणामूषरः पृथिवीतले ।
इभा नामपि धर्मज्ञ दृष्टिप्रत्यवरोधनम् ॥
३०.२९८॥

रन्ध्रोद्भूतं तथाश्वानां शिखोद्भेदश्च
बर्हिणाम् ।
नेत्ररोगः कोकिलानां ज्वरः प्रोक्तो
महात्मभिः ॥ ३०.२९९॥

अजानां पित्तभेदश्च सर्वेषामिति नः श्रुतम् ।

Page 450 of 523

Page 451 of 523

शुकानामपि सर्वेषां हिमिका प्रोच्यते ज्वरः ।
शार्दूलेष्वपि वै विप्राः श्रमो ज्वर
इहोच्यते ॥ ३०.३००॥

मानुषेषु तु सर्वज्ञ ज्वरो नामैष कीर्तितः
।
मरणे जन्मनि तथा मध्ये च विशते सदा ॥ ३०.३०१॥

एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः ।
नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः
॥ ३०.३०२॥

इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः
सुसमाहितो नरः ।
विमुक्तरोगः स नरो मुदा युतो लभेत कामान् स
यथामनीषितान् ॥ ३०.३०३॥

दक्षप्रोक्तं स्तवञ्चापि कीर्त्तयेद्यः
शृणोति वा ।
नाशुभं प्राप्नुयात्
किञ्चिद्दीर्घञ्चायुरवाप्नुयात् ॥ ३०.३०४॥

यथा सर्वेषु देवेषु वरिष्ठो योगवान् हरः ।

Page 451 of 523

तथा स्तवो वरिष्ठोऽयं स्तवानां
ब्रह्मनिर्मितः ॥ ३०   .३०५॥

यशोराज्यसुखैश्वर्यवित्तायुर्धनकाङ्क्षिभ
िः ।
स्तोतव्यो भक्तिमास्थाय विद्याकामैश्च
यत्नतः ॥ ३०   .३०६॥

व्याधितो दुःखितो दीनश्चौरत्रस्तो
भयार्दितः ।
राजकार्यनियुक्तो वा मुच्यते महतो भयात् ॥
३०.३०७॥

अनेन चैव देहेन गणानां स गणाधिपः ।
इह लोके सुखं प्राप्य गण एवोपपद्यते ॥
३०.३०८॥

न च यक्षाः पिशाचा वा न नागा न विनायकाः ।
कुर्युर्विघ्नं गृहे तस्य यत्र संस्तूयते
भवः ॥ ३० .३०९॥

शृणुयाद्वा इदं नारी सुभक्त्या
ब्रह्मचारिणी ।
पितृभिर्भर्तृपक्षाभ्यां पूज्या भवति
देववत् ॥ ३०   .३१०॥

Page 453 of 523

शृणुयाद्वा इदं सर्वं कीर्त्तयेद्वाप्यभीक्ष्णशः ।
तस्य सर्वाणि कार्याणि सिद्धिं
गच्छन्त्यविघ्नतः ॥ ३०.३११॥

मनसा चिन्तितं यच्च यच्च वाचाप्युदाहृतम् ।
सर्वं सम्पद्यते तस्य
स्तवनस्यानुकीर्त्तनात् ॥ ३०.३१२॥

देवस्य सगुहस्याथ देव्या नन्दीश्वरस्य तु ।
बलिं विभवतः कृत्वा दमेन नियमेन च ॥ ३०.३१३॥

ततः स युक्तो गृह्णीयान्नामान्याशु यथाक्रमम् ।
ईप्सितान् लभतेऽत्यर्थं कामान् भोगांश्च
मानवः ।
मृतश्च स्वर्गमाप्नोति स्त्रीसहस्रपरिवृतः ॥ ३०.३१४॥

सर्व कर्मसु युक्तो वा युक्तो वा सर्वपातकैः ।
पठन् दक्षकृतं स्तोत्रं सर्वपापैः प्रमुच्यते ।

Page 453 of 523

Page 454 of 523

मृतश्च गणसालोक्यं पूज्यमानः सुरासुरैः ॥
३०.३१५॥

वृषेव विधियुक्तेन विमानेन विराजते ।
आभूतसम्प्लवस्थायी रुद्रस्यानुचरो भवेत् ॥
३०.३१६॥

इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ।
नैतद्वेदयते कश्चिन्नेदं श्राव्यन्तु
कस्यचित् ॥ ३०.३१७॥

श्रुत्वैतत्परमं गुह्यं येऽपि स्युः
पापकारिणः ।
वैश्याः स्त्रियश्च शूद्राश्च
रुद्रलोकमवाप्नुयुः ॥ ३०.३१८॥

श्रावयेद्यस्तु विप्रेभ्यः सदा पर्वसु
पर्वसु ।
रुद्रलोकमवाप्नोति द्विजो वै नात्र संशयः ॥
३०.३१९॥

इति श्रीमहापुराणे वायुप्रोक्ते
दक्षशापवर्णनं नाम त्रिंशोऽध्यायः ॥ ३०॥
॥ वेदसार श्रीशिवसहस्रनामस्तोत्रम् ॥

Page 454 of 523

Page 455 of 523

पद्मपुराणान्तर्गतं वेदसाराख्यं

॥ श्रीगणेशाय नमः ॥

॥ श्रीउमामहेश्वराभ्यां नमः ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं
चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये
॥ १॥

ईश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानमनाधारमविक्रियम् ॥ २॥

अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रियम् ।
अम्बिकापतिमीशानमनीशं प्रणमाम्यहम् ॥ ३॥

ईशमाद्यन्तनिर्मुक्तमतिशोभनमादरात् ।
नमामि विग्रहं साम्बं संसारामयभेषजम् ॥ ४॥

व्यास उवाच ।
एकदा मुनयः सर्वे द्वारकां द्रष्टुमागताः ।
वासुदेवं च सोत्कण्ठाः कृष्णदर्शनलालसाः ॥
५॥

Page 455 of 523

Page 456 of 523

ततः स भगवान्प्रीतः पूजां चक्रे यथाविधि ।
तेषामाशीस्ततो गृह्य बहुमानपुरःसरम् ॥ ६॥

तैः पृष्टः कथयामास कुमारप्रभवं च यत् ।
चरितं भूमिभारघ्नं लोकानन्दकरं परम् ॥ ७॥

मार्कण्डेयमुखाः सर्वे
माध्याह्निकक्रियोत्थिताः ।
कृष्णः स्नानमथो चक्रे मृदक्षतकुशादिभिः ॥
८॥

पीताम्बरं त्रिपुण्ड्रं च धृत्वा
रुद्राक्षमालिकाः ।
सूर्योपस्थानं सन्ध्यां च
स्मृतिधर्ममनुस्मरन् ॥ ९॥

शिवपूजां ततः कृष्णो गन्धपुष्पाक्षतादिभिः
।
चकार विधिवद्भक्त्या नमस्कारयुतां शुभाम्
॥ १०॥

जय शङ्कर सोमेश रक्ष रक्षेति चाब्रवीत् ।
जजाप शिवसाहस्रं भुक्तिमुक्तिप्रदं विभोः
।
अनन्यमानसः शान्तः पद्मासनगतः शुचिः ॥ ११॥

Page 456 of 523

Page 457 of 523

ततस्ते विस्मयापन्ना दृष्ट्वा कृष्णविचेष्टितम् । मार्कण्डेयोऽवदत्कृष्णं बहुशो मुनिसम्मतम् ॥ १२॥

मार्कण्डेय उवाच
त्वं विष्णुः कमलाकान्तः परमात्मा
जगद्गुरुः । त्वं कृष्णः
भवत्पूज्यः कथं शम्भुरेतत्सर्वं वदस्व मे ॥
१३॥

व्यास उवाच
अथ ते मुनयः सर्वे मार्कण्डेयं समार्चयन् ।
वचोभिर्वासुदेवश्च पृष्टः साधु त्वयेति च ॥
१४॥

श्रीकृष्ण उवाच
साधु साधु मुने पृष्टं हिताय सकलस्य च ॥ १५॥

अज्ञातं तव नास्त्येव तथापि च वदाम्यहम् ।
दैवतं सर्वलोकानां सर्वकारणकारणम् ॥ १६॥
सर्वदेवानां
ज्योतिर्यत्परमानन्दं सावधानमतिः शृणु ।

Page 457 of 523

Page 458 of 523

विश्वपावनमीशानं गुणातीतमजं परम् ॥ १७॥
विश्वसाधनमीशानं
जगतस्तस्थुषो ह्यात्मा मम मूलं महामुने ।
यो देवः सर्वदेवानां ध्येयः पूज्यः सदाशिवः
॥ १८॥

स शिवः स महादेवः शङ्करश्च निरञ्जनः ।
तस्मान्नान्यः परो देवस्त्रिषु लोकेषु
विद्यते ॥ १९॥

सर्वज्ञः सर्वगः शक्तः सर्वात्मा
सर्वतोमुखः ।
पठ्यते सर्वसिद्धान्तैर्वेदान्तैर्यो
मुनीश्वराः ॥ २०॥

तस्मिन्भक्तिर्महादेवे मम धातुश्च निर्मला
।
महेशः परमं ब्रह्म शान्तः सूक्ष्मः
परात्परः ॥ २१॥

सर्वान्तरः सर्वसाक्षी चिन्मयस्तमसः परः ।
निर्विकल्पो निराभासो निःसङ्गो निरुपद्रवः
॥ २२॥

निर्लेपः सकलाध्यक्षो महापुरुष ईश्वरः ।

Page 458 of 523

Page 459 of 523

तस्य चेच्छाभवत्पूर्वं
जगत्स्थित्यन्तकारिणी ॥ २३॥

वामाङ्गादभवं तस्य सोऽहं विष्णुरिति
स्मृतः ।
जनयामास धातारं दक्षिणाङ्गात्सदाशिवः ॥
२४॥

मध्यतो रुद्रमीशानं कालात्मा परमेश्वरः ।
तपः कुर्वन्तु भो वत्सा अब्रवीदिति तान् शिवः ॥ २५॥ तपस्तपन्तु भो
ततस्ते शिवमात्मानं प्रोचुः संयतमानसाः ।
स्तुत्वा तु विधिवत्स्तोत्रैः प्रणम्य च पुनः पुनः ॥ २६॥

ब्रह्मविष्णुमहेश्वरा ऊचुः
तपः केन प्रकारेण कर्तव्यं परमेश्वर ।
ब्रूहि सर्वमशेषेण स्वात्मानं वेत्सि
नापरः ॥ २७॥

श्रीमहादेव उवाच Var शिव उवाच
कायेन मनसा वाचा ध्यानपूजाजपादिभिः ।
कामक्रोधादिरहितं तपः कुर्वन्तु भो सुराः ॥
२८॥

Page 459 of 523

Page 460 of 523

देवा ऊचुः
त्वया यत्कथितं शम्भो
दुर्ज्ञेयमजितात्मभिः ।
सौम्योपायमतो ब्रह्मन्वद कारुण्यवारिधे ॥
२९॥

श्रीशङ्कर उवाच Var शिव उवाच
शृणुध्वं सर्वपापघ्नं भुक्तिमुक्तिप्रदं
नृणाम् ।
सहस्रनामसद्विद्यां जपन्तु मम सुव्रताः ॥
३०॥

यया संसारमग्नानां मुक्तिर्भवति शाश्वती ।
शृण्वन्तु तद्विधानं हि महापातकनाशनम् ॥
३१॥
पठतां शृण्वतां सद्यो मुक्तिः
स्यादनपायिनी ।
ब्रह्मचारी कृतस्नानः शुक्लवासा
जितेन्द्रियः ॥ ३२॥

भस्मधारी मुनिर्मौनी पद्मासनसमन्वितः ।
ध्यात्वा मां सकलाधीशं निराकारं
निरीश्वरम् ॥ ३३॥

पार्वतीसहितं शम्भुं जटामुकुटमण्डितम् ।

Page 460 of 523

दधानं चर्म वैयाघ्रं चन्द्रार्धकृतशेखरम्
॥ ३४॥ वसानं चर्म
त्र्यम्बकं वृषभारूढं
कृत्तिवाससमुज्ज्वलम् ।
सुरार्चितपदद्वन्द्वं दिव्यभोगं
सुसुन्दरम् ॥ ३५॥

बिभ्राणं सुप्रसन्नं च कुठारवरदाभयम् ।
दुर्दर्शं कमलासीनं नागयज्ञोपवीतिनम् ॥
३६॥ दुरन्तं
विश्वकायं चिदानन्दं शुद्धमक्षरमव्ययम् ।
सहस्रशिरसं शर्वमनन्तकरसंयुतम् ॥ ३७॥

Var शम्भुमनन्तकरसंयुतम्
सहस्रचरणं दिव्यं सोमसूर्याग्निलोचनम् ।
जगद्योनिमजं ब्रह्म शिवमाद्यं सनातनम् ॥
३८॥

दंष्ट्राकरालं दुष्प्रेक्ष्यं
सूर्यकोटिसमप्रभम् ।
निशाकरकराकारं भेषजं भवरोगिणाम् ॥ ३९॥

पिनाकिनं विशालाक्षं पशूनां पतिमीश्वरम् ।
कालात्मानं कालकालं देवदेवं महेश्वरम् ॥
४०॥

Page 462 of 523

ज्ञानवैराग्यसम्पन्नं योगानन्दकरं परम् ।
योगानन्दमयं
शाश्वतैश्वर्यसम्पन्नं
महायोगीश्वरेश्वरम् ॥ ४१॥

समस्तशक्तिसंयुक्तं पुण्यकायं दुरासदम् ।
तारकं ब्रह्म सम्पूर्णमणीयांसं महत्तरम् ॥
४२॥ महत्तमम्
यतीनां परमं ब्रह्म व्रतिनां तपसः फलम् ।
संयमीहृत्समासीनं तपस्विजनसंवृतम् ॥ ४३॥

विधीन्द्रविष्णुनमितं मुनिसिद्धनिषेवितम्
।
महादेवं महात्मानं देवानामपि दैवतम् ॥ ४४॥
महानन्दं
शान्तं पवित्रमोङ्कारं ज्योतिषां
ज्योतिमुत्तमम् ।
इति ध्यात्वा शिवं चित्ते रक्षार्थं कवचं
न्यसेत् ॥ ४५॥

Var ततः पठेद्धि कवचं मम सर्वाघनाशनम् ॥

कवचं
शङ्करो मे शिरः पातु ललाटं भाललोचनः ।

Page 462 of 523

विश्वचक्षुर्दृशौ पातु भ्रुवौ रुद्रो
ममावतु ॥ ४६॥

Var विश्वचक्षुर्दृशौ पातु रुद्रः पातु
भ्रुवौ मम ॥

गण्डौ पातु महेशानः श्रुती रक्षतु पूर्वजः
।
कपोलौ मे महादेवः पातु नासां सदाशिवः ॥ ४७॥

मुखं पातु हविर्भोक्ता ओष्ठौ पातु महेश्वरः
।
दन्तान् रक्षतु देवेशस्तालू सोमकलाधरः ॥
४८॥

रसनां परमानन्दः पातु शङ्खं शिवाप्रियः ।
चुबुकं पातु मे शम्भुः श्मश्रुं
शत्रुविनाशानः ॥ ४९॥

कूर्चं पातु भवः कण्ठं नीलकण्ठोऽवतु
ध्रुवम् ।
स्कन्धौ स्कन्दगुरुः पातु बाहू पातु
महाभुजः ॥ ५०॥ स्कन्धौ स्कन्दपिता
उपबाहू महावीर्यः करौ विबुधसत्तमः ।

Page 464 of 523

अङ्गुलीः पातु पञ्चास्यः पर्वाणि च
सहस्रपात् ॥ ५१॥

हृदयं पातु सर्वात्मा स्तनौ पातु पितामहः ।
उदरं हुतभुक्पातु मध्यं पातु मध्यमेश्वरः ॥
५२॥

कुक्षिं पातु भवानीशः पृष्ठं पातु
कुलेश्वरः ।
प्राणान्मे प्राणदः पातु नाभिं भीमः कटिं
विभुः ॥ ५३॥

सक्थिनी पातु मे भर्गो जानुनी भुवनाधिपः ।
जङ्घे पुररिपुः पातु चरणौ भवनाशनः ॥ ५४॥

शरीरं पातु मे शर्वो बाह्यमाभ्यन्तरं शिवः
।
इन्द्रियाणि हरः पातु सर्वत्र जयवर्धनः ॥
५५॥

प्राच्यां दिशि मृडः पातु दक्षिणे यमसूदनः
। पूर्वे मम मृडः
वारुण्यां सलिलाधीश उदीच्यां मे महीधरः ॥
५६॥

Page 464 of 523

Page 465 of 523

ईशान्यां पातु भूतेश आग्नेय्यां रविलोचनः ।
नैरृत्यां भूतभृत्पातु वायव्यां बलवर्धनः
॥ ५७॥

ऊर्ध्वं पातु मखद्वेषी ह्यधः संसारनाशनः ।
सर्वतः सुखदः पातु बुद्धिं पातु सुलोचनः ॥
५८॥

इति कवचम् ।

एवं न्यासविधिं कृत्वा साक्षाच्छम्भुमयो
भवेत् ।
नमो हिरण्यबाह्वादि पठेन्मन्त्रं तु
भक्तितः ॥ ५९॥

सद्योजातादिभिर्मन्त्रैर्नमस्कुर्यात्सदा
शिवम् ।
ततः सहस्रनामेदं पठितव्यं मुमुक्षुभिः ॥
६०॥

सर्वकार्यकरं पुण्यं महापातकनाशनम् ।
सर्वगुह्यतमं दिव्यं सर्वलोकहितप्रदम् ॥
६१॥

Page 465 of 523

Page 466 of 523

मन्त्राणां परमो मन्त्रो भवदुःखषडूर्मिहृत् ।
ओं नमः शम्भवे चेति षड्भिर्मन्त्रैः षडङ्गकम् ।
न्यासं कृत्वा तु विधिवत्सम्यग्ध्यानं ततश्चरेत् ॥ ६२॥

विनियोगः (न्यास)
ॐ अस्य
श्रीवेदसाराख्यपरमदिव्यशिवसहस्रनामस्तोत् रमन्त्रस्य
श्रीभगवान् नारायण ऋषिः । अनुष्टुप् छन्दः ।
परमात्मा श्रीमहादेवो देवता । नमः इति बीजम् ।
शिवायेति शक्तिः । चैतन्यमिति कीलकम् ।
श्रीमहादेवप्रीत्यर्थे एवं प्रसादसिद्धयर्थे जपे विनियोगः ।
अथ न्यासः ।
॥ अथ करन्यासः ॥

ॐ नमः शम्भवे च अङ्गुष्ठाभ्यां नमः ।
ॐ नमः मयोभवे च तर्जनीभ्यां नमः ।
ॐ नमः शङ्कराय च मध्यमाभ्यां नमः ।
ॐ नमः मयस्कराय च अनामिकाभ्यां नमः ।

Page 466 of 523

Page 467 of 523

ॐ नमः शिवाय च कनिष्ठिकाभ्यां नमः ।
ॐ नमः शिवतराय च करतलकरपृष्ठाभ्यां नमः ॥

॥ अथ हृदयाद्यङ्गन्यासः ॥

ॐ नमः शम्भवे च हृदयाय नमः ।
ॐ नमः मयोभवे च शिरसे स्वाहा ।
ॐ नमः शङ्कराय च शिखायै वषट् ।
ॐ नमः मयस्कराय च कवचाय हुम् ।
ॐ नमः शिवाय च नेत्रत्रयाय वौषट् ।
ॐ नमः शिवतराय च अस्त्राय फट् ॥

भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

। अथ ध्यानम् ।
कैलासाद्रिनिभं शशाङ्ककलया स्फूर्जज्जटामण्डलं
नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम् । मुद्राटङ्ककुरङ्गजानुविलसद्बाहुं प्रसन्नाननं
कक्ष्याबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम् ॥ १॥

Page 467 of 523

Page 468 of 523

शुद्धस्फटिकसङ्काशं त्रिनेत्रं
चेन्दुशेखरम् ।
पञ्चवक्त्रं महाबाहुं दशबाहुसमन्वितम् ॥
२॥

भस्मोद्धूलितसर्वाङ्गं नागाभरणभूषितम् ।
परिपूर्णं परानन्दं परं ज्योतिः परात्परम्
॥ ३॥

पराशक्त्या श्रिया सार्धं परमानन्दविग्रहम् ।
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
श्रीरुद्रं सच्चिदानन्दं ध्यायेत्
सर्वात्मसिद्धये ॥ ४॥

॥ अथ लमित्यादि पञ्चपूजा ॥

लं पृथिव्यात्मने गन्धं समर्पयामि ।
हं आकाशात्मने पुष्पैः पूजयामि ।
यं वाय्वात्मने धूपमाघ्रापयामि ।
रं अग्न्यात्मने दीपं दर्शयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं निवेदयामि ।
सं सर्वात्मने सर्वोपचारपूजां समर्पयामि ॥

Page 468 of 523

Page 469 of 523

अथ सहस्रनामस्तोत्रम् ॥

ॐ नमः पराय देवाय शङ्कराय महात्मने ।
कामिने नीलकण्ठाय निर्मलाय कपर्दिने ॥ १॥

निर्विकल्पाय शान्ताय निरहङ्कारिणे नमः ।
अनर्घ्याय विशालाय सालहस्ताय ते नमः ॥ २॥
अनर्घाय
निरञ्जनाय शर्वाय श्रुताय च परात्मने ।
नमः शिवाय भर्गाय गुणातीताय वेधसे ॥ ३॥

महादेवाय पीताय पार्वतीपतये नमः । Var
वीताय
केवलाय महेशाय विशुद्धाय बुधात्मने ॥ ४॥

कैवल्याय सुदेहाय निःस्पृहाय स्वरूपिणे ।
नमः सोमविभूषाय कालायामिततेजसे ॥ ५॥

अजिराय जगत्पित्रे जनकाय पिनाकिने ।
निराधाराय सिंहाय मायातीताय ते नमः ॥ ६॥

बीजाय सर्पभूषाय पशूनां पतये नमः ।
पुरन्दराय भद्राय पुरुषाय महीयसे ॥ ७॥

महासन्तोषरूपाय ज्ञानिने शुद्धबुद्धये ।

Page 469 of 523

नमो वृद्धस्वरूपाय तपसे परमात्मने ॥ ८॥

पूर्वजाय सुरेशाय ब्रह्मणेऽनन्तमूर्तये ।
निरक्षराय सूक्ष्माय कैलासपतये नमः ॥ ९॥

निरामयाय कान्ताय निरातङ्काय ते नमः ।
निरालम्बाय विश्वाय नित्याय यतये नमः ॥ १०॥

आत्मारामाय भव्याय पूज्याय परमेष्ठिने ।
विकर्तनाय सूर्म्याय शम्भवे विश्वरूपिणे ॥
११॥

ताराय हंसनाथाय प्रतिसर्याय ते नमः ।
परावरेशरुद्राय भवायालङ्घ्यशक्तये ॥ १२॥

इन्द्रध्वंसनिधीशाय कालहन्त्रे मनस्विने ।
विश्वमात्रे जगद्धात्रे जगन्नेत्रे नमो
नमः ॥ १३॥

जटिलाय विरागाय पवित्राय मृडाय च ।
निरवद्याय पात्राय स्तेनानां पतये नमः ॥
१४॥

नादाय रविनेत्राय व्योमकेशाय ते नमः ।
चतुर्भोगाय साराय योगिनेऽनन्तमायिने ॥ १५॥

Var योगिनेऽनन्तगामिने
धर्मिष्ठाय वरिष्ठाय पुरत्रयविघातिने ।
गरिष्ठाय गिरीशाय वरदाय नमो नमः ॥ १६॥

व्याघ्रचर्माम्बरायाथ दिशावस्त्राय ते नमः
। दिग्वस्त्राय च
परमप्रेममन्त्राय प्रथमाय सुचक्षुषे ॥ १७॥

आद्याय शूलहस्ताय शितिकण्ठाय तेजसे । ते
नमः
उग्राय वामदेवाय श्रीकण्ठाय नमो नमः ॥ १८॥

विश्वेश्वराय सूर्याय गौरीशाय वराय च ।
मृत्युञ्जयाय वीराय वीरभद्राय ते नमः ॥ १९॥

कामनाशाय गुरवे मुक्तिनाथाय ते नमः ।
विरूपाक्षाय सूताय वह्निनेत्राय ते नमः ॥
२०॥

जलन्धरशिरच्छेत्रे हविषे हितकारिणे ।
महाकालाय वैद्याय सघृणेशाय ते नमः ॥ २१॥

नम ओङ्काररूपाय सोमनाथाय ते नमः ।
रामेश्वराय शुचये भौमेशाय नमो नमः ॥ २२॥

त्र्यम्बकाय निरीहाय केदाराय नमो नमः ।
गङ्गाधराय कवये नागनाथाय ते नमः ॥ २३॥

भस्मप्रियाय सूद्याय लक्ष्मीशाय नमो नमः ।
पूर्णाय भूतपतये सर्वज्ञाय दयालवे ॥ २४॥

धर्माय धनदेशाय गजचर्माम्बराय च ।
भालनेत्राय यज्ञाय श्रीशैलपतये नमः ॥ २५॥

कृशानुरेतसे नीललोहिताय नमो नमः ।
अन्धकासुरहन्त्रे च पावनाय बलाय च ॥ २६॥

चैतन्याय त्रिनेत्राय दक्षनाशकराय च ।
नमः सहस्रशिरसे जयरूपाय ते नमः ॥ २७॥

सहस्रचरणायाथ योगिहृत्पद्मवासिने ।
सद्योजाताय वन्द्याय सर्वदेवमयाय च ॥ २८॥

आमोदाय प्रगल्भाय गायत्रीवल्लभाय च ।
व्योमाकाराय विप्राय नमो विप्रप्रियाय च ॥
२९॥

अघोराय सुवेषाय श्वेतरूपाय ते नमः ।

विद्वत्तमाय चित्राय विश्वग्रासाय नन्दिने
॥ ३०॥

अधर्मशत्रुरूपाय दुन्दुभेर्मर्दनाय च ।
अजातशत्रवे तुभ्यं जगत्प्राणाय ते नमः ॥
३१॥

नमो ब्रह्मशिरश्छेत्रे पञ्चवक्त्राय
खड्गिने ।
नमस्ते हरिकेशाय पञ्चवर्णाय वज्रिणे ॥ ३२॥

नमः पञ्चाक्षरायाथ गोवर्धनधराय च ।
प्रभवे सर्वलोकानां कालकूटविषादिने ॥ ३३॥

सिद्धेश्वराय सिद्धाय सहस्रवदनाय च ।
नमः सहस्रहस्ताय सहस्रनयनाय च ॥ ३४॥

सहस्रमूर्तये तुभ्यं जिष्णवे जितशत्रवे ।
काशीनाथाय गेह्याय नमस्ते विश्वसाक्षिणे ॥
३५॥

हेतवे सर्वजीवानां पालकाय नमो नमः ।
जगत्संहारकाराय त्रिधावस्थाय ते नमः ॥ ३६॥

एकादशस्वरूपाय नमस्ते वह्निमूर्तये ।

Page 474 of 523

नरसिंहमहादर्पघातिने शरभाय च ॥ ३७॥

भस्माभ्यक्ताय तीर्थाय जाह्नवीजनकाय च ।
वल्लभाय
देवदानवदैत्यानां गुरवे ते नमो नमः ॥ ३८॥

दलिताञ्जनभासाय नमो वायुस्वरूपिणे ।
स्वेच्छामन्त्रस्वरूपाय प्रसिद्धाय नमो नमः ॥ ३९॥

Var प्रसिद्धायात्मने नमः
वृषध्वजाय गोष्ठ्याय
जगद्यन्त्रप्रवर्तिने ।
अनाथाय प्रजेशाय विष्णुगर्वहराय च ॥ ४०॥

हरेर्विधातृकलहनाशकाय ते नमो नमः ।
Var हरिर्विधातृकलहनाशकाय
नमस्ते दशहस्ताय गगनाय नमो नमः ॥ ४१॥

कैवल्यफलदात्रे च परमाय नमो नमः ।
ज्ञानाय ज्ञानगम्याय घण्टारवप्रियाय च ॥
४२॥

पद्मासनाय पुष्टाय निर्वाणाय नमो नमः ।
अयोनये सुदेहाय ह्युत्तमाय नमो नमः ॥ ४३॥

Page 474 of 523

अन्तकालाधिपतये विशालाक्षाय ते नमः ।
कुबेरबन्धवे तुभ्यं सोमाय सुखदायिने ॥ ४४॥

अमृतेश्वररूपाय कौबेराय च धन्विने । Var
कौबेराय नमो नमः
प्रियम्वदसमर्थाय वन्दिने विभवाय च ॥ ४५॥

गिरिशाय गिरित्राय गिरिशन्ताय ते नमः ।
पारिजाताय बृहते पञ्चयज्ञाय ते नमः ॥ ४६॥

तरुणाय विशिष्टाय बालरूपधराय च ।
जीवितेशाय तुष्टाय पुष्टानां पतये नमः ॥
४७॥

भवहेत्यै हिरण्याय कनिष्ठाय नमो नमः ।
मध्यमाय विधात्रे च ते शूराय सुभगाय च ॥ ४८॥

आदित्यतापनायाथ नमस्ते रुद्रमन्यवे ।
महाह्रदाय ह्रस्वाय वामनाय नमो नमः ॥ ४९॥

नमस्तत्पुरुषायाथ चतुर्हस्ताय मायिने Var
ते नमः ।
नमो धूर्जटये तुभ्यं जगदीशाय ते नमः ॥ ५०॥

जगन्नाथस्वरूपाय लीलाविग्रहरूपिणे ।
अनघाय नमस्तुभ्यममराय नमो नमः ॥ ५१॥

अमृताय नमस्तुभ्यमच्छात्राय नमो नमः ।
लोकाध्यक्षाय वै तुभ्यमनादिनिधनाय च ॥ ५२॥

व्यक्तेतराय व्यक्ताय नमस्ते परमाणवे ।
लघुस्थूलस्वरूपाय नमः परशुधारिणे ॥ ५३॥

नमः खट्वाङ्गहस्ताय नागहस्ताय ते नमः ।
वरदाभयहस्ताय घण्टाहस्ताय ते नमः ॥ ५४॥

घस्मराय नमस्तुभ्यमजिताय नमो नमः ।
अणिमादिगुणेशाय पञ्चब्रह्ममयाय च ॥ ५५॥

पुरातनाय शुद्धाय बलप्रमथनाय च ।
पुण्योदयाय पद्माय विरक्ताय नमो नमः ॥ ५६॥

उदाराय विचित्राय विचित्रगतये नमः ।
वाग्विशुद्धाय चितये निर्गुणाय नमो नमः ॥
५७॥

परमेशाय शेषाय नमः पद्मधराय च ।
महेन्द्राय सुशीलाय करवीरप्रियाय च ॥ ५८॥

महापराक्रमायाथ नमस्ते कालरूपिणे ।
विष्टरश्रवसे लोकचूडारत्नाय ते नमः ॥ ५९॥

साम्राज्यकल्पवृक्षाय करुणाय नटाय च । Var
नमस्तुभ्यं त्विषीमते
अनर्घ्याय वरेण्याय वज्ररूपाय ते नमः ॥ ६०॥

Var वरेण्याय नमस्तुभ्यं यज्ञरूपाय ते नमः
परमज्योतिषे पद्मगर्भाय सलिलाय च ।
तत्त्वाधिकाय सर्गाय नमो दीर्घाय
स्रग्विणे ॥ ६१॥

नमस्ते पाण्डुरङ्गाय घोराय ब्रह्मरूपिणे ।
निष्कलाय नमस्तुभ्यं प्रपथ्याय नमो नमः ॥
६२॥ सामगानप्रियाय च
नमो जयाय क्षेत्राय क्षेत्राणां पतये नमः ।
कलाधराय पूताय पञ्चभूतात्मने नमः ॥ ६३॥

अनिर्विण्णाय तथ्याय पापनाशकराय च ।
विश्वतश्चक्षुषे तुभ्यं
मन्त्रिणेऽनन्तरूपिणे ॥ ६४॥

सिद्धसाधकरूपाय मेदिनीरूपिणे नमः ।
अगण्याय प्रतापाय सुधाहस्ताय ते नमः ॥ ६५॥

श्रीवल्लभायेध्रियाय स्थाणवे मधुराय च ।
उपाधिरहितायाथ नमः सुकृतराशये ॥ ६६॥

नमो मुनीश्वरायाथ शिवानन्दाय ते नमः ।
रिपुघ्नाय नमस्तेजोराशयेऽनुत्तमाय च ॥ ६७॥

चतुर्मूर्तिवपुःस्थाय
नमोबुद्धीन्द्रियात्मने ।
उपद्रवहरायाथ प्रियसन्दर्शनाय च ॥ ६८॥

भूतनाथाय मूलाय वीतरागाय ते नमः ।
नैष्कर्म्याय विरूपाय षट्चक्राय विशुद्धये
॥ ६९॥

कुलेशायावनीभर्त्रे भुवनेशाय ते नमः ।
हिरण्यबाहवे जीववरदाय नमो नमः ॥ ७०॥

आदिदेवाय भाग्याय चन्द्रसञ्जीवनाय च ।
हराय बहुरूपाय प्रसन्नाय नमो नमः ॥ ७१॥

आनन्दपूरितायाथ कूटस्थाय नमो नमः ।
नमो मोक्षफलायाथ शाश्वताय विरागिणे ॥ ७२॥

यज्ञभोक्त्रे सुषेणाय दक्षयज्ञविघातिने ।

नमः सर्वात्मने तुभ्यं विश्वपालाय ते नमः ॥
७३॥

विश्वगर्भाय गर्भाय देवगर्भाय ते नमः ।
संसारार्णवमग्नानां समुद्धरणहेतवे ॥ ७४॥

मुनिप्रियाय खल्याय मूलप्रकृतये नमः ।
समस्तसिद्धये तेजोमूर्तये ते नमो नमः ॥ ७५॥

आश्रमस्थापकायाथ वर्णिने सुन्दराय च ।
मृगबाणार्पणायाथ शारदावल्लभाय च ॥ ७६॥

विचित्रमायिने तुभ्यमलङ्करिष्णवे नमः ।
बर्हिर्मुखमहादर्पमथनाय नमो नमः ॥ ७७॥

नमोऽष्टमूर्तये तुभ्यं निष्कलङ्काय ते नमः
।
नमो हव्याय भोज्याय यज्ञनाथाय ते नमः ॥ ७८॥

नमो मेध्याय मुख्याय विशिष्टाय नमो नमः ।
अम्बिकापतये तुभ्यं महादान्ताय ते नमः ॥
७९॥

सत्यप्रियाय सत्याय प्रियनित्याय ते नमः ।

Page 480 of 523

नित्यतृप्ताय वेदित्रे मृदुहस्ताय ते नमः ॥
८०॥

अर्धनारीश्वरायाथ कुठारायुधपाणये ।
वराहभेदिने तुभ्यं नमः कङ्कालधारिणे ॥ ८१॥

महार्थाय सुसत्त्वाय कीर्तिस्तम्भाय ते
नमः ।
नमः कृतागमायाथ वेदान्तपठिताय च ॥ ८२॥

अश्रोत्राय श्रुतिमते बहुश्रुतिधराय च ।
अघ्राणाय नमस्तुभ्यं गन्धावघ्राणकारिणे ॥
८३॥

पादहीनाय वोढ्रे च सर्वत्रगतये नमः ।
त्र्यक्षाय जननेत्राय नमस्तुभ्यं
चिदात्मने ॥ ८४॥

रसज्ञाय नमस्तुभ्यं रसनारहिताय च ।
अमूर्तायाथ मूर्ताय सदसस्पतये नमः ॥ ८५॥

जितेन्द्रियाय तथ्याय
परञ्ज्योतिःस्वरूपिणे ।
नमस्ते सर्वमर्त्यानामादिकर्त्रे
भुवन्तये ॥ ८६॥

Page 480 of 523

सर्गस्थितिविनाशानां कर्त्रे ते प्रेरकाय
च ।
नमोऽन्तर्यामिणे सर्वहृदिस्थाय नमो नमः ॥
८७॥

चक्रभ्रमणकर्त्रे ते पुराणाय नमो नमः ।
वामदक्षिणहस्तोत्थलोकेश हरिशालिने ॥ ८८॥

नमः सकलकल्याणदायिने प्रसवाय च ।
स्वभावोदारधीराय सूत्रकाराय ते नमः ॥ ८९॥

विषयार्णवमग्नानां समुद्धरणसेतवे ।
अस्नेहस्नेहरूपाय वार्तातिक्रान्तवर्तिने
॥ ९०॥

यत्र सर्वं यतः सर्वं सर्वं यत्र नमो नमः ।
नमो महार्णवायाथ भास्कराय नमो नमः ॥ ९१॥

भक्तिगम्याय भक्तानां सुलभाय नमो नमः ।
दुष्प्रधर्षाय दुष्टानां विजयाय
विवेकिनाम् ॥ ९२॥

अतर्किताय लोकाय सुलोकाय नमो नमः ।
पूरयित्रे विशेषाय शुभाय च नमो नमः ॥ ९३॥

नमः कर्पूरदेहाय सर्पहाराय ते नमः ।
नमः संसारपाराय कमनीयाय ते नमः ॥ ९४॥

वह्निदर्पविघाताय वायुदर्पविघातिने ।
जरातिगाय वीर्याय नमस्ते विश्वव्यापिने ॥
९५॥

सूर्यकोटिप्रतीकाश निष्क्रियाय नमो नमः ।
चन्द्रकोटिसुशीताय विमलाय नमो नमः ॥ ९६॥

नमो गूढस्वरूपाय दिशां च पतये नमः ।
नमः सत्यप्रतिज्ञाय समस्ताय समाधये ॥ ९७॥

एकरूपाय शून्याय विश्वनाभिह्रदाय च ।
सर्वोत्तमाय कूल्याय प्राणिनां सुहृदे नमः
॥ ९८॥ कालाय
अन्नानां पतये तुभ्यं चिन्मात्राय नमो नमः
।
ध्येयाय ध्यानगम्याय ध्यानरूपाय ते नमः ॥
९९॥

नमस्ते शाश्वतैश्वर्यविभवाय नमो नमः ।
वरिष्ठाय धर्मगोप्त्रे निधनायाग्रजाय च ॥
१००॥

योगीश्वराय योगाय योगगम्याय ते नमः ।
नमः प्राणेश्वरायाथ सर्वशक्तिधराय च ॥ १०१॥

धर्माधाराय धन्याय पुष्कलाय नमो नमः ।
महेन्द्रोपेन्द्रचन्द्रार्कनमिताय नमो
नमः ॥ १०२॥

महर्षिवन्दितायाथ प्रकाशाय सुधर्मिणे ।
नमो हिरण्यगर्भाय नमो हिरण्मयाय च ॥ १०३॥

जगद्बीजाय हरये सेव्याय क्रतवे नमः ।
आधिपत्याय कामाय यशसे ते प्रचेतसे ॥ १०४॥

नमो ब्रह्ममयायाथ सकलाय नमो नमः ।
नमस्ते रुक्मवर्णाय नमस्ते ब्रह्मयोनये ॥
१०५॥

योगात्मने त्वभीताय दिव्यनृत्याय ते नमः ।
जगतामेकबीजाय मायाबीजाय ते नमः ॥ १०६॥

सर्वहृत्सन्निविष्टाय ब्रह्मचक्रभ्रमाय च
।
ब्रह्मानन्दाय महते ब्रह्मण्याय नमो नमः ॥
१०७॥

भूमिभारार्तिसंहर्त्रे विधिसारथये नमः ।
हिरण्यगर्भपुत्राणां प्राणसंरक्षणाय च ॥
१०८॥

दुर्वाससे षड्विकाररहिताय नमो नमः ।
नमो देहार्धकान्ताय षडूर्मिरहिताय च ॥ १०९॥

प्रकृत्यै भवनाशाय ताम्राय परमेष्ठिने ।
अनन्तकोटिब्रह्माण्डनायकाय नमो नमः ॥ ११०॥

एकाकिने निर्मलाय द्रविणाय दमाय च ।
नमस्त्रिलोचनायाथ शिपिविष्टाय बन्धवे ॥
१११॥

त्रिविष्टपेश्वरायाथ नमो व्याघ्रेश्वराय च
।
विश्वेश्वराय दात्रे ते नमश्चन्द्रेश्वराय
च ॥ ११२॥

व्याधेश्वरायायुधिने यज्ञकेशाय ते नमः ।
व्यासेश्वराय
जैगीषव्येश्वरायाथ दिवोदासेश्वराय च ॥
११३॥

Page 485 of 523

नागेश्वराय न्यायाय न्यायनिर्वाहकाय च ।
शरण्याय सुपात्राय कालचक्रप्रवर्तिने ॥
११४॥

विचक्षणाय दंष्ट्राय वेदाश्वाय नमो नमः ।
नीलजीमूतदेहाय परात्मज्योतिषे नमः ॥ ११५॥

शरणागतपालाय महाबलपराय च ।
सर्वपापहरायाथ महानादाय ते नमः ॥ ११६॥

कृष्णस्य जयदात्रे ते बिल्वकेशाय ते नमः ।
दिव्यभोगाय दूताय कोविदाय नमो नमः ॥ ११७॥

कामपाशाय चित्राय चित्राङ्गाय नमो नमः ।
नमो मातामहायाथ नमस्ते मातरिश्वने ॥ ११८॥

निःसङ्गाय सुनेत्राय विद्येशाय जयाय च ।
व्याघ्रसम्मर्दनायाथ मध्यस्थाय नमो नमः ॥
११९॥

अङ्गुष्ठशिरसा लङ्कानाथदर्पहराय च ।
वैयाघ्रपुरवासाय नमः सर्वेश्वराय च ॥ १२०॥

नमः परावरेशाय जगत्स्थावरमूर्तये ।

Page 485 of 523

नमोऽप्यनुपमेशाय शार्ङ्गिणे
विष्णुमूर्तये ॥ १२१॥

नारायणाय रामाय सुदीप्ताय नमो नमः ।
नमो ब्रह्माण्डमालाय गोधराय वरूथिने ॥ १२२॥

नमः सोमाय कूप्याय नमः पातालवासिने ।
नमस्ताराधिनाथाय वागीशाय नमो नमः ॥ १२३॥

सदाचाराय गौराय स्वायुधाय नमो नमः ।
अतर्क्यायाप्रमेयाय प्रमाणाय नमो नमः ॥
१२४॥

कलिग्रासाय भक्तानां
भुक्तिमुक्तिप्रदायिने ।
संसारमोचनायाथ वर्णिने लिङ्गरूपिणे ॥ १२५॥

सच्चिदानन्दरूपाय पापराशिहराय च ।
गजारये विदेहाय त्रिलिङ्गरहिताय च ॥ १२६॥

अचिन्त्यशक्तयेऽलङ्घ्यशासनायाच्युताय च ।
नमो राजाधिराजाय चैतन्यविषयाय च ॥ १२७॥

नमः शुद्धात्मने ब्रह्मज्योतिषे
स्वस्तिदाय च ।

मयोभुवे च दुर्ज्ञेयसामर्थ्याय च यज्वने ॥
१२८॥

चक्रेश्वराय वै तुभ्यं नमो नक्षत्रमालिने ।
अनर्थनाशनायाथ भस्मलेपकराय च ॥ १२९॥

सदानन्दाय विदुषे सगुणाय विरोधिने ।
दुर्गमाय शुभाङ्गाय मृगव्याधाय ते नमः ॥
१३०॥

प्रियाय धर्मधाम्ने ते प्रयोगाय विभागिने ।
नाद्यायामृतपानाय सोमपाय तपस्विने ॥ १३१॥

नमो विचित्रवेषाय पुष्टिसंवर्धनाय च ।
चिरन्तनाय धनुषे वृक्षाणां पतये नमः ॥ १३२॥

निर्मायायाग्रगण्याय व्योमातीताय ते नमः ।
संवत्सराय लोप्याय स्थानदाय स्थविष्णवे ॥
१३३॥

व्यवसायफलान्ताय महाकर्तृप्रियाय च ।
गुणत्रयस्वरूपाय नमः सिद्धस्वरूपिणे ॥
१३४॥

नमः स्वरूपरूपाय स्वेच्छाय पुरुषाय च ।

Page 488 of 523

कालात्पराय वेद्याय नमो ब्रह्माण्डरूपिणे
॥ १३५॥

अनित्यनित्यरूपाय तदन्तर्वर्तिने नमः ।
नमस्तीर्थ्याय कूल्याय पूर्णाय वटवे नमः ॥
१३६॥

पञ्चतन्मात्ररूपाय
पञ्चकर्मेन्द्रियात्मने ।
विशृङ्खलाय दर्पाय नमस्ते विषयात्मने ॥
१३७॥

अनवद्याय शास्त्राय स्वतन्त्रायामृताय च ।
नमः प्रौढाय प्राज्ञाय योगारूढाय ते नमः ॥
१३८॥

मन्त्रज्ञाय प्रगल्भाय प्रदीपविमलाय च ।
विश्ववासाय दक्षाय वेदनिःश्वसिताय च ॥ १३९॥

यज्ञाङ्गाय सुवीराय नागचूडाय ते नमः ।
व्याघ्राय बाणहस्ताय स्कन्दाय दक्षिणे नमः
॥ १४०॥

क्षेत्रज्ञाय रहस्याय स्वस्थानाय वरीयसे ।
गहनाय विरामाय सिद्धान्ताय नमो नमः ॥ १४१॥

Page 488 of 523

Page 489 of 523

महीधराय गृह्याय वटवृक्षाय ते नमः ।
ज्ञानदीपाय दुर्गाय
सिद्धान्तैर्निश्चिताय च ॥ १४२॥

श्रीमते मुक्तिबीजाय कुशलाय विवासिने ।
प्रेरकाय विशोकाय हविर्धानाय ते नमः ॥ १४३॥

गम्भीराय सहायाय भोजनाय सुभोगिने ।
महायज्ञाय तीक्ष्णाय नमस्ते भूतचारिणे ॥
१४४॥

नमः प्रतिष्ठितायाथ महोत्साहाय ते नमः ।
परमार्थाय शिशवे प्रांशवे च कपालिने ॥ १४५॥

सहजाय गृहस्थाय सन्ध्यानाथाय विष्णवे ।
सद्भिः सम्पूजितायाथ वितलासुरघातिने ॥
१४६॥

जनाधिपाय योग्याय कामेशाय किरीटिने ।
अमोघविक्रमायाथ नग्नाय दलघातिने ॥ १४७॥

सङ्ग्रामाय नरेशाय नमस्ते शुचिभस्मने ।
भूतिप्रियाय भूम्ने ते सेनाय चतुराय च ॥
१४८॥

Page 489 of 523

मनुष्यबाह्यगतये कृतज्ञाय शिखण्डिने ।
निर्लेपाय जटार्द्राय महाकालाय भैरवे ॥
१४९॥

नमो विरूपरूपाय शक्तिगम्याय ते नमः ।
नमः सर्वाय सदसत्सत्याय सुव्रताय च ॥ १५०॥

नमो भक्तिप्रियायाथ श्वेतरक्षापराय च ।
सुकुमारमहापापहराय रथिने नमः ॥ १५१॥

नमस्ते धर्मराजाय धनाध्यक्षाय सिद्धये ।
महाभूताय कल्पाय कल्पनारहिताय च ॥ १५२॥

ख्याताय जितविश्वाय गोकर्णाय सुचारवे ।
श्रोत्रियाय वदान्याय दुर्लभाय कुटुम्बिने
॥ १५३॥

विरजाय सुगन्धाय नमो विश्वम्भराय च ।
भवातीताय तिष्याय नमस्ते सामगाय च ॥ १५४॥

अद्वैताय द्वितीयाय कल्पराजाय भोगिने ।
चिन्मयाय नमः शुक्लज्योतिषे क्षेत्रगाय च ॥
१५५॥

सर्वभोगसमृद्धाय साम्परायाय ते नमः ।
नमस्ते स्वप्रकाशाय स्वच्छन्दाय सुतन्तवे
॥ १५६॥

सर्वज्ञमूर्तये तुभ्यं गुह्येशाय
सुशान्तये ।
शारदाय सुशीलाय कौशिकाय धनाय च ॥ १५७॥

अभिरामाय तत्त्वाय व्यालकल्पाय ते नमः ।
अरिष्टमथनायाथ सुप्रतीकाय ते नमः ॥ १५८॥

आशवे ब्रह्मगर्भाय वरुणायाद्रये नमः ।
नमः कालाग्निरुद्राय श्यामाय सुजनाय च ॥
१५९॥

अहिर्बुध्न्याय जाराय दुष्टानां पतये नमः ।
नमः समयनाथाय समयाय गुहाय च ॥ १६०॥

दुर्लङ्घ्याय नमस्तुभ्यं छन्दःसाराय
दंष्ट्रिणे ।
ज्योतिर्लिङ्गाय मित्राय जगतां हितकारिणे
॥ १६१॥

नमः कारुण्यनिधये श्लोकाय जयशालिने ।
ज्ञानोदयाय बीजाय जगद्विभ्रमहेतवे ॥ १६२॥

अवधूताय शिष्टाय छन्दसां पतये नमः ।
नमः फेन्याय गुह्याय सर्वबन्धविमोचिने ॥
१६३॥

उदारकीर्तये शश्वत्प्रसन्नवदनाय च ।
वसवे वेदकाराय नमो भ्राजिष्णुजिष्णवे ॥
१६४॥

चक्रिणे देवदेवाय गदाहस्ताय पुत्रिणे ।
पारिजातसुपुष्पाय गणाधिपतये नमः ॥ १६५॥

सर्वशाखाधिपतये प्रजनेशाय ते नमः ।
सूक्ष्मप्रमाणभूताय सुरपार्श्वगताय च ॥
१६६॥

अशरीरशरीराय अप्रगल्भाय ते नमः ।
सुकेशाय सुपुष्पाय श्रुतये पुष्पमालिने ॥
१६७॥

मुनिध्येयाय मुनये बीजसंस्थमरीचये ।
चामुण्डाजनकायाथ नमस्ते कृत्तिवाससे ॥
१६८॥

व्युप्तकेशाय योग्याय धर्मपीठाय ते नमः ।

महावीर्याय दीप्ताय बुद्धायाशनये नमः ॥
१६९॥

विशिष्टेष्टाय सेनान्ये द्विपदे कारणाय च ।
कारणानां भगवते बाणदर्पहराय च ॥ १७०॥

अतीन्द्रियाय रम्याय जनानन्दकराय च ।
सदाशिवाय सौम्याय चिन्त्याय शशिमौलये ॥
१७१॥

नमस्ते जातूकर्ण्याय सूर्याध्यक्षाय ते
नमः ।
ज्योतिषे कुण्डलीशस्य वरदायाभयाय च ॥ १७२॥

वसन्ताय सुरभये जयारिमथनाय च ।
प्रेम्णे पुरञ्जयायाथ पृषदश्वाय ते नमः ॥
१७३॥

रोचिष्णवेऽसुरजिते श्वेतपीताय ते नमः ।
नमस्ते चञ्चरीकाय तमिस्रमथनाय च ॥ १७४॥

प्रमाथिने निदाघाय चित्रगर्भाय ते नमः ।
शिवालयाय स्तुत्याय तीर्थदेवाय ते नमः ॥
१७५॥

पत्तीनां पतये तुभ्यं विचित्रगतये नमः ।
Var विचित्रशक्तये
नमो निस्तुलरूपाय सवित्रे तपसे नमः ॥ १७६॥

अहङ्कारस्वरूपाय मेघाधिपतये नमः ।
अपाराय तत्त्वविदे क्षयद्वीराय ते नमः ॥
१७७॥

पञ्चास्यायाग्रगण्याय विष्णुप्राणेश्वराय
च ।
अगोचराय याम्याय क्षेम्याय वडवाग्नये ॥
१७८॥

विक्रमाय स्वतन्त्राय स्वतन्त्रगतये नमः ॥

वनानां पतये तुभ्यं नमस्ते जमदग्नये ॥ १७९॥

अनावृताय मुक्ताय मातृकापतये नमः ।
नमस्ते बीजकोशाय दिव्यानन्दाय ते नमः ॥
१८०॥

नमस्ते विश्वदेवाय शान्तरागाय ते नमः ।
विलोचनसुदेवाय हेमगर्भाय ते नमः ॥ १८१॥

अनाद्यन्ताय चण्डाय मनोनाथाय ते नमः ।

Page 495 of 523

ज्ञानस्कन्दाय तुष्टाय कपिलाय महर्षये ॥
१८२॥

नमस्त्रिकाग्निकालाय देवसिंहाय ते नमः ।
नमस्ते मणिपूराय चतुर्वेदाय ते नमः ॥ १८३॥

स्वरूपाणां स्वभावाय ह्यन्तर्यागाय ते नमः
।
नमः श्लोक्याय वन्याय महाधर्माय ते नमः ॥
१८४॥

प्रसन्नाय नमस्तुभ्यं सर्वात्मज्योतिषे
नमः ।
स्वयम्भुवे त्रिमूर्तीनामध्वातीताय ते नमः
॥ १८५॥

सदाशिव उवाच
जपन्तु मामिकां देवाः नाम्नां दशशतीमिमाम्
।
मम चातिप्रियकरीं महामोक्षप्रदायिनीम् ॥
१८६॥

सङ्ग्रामे जयदात्रीं तु सर्वसिद्धिकरीं शुभाम् ।

Page 495 of 523

Page 496 of 523

यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥ १८७॥

पुत्रकामो लभेत्पुत्रं राज्यकामस्तु
राजताम् ।
प्राप्नुयात्परया भक्त्या धनधान्यादिकं
बहु ॥ १८८॥

शिवालये नदीतीरे बिल्वमूले विशेषतः ।
प्रजपेत्सिद्धिदां देवाः शुचौ देशे शमीतले
॥ १८९॥

धनकामस्तु
जुहुयाद्घृताक्तैर्बिल्वपत्रकैः ।
मोक्षकामस्तु गव्येन घृतेन प्रतिनामतः ॥
१९०॥

आयुष्कामस्तु जुहुयादाज्येन मधुना तथा ।
पुत्रकामस्तु जुहुयात्तिलाक्तेन तथाम्भसा
॥ १९१॥

मत्समीपे प्रदोषे च नत्वा भक्त्या जपेन्नरः
।
जीवन्सरूपतां प्राप्य सायुज्यं मम
चाप्नुयात् ॥ १९२॥

Page 496 of 523

Page 497 of 523

कालोऽपि जनशास्ता हि मम भक्तं न पश्यति ।
अहं पुरःसरस्तस्य नेष्यामि गगनस्थलम् ॥
१९३॥

त्रिसन्ध्यं यः पठेद्भक्त्या वत्सरं
नियमान्वितः ।
मच्चित्तो मन्मना भूत्वा
साक्षान्मोक्षमवाप्नुयात् ॥ १९४॥

रुद्रपाठेन यत्पुण्यं यत्पुण्यं वेदपाठतः
।
तत्पुण्यं लभते योऽसावेकावृत्त्या
पठेदिमाम् ॥ १९५॥

कन्याकोटिप्रदानेन यत्फलं लभते नरः ।
तत्फलं लभते सम्यङ्नाम्नां दशशतं जपन् ॥
१९६॥

अश्वमेधसहस्रस्य यत्फलं लभते नरः ।
कपिलाशतदानस्य तत्फलं पठनाद्भवेत् ॥ १९७॥

यः शृणोति सदा विद्यां श्रावयेद्वापि भक्तितः ।

Page 497 of 523

Page 498 of 523

सोऽपि मुक्तिमवाप्नोति यत्र गत्वा न शोचति
॥ १९८॥

यक्षराक्षसवेतालग्रहकूष्माण्डभैरवाः ।
पठनादस्य नश्यन्ति जीवेच्च शरदां शतम् ॥
१९९॥

ब्रह्महत्यादिपापानां नाशः स्याच्छ्रवणेन
तु ।
किं पुनः पठनादस्य मुक्तिः स्यादनपायिनी ॥
२००॥

इत्युक्त्वा स महादेवो भगवान्परमेश्वरः ।
पुनरप्याह भगवान्कृपया परया युतः ॥ २०१॥

दीयतां मम भक्तेभ्यो यदुक्तं भवघातकम् ।
इत्युक्त्वान्तर्दधे देवः
परानन्दस्वरूपधृक् ॥ २०२॥

श्रीकृष्ण उवाच
एतदेव पुरा रामो लब्धवान् कुम्भसम्भवात् ।
अरण्ये दण्डकाख्ये तु प्रजजाप रघूद्वहः ॥
२०३॥

Page 498 of 523

Page 499 of 523

नित्यं त्रिषवणस्नायी त्रिसन्ध्यं सुस्मरञ्शिवम् ।
तदासौ देवदेवोऽपि प्रत्यक्षः प्राह राघवम्
॥ २०४॥

महापाशुपतं दिव्यं प्रगृहाण रघूद्वह ।
एतदासाद्य पौलस्त्यं जहि मा शोकमर्हसि ॥
२०५॥

तदाप्रभृति भूदेवाः प्रजपन्ति सुभक्तितः ।
गृह्णन्तु परया भक्त्या भवन्तः सर्व एव हि ॥
२०६॥

श्रीव्यास उवाच
ततस्ते मुनयः सर्वे जगृहुर्मुनिपुङ्गवाः ।
गृह्णन्तु मम वाक्यं तु मुक्तिं प्राप्स्यथ
निश्चिताः ॥ २०७॥

भवद्भिरात्मशिष्येभ्यो दीयतामिदमादरात् ।
नाम्नां सहस्रमेतद्धि लिखितं यन्निकेतने ॥
२०८॥

अविमुक्तं तु तद्गेहं नित्यं तिष्ठति शङ्करः ।

Page 499 of 523

Page 500 of 523

अनेन मन्त्रितं भस्माखिलदुष्टविनाशनम् ॥
२०९॥

पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमम् ।
नाम्नां सहस्रेणानेन समं किञ्चिन्न
विद्यते ॥ २१०॥

॥ इति श्रीपद्मपुराणे
बिल्वकेश्वरमाहात्म्ये
श्रीकृष्णमार्कण्डेय संवादे
वेदसारशिवसहस्रनामस्तोत्रं सम्पूर्णम् ॥ ॥
॥ शिवसहस्रनामस्तोत्रं
शिवपुराणान्तर्गतम् ॥
सूत उवाच ।
श्रूयतां भो ऋषिश्रेष्ठ येन तुष्टो
महेश्वरः ।
तदहं कथयाम्यद्य शिवं नामसहस्रकम् ॥ १॥

श्री विष्णुरुवाच ।
शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः ।
अर्थिगम्यः सदाचारः शर्वः शम्भुर्महेश्वरः
॥ २॥

चन्द्रापीडश्चन्द्रमौलिर्विश्वं विश्वम्भरेश्वरः ।

Page 500 of 523

Page 501 of 523

वेदान्तसारसन्दोहः कपाली नीललोहितः ॥ ३॥

ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता
गणेश्वरः ।
अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः
स्वर्गसाधनः ॥ ४॥

ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः
।
वामदेवो महादेवः पटुः परिवृढो दृढः ॥ ५॥

विश्वरूपो विरूपाक्षो वागीशः शुचिसत्तमः ।
सर्वप्रमाणसंवादी वृषाङ्को वृषवाहनः ॥ ६॥

ईशः पिनाकी खट्वाङ्गी चित्रवेषश्चिरन्तनः ।
तमोहरो महायोगी गोप्ता ब्रह्मा च धूर्जटिः ॥ ७॥ पाठभेद ब्रह्माण्डहृज्जटी
कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः । पाठभेद प्रणतात्मकः
उन्नद्ध्रः पुरुषो जुष्यो दुर्वासाः पुरशासनः ॥ ८॥ पाठभेद उन्नध्रः दिव्यायुधः स्कन्दगुरुः परमेष्ठी परात्परः ।
अनादिमध्यनिधनो गिरीशो गिरिजाधवः ॥ ९॥

Page 501 of 523

Page 502 of 523

कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमो
मृदुः ।
समाधिवेद्यः कोदण्डी नीलकण्ठः परश्वधीः ॥
१०॥

विशालाक्षो मृगव्याधः सुरेशस्सूर्यतापनः ।
धर्मधाम क्षमाक्षेत्रं भगवान् भगनेत्रभित् ॥ ११॥ पाठभेद धर्माध्यक्षः
उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः
परन्तपः ।
दाता दयाकरो दक्षः कपर्दी कामशासनः ॥ १२॥

श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः
।
लोककर्ता मृगपतिर्महाकर्ता महौषधिः ॥ १३॥

सोमपोमृतपः सौम्यो महातेजा महाद्युतिः ।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः ॥ १४॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः
।
नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखी
॥ १५॥

Page 502 of 523

Page 503 of 523

अजातशत्रुरालोकसम्भाव्यो हव्यवाहनः ।
लोककारो वेदकरः सूत्रकारः सनातनः ॥ १६॥

महर्षिः कपिलाचार्यो
विश्वदीप्तिस्त्रिलोचनः ।
पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्तिकृत्
सुधीः ॥ १७॥

धातृधामा धामकरः सर्वगः सर्वगोचरः ।
ब्रह्मसृग्विश्वसृक् सर्गः
कर्णिकारप्रियः कविः ॥ १८॥

शाखो विशाखो गोशाखः शिवो भिषगनुत्तमः ।
गङ्गाप्लवोदको भव्यः पुष्कलः स्थपतिः
स्थिरः ॥ १९॥

विजितात्मा विधेयात्मा भूतवाहनसारथिः ।
सगणो गणकायश्च सुकीर्तिश्छिन्नसंशयः ॥ २०॥

कामदेवः कामपालो भस्मोद्धूलितविग्रहः ।
भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ॥
२१॥

समावर्तोऽनिवृत्तात्मा धर्मपुञ्जः सदाशिवः ।

Page 503 of 523

Page 504 of 523

अकल्मषश्च पुण्यात्मा चतुर्बाहुर्दुरासदः
॥ २२॥

दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः ।
अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्धनः ॥
२३॥

शुभाङ्गो लोकसारङ्गो जगदीशो जनार्दनः ।
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥
२४॥ पाठभेद भस्मशुद्धिकरोऽभीरु
असाध्यः साधुसाध्यश्च भृत्यमर्कटरूपधृक् ।
हिरण्यरेताः पौराणो रिपुजीवहरो बली ॥ २५॥

महाह्रदो महागर्तः सिद्धो बृन्दारवन्दितः
।
व्याघ्रचर्माम्बरो व्याली महाभूतो
महानिधिः ॥ २६॥

अमृतोमृतपः श्रीमान् पाञ्चजन्यः प्रभञ्जनः
। पाठभेद पञ्चजन्यः
पञ्चविंशतितत्त्वस्थः पारिजातः परात्परः ॥
२७॥

सुलभः सुव्रतः शूरो वाङ्मयैकनिधिर्निधिः ।

Page 504 of 523

Page 505 of 523

वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥ २८॥

आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः ।
पाठभेद श्रमणः
प्रमाणभूतो दुर्ज्ञेयः सुवर्णो वायुवाहनः
॥ २९॥

धनुर्धरो धनुर्वेदो गुणः शशिगुणाकरः ।
सत्यः सत्यपरोऽदीनो धर्माङ्गो धर्मशासनः ॥
३०॥

अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः ।
अभिचार्यो महामायो विश्वकर्मविशारदः ॥ ३१॥

वीतरागो विनीतात्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नो जितकामो जितप्रियः
॥ ३२॥

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।
तरस्वी तारको धीमान् प्रधानः प्रभुरव्ययः ॥
३३॥

लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः । पाठभेद लोकपालोऽन्तरात्मा च

Page 505 of 523

Page 506 of 523

वेदशास्त्रार्थतत्वज्ञो नियमो नियताश्रयः ॥ ३४॥

चन्द्रः सूर्यः शनिः केतुर्वराङ्गो विद्रुमच्छविः ।
भक्तिवश्यः परं ब्रह्मा मृगबाणार्पणोऽनघः ॥ ३५॥ पाठभेद परब्रह्म
अद्रिरद्र्यालयः कान्तः परमात्मा जगद्गुरुः ।
सर्वकर्मालयस्तुष्टो मङ्गल्यो मङ्गलावृतः
॥ ३६॥

महातपा दीर्घतपाः स्थविष्ठः स्थविरो धृवः ।
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥
३७॥

संवत्सरकरो मन्त्रः प्रत्ययः सर्वतापनः ।
अजः सर्वेस्वरः सिद्धो महातेजा महाबलः ॥
३८॥

योगी योग्यो महारेताः सिद्धिः
सर्वादिरग्रहः ।
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥ ३९॥

Page 506 of 523

Page 507 of 523

सुकीर्तिः शोभनः स्रग्वी वेदाङ्गो वेदविन्मुनिः ।
भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुराधरः
॥ ४०॥

अमृतः शाश्वतः शान्तो बाणहस्तः प्रतापवान्
।
कमण्डलुधरो धन्वी ह्यवाङ्मनसगोचरः ॥ ४१॥

अतीन्द्रियो महामायः सर्ववासश्चतुष्पथः ।
कालयोगी महानादो महोत्साहो महाबलः ॥ ४२॥

महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः ।
निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥
४३॥

अनिर्देश्यवपुः श्रीमान्
सर्वाचार्यमनोगतिः ।
बहुश्रुतिर्महामायो नियतात्मा
ध्रुवोऽध्रुवः ॥ ४४॥

ओजस्तेजो द्युतिधरो जनकः सर्वशासकः । नृत्यप्रियो नृत्यनित्यः प्रकाशात्मा प्रकाशकः ॥४५॥ पाठभेद नित्यनृत्यः

Page 507 of 523

Page 508 of 523

स्पष्टाक्षरो बुधो मन्त्रः समानः
सारसम्प्लवः ।
युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः ॥
४६॥

इष्टो विशिष्टः शिष्टेष्टः सुलभः सारशोधनः
।
तीर्थरूपस्तीर्थनामा तीर्थदृश्यस्तु
तीर्थदः ॥ ४७॥

अपां निधिरधिष्ठानं विजयो जयकालवित् ।
पाठभेद दुर्जयो
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥
४८॥

विमोचनः सुरगणो विद्येशो बिन्दुसंश्रयः ।
वातरूपोऽमलोन्मायी विकर्ता गहनो गुहः ॥ ४९॥

करणं कारणं कर्ता सर्वबन्धविमोचनः ।
व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥
५०॥

गुरुदो ललितोऽभेदो भावात्मात्मनि संस्थितः ।

Page 508 of 523

Page 509 of 523

वीरेश्वरो वीरभद्रो वीरासनविधिर्गुरुः ॥
५१॥

वीरचूडामणिर्वेत्ता चिदानन्दो नदीधरः ।
आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः
॥ ५२॥

वालखिल्यो महावीरस्तिग्मांशुर्बधिरः खगः ।
पाठभेद बालखिल्यो
अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ॥
५३॥

मघवान् कौशिको गोमान् विरामः सर्वसाधनः ।
मघवाकौशिको
ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ॥
५४॥

अमोघदण्डी मध्यस्थो हिरण्यो ब्रह्मवर्चसः
। पाठभेद दण्डो
परमार्थः परो मायी शम्बरो व्याघ्रलोचनः ॥
५५॥ पाठभेद परोमायः संवरो रुचिर्बहुरुचिर्वैद्यो वाचस्पतिरहस्पतिः
।
रविर्विरोचनः स्कन्दः शास्ता वैवस्वतो यमः
॥ ५६॥

Page 509 of 523

Page 510 of 523

युक्तिरुन्नतकीर्तिश्च सानुरागः पुरञ्जयः
।
कैलासाधिपतिः कान्तः सविता रविलोचनः ॥ ५७॥

विश्वोत्तमो वीतभयो विश्वभर्ताऽनिवारतः ।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥
५८॥

दूरश्रवो विश्वसहो ध्येयो दुस्स्वप्ननाशनः
।
उत्तारणो दुष्कृतिहा विज्ञेयो दुस्सहोऽभवः
॥ ५९॥

अनादिर्भूर्भुवो लक्ष्मीः किरीटी
त्रिदशाधिपः ।
विश्वगोप्ता विश्वकर्ता सुवीरो
रुचिराङ्गदः ॥ ६०॥

जननो जनजन्मादिः प्रीतिमान्नीतिमान्
ध्रुवः ।
वशिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥
६१॥

प्रणवः सत्पथाचारो महाकोशो महाधनः ।

Page 510 of 523

जन्माधिपो महादेवः सकलागमपारगः ॥ ६२॥

तत्त्वं तत्त्वविदेकात्मा
विभुर्विष्णुविभूषणः । पाठभेद
विष्णुर्विभू
ऋषिर्ब्राह्मण ऐश्वर्यं
जन्ममृत्युजरातिगः ॥ ६३॥

पञ्चयज्ञसमुत्पत्तिर्विश्वेशो विमलोदयः ।
पाठभेद पञ्चतत्त्व
आत्मयोनिरनाद्यन्तो वत्सलो भक्तलोकधृक् ॥
६४॥ पाठभेद अनाद्यन्तो ह्यात्मयोनिर्
गायत्रीवल्लभः प्रांशुर्विश्वावासः
प्रभाकरः ।
शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा
॥ ६५॥

अनेमिरिष्टनेमिश्च मुकुन्दो विगतज्वरः ।
स्वयञ्ज्योतिर्महाज्योतिस्तनुज्योतिरचञ्च
लः ॥ ६६॥

पिङ्गळः
कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः ।

Page 512 of 523

ज्ञानस्कन्दो
महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥ ६७॥
पाठभेद स्कन्धो
भगो विवस्वानादित्यो गतपारो बृहस्पतिः ।
कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥ ६८॥

उदारकीर्तिरुद्योगी सद्योगी सदसन्मयः ।
पाठभेद सदसन्त्रपः
नक्षत्रमाली नाकेशः स्वाधिष्ठानः षडाश्रयः
॥ ६९॥

पवित्रः पापहारी च मणिपूरो नभोगतिः ।
पाठभेद पापनाशश्च
हृत्पुण्डरीकमासीनः शक्रः शान्तो वृषाकपिः
॥ ७०॥

उष्णो ग्रहपतिः कृष्णः समर्थोनर्थनाशनः ।
अधर्मशत्रुरज्ञेयः पुरुहूतः पुरश्रुतः ॥
७१॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः
।
जगद्धितैषी सुगतः कुमारः कुशलागमः ॥ ७२॥

Page 512 of 523

Page 513 of 523

हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः ।
आरोग्यो नयनाध्यक्षो विश्वामित्रो धनेश्वरः ॥ ७३॥ नमना?
ब्रह्मज्योतिर्वसुधामा महाज्योतिरनुत्तमः
। पाठभेद वसुर्धामा
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥
७४॥

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः
पराशरः ।
निरावरणनिर्वारो वैरञ्च्यो विष्टरश्रवाः ॥
७५॥

आत्मभूरनिरुद्धोत्रिर्ज्ञानमूर्तिर्महायशाः ।
लोकवीराग्रणीर्वीरश्चण्डः सत्यपराक्रमः ॥
७६॥

व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः ।
अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः
॥ ७७॥

आयुः शब्दपतिर्वाग्मी प्लवनः शिखिसारथिः ।

Page 513 of 523

Page 514 of 523

असंसृष्टोऽतिथिः शत्रुप्रमाथी पादपासनः ॥
७८॥

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।
जप्यो जरादिशमनो लोहितश्च तनूनपात् ॥ ७९॥

वृषदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
पाठभेद बृहदश्वो
निदाघस्तपनो मेघभक्षः परपुरञ्जयः ॥ ८०॥

सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः
।
वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥
८१॥

अङ्गिरा गुरुरात्रेयो विमलो विश्वपावनः ।
पावनः पुरजिच्छक्रस्त्रैविद्यो वरवाहनः ॥
८२॥ पाठभेद नववारणः
मनो बुद्धिरहङ्कारः क्षेत्रज्ञः
क्षेत्रपालकः ।
जमदग्निर्बलनिधिर्विगालो विश्वगालवः ॥ ८३॥
पाठभेद बलनिधिः यः?
अघोरोऽनुत्तरो यज्ञः श्रेयो
निःश्रेयसप्रदः ।
शैलो गगनकुन्दाभो दानवारिररिन्दमः ॥ ८४॥

Page 514 of 523

Page 515 of 523

चामुण्डो जनकश्चारुर्निश्शल्यो
लोकशल्यधृक् ।
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥
८५॥

आम्नायोऽथ समाम्नायस्तीर्थदेवः शिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥ ८६॥

न्यायनिर्णायको नेयो न्यायगम्यो निरञ्जनः । पाठभेद न्यायी
सहस्रमूर्धा देवेन्द्रः सर्वशस्त्रप्रभञ्जनः ॥ ८७॥ पाठभेद शास्त्र मुण्डी विरूपो विकृतो दण्डी नादी गुणोत्तमः । पाठभेद मुण्डो दानी
पिङ्गलाक्षो हि बह्वक्षो नीलग्रीवो
निरामयः ॥ ८८॥ पाठभेद जनाध्यक्षो
सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक् ।
पद्मासनः परञ्ज्योतिः पारम्पर्यफलप्रदः ॥
८९॥

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
परावरज्ञो वरदो वरेण्यश्च महास्वनः ॥ ९०॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।

Page 515 of 523

Page 516 of 523

देवासुरमहामित्रो देवासुरमहेस्वरः ॥ ९१॥

देवासुरेश्वरो दिव्यो देवासुरमहाश्रयः ।
देवदेवोऽनयोऽचिन्त्यो देवतात्मात्मसम्भवः
॥ ९२॥

सद्यो महासुरव्याधो देवसिंहो दिवाकरः ।
विबुधाग्रचरः श्रेष्ठः
सर्वदेवोत्तमोत्तमः ॥ ९३॥

शिवज्ञानरतः श्रीमान् शिखी
श्रीपर्वतप्रियः ।
वज्रहस्तः सिद्धखड्गो नरसिंहनिपातनः ॥ ९४॥

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नन्दी नन्दीश्वरोऽनन्तो नग्नव्रतधरः शुचिः
॥ ९५॥

लिङ्गाध्यक्षः सुराध्यक्षो युगाध्यक्षो
युगापहः ।
स्वधामा स्वगतः स्वर्गी स्वरः स्वरमयः
स्वनः ॥ ९६॥

बाणाध्यक्षो बीजकर्ता कर्मकृद्धर्मसम्भवः । पाठभेद धर्मकृत्

Page 516 of 523

Page 517 of 523

दम्भो लोभोऽथ वै शम्भुः सर्वभूतमहेश्वरः ॥
९७॥ पाठभेद लोभोऽर्थविच्छम्भुः श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः
।
लोकोत्तरस्फुटो लोकस्त्र्यम्बको नागभूषणः
॥ ९८॥

अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः ।
पाठभेद मयद्वेषी
हीनदोषोऽक्षयगुणो दक्षारिः पूषदन्तभित् ॥
९९॥

धूर्जटिः खण्डपरशुः सकलो निष्कलोऽनघः ।
अकालः सकलाधारः पाण्डुराभो मृडो नटः ॥ १००॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ।
सन्मार्गपः प्रियोऽधूर्तः
पुण्यकीर्तिरनामयः ॥ १०१॥

मनोजवस्तीर्थकरो जटिलो नियमेश्वरः ।
जीवितान्तकरो नित्यो वसुरेता वसुप्रदः ॥
१०२॥

सद्गतिः सिद्धिदः सिद्धिः सज्जातिः खलकण्टकः ।

Page 517 of 523

Page 518 of 523

कलाधरो महाकालभूतः सत्यपरायणः ॥ १०३॥

लोकलावण्यकर्ता च लोकोत्तरसुखालयः ।
चन्द्रसञ्जीवनः शास्ता लोकग्राहो महाधिपः
॥ १०४॥

लोकबन्धुर्लोकनाथः कृतज्ञः कृत्तिभूषितः ।
अनपायोऽक्षरः कान्तः सर्वशस्त्रभृतां वरः ॥ १०५॥ पाठभेद शास्त्र
तेजोमयो द्युतिधरो लोकमानी घृणार्णवः ।
शुचिस्मितः प्रसन्नात्मा ह्यजेयो
दुरतिक्रमः ॥ १०६॥

ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः ।
तुम्बवीणो महाकायो विशोकः शोकनाशनः ॥ १०७॥

त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः
।
अव्यक्तलक्षणो देवो व्यक्तोऽव्यक्तो
विशांपतिः ॥ १०८॥

परः शिवो वसुर्नासासारो मानधरो यमः ।
ब्रह्मा विष्णुः प्रजापालो हंसो
हंसगतिर्वयः ॥ १०९॥

Page 518 of 523

Page 519 of 523

वेधा विधाता धाता च स्रष्टा हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सदागतिः ॥ ११०॥

हिरण्यगर्भो द्रुहिणो भूतपालोथ भूपतिः ।
सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः
॥ १११॥

देवप्रियो देवनाथो देवको देवचिन्तकः ।
विषमाक्षो विरूपाक्षो वृषदो वृषवर्धनः ॥
११२॥

निर्ममो निरहङ्कारो निर्मोहो निरुपद्रवः ।
दर्पहा दर्पदो दृप्तः सर्वार्थपरिवर्तकः ॥
११३॥

सहस्रार्चिर्भूतिभूषः
स्निग्धाकृतिरदक्षिणः ।
भूतभव्यभवन्नाथो विभवो भूतिनाशनः ॥ ११४॥

अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः ।
निष्कण्टकः कृतानन्दो निर्व्याजो
व्याजमर्दनः ॥ ११५॥

Page 519 of 523

Page 520 of 523

सत्त्ववान् सात्त्विकः सत्यः कृतस्नेहः कृतागमः ।
अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत् ॥ ११६॥

सुप्रीतः सुखदः सूक्ष्मः सुकरो
दक्षिणानिलः ।
नन्दिस्कन्दो धरो धुर्यः
प्रकटप्रीतिवर्धनः ॥ ११७॥

अपराजितः सर्वसहो गोविन्दः सत्ववाहनः ।
अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः ॥
११८॥

वाराहशृङ्गधृक् शृङ्गी बलवानेकनायकः ।
शृतिप्रकाशः श्रुतिमानेकबन्धुरनेकधृक् ॥
११९॥

श्रीवत्सलः शिवारम्भः शान्तभद्रः समो यशः ।
भूयशो भूषणो भूतिर्भूतिकृद् भूतभावनः ॥
१२०॥

अकम्पो भक्तिकायस्तु कालहानिः कलाविभुः ।
सत्यव्रती महात्यागी नित्यः शान्तिपरायणः
॥ १२१॥

Page 520 of 523

Page 521 of 523

परार्थवृत्तिर्वरदो विरक्तस्तु विशारदः ।
शुभदः शुभकर्ता च शुभनामा शुभः स्वयम् ॥
१२२॥

अनर्थितो गुणग्राही ह्यकर्ता कनकप्रभः ।
स्वभावभद्रो मध्यस्थः शत्रुघ्नो
विघ्ननाशनः ॥ १२३॥

शिखण्डी कवची शूली जटी मुण्डी च कुण्डली ।
अमृत्युः सर्वदृक्
सिंहस्तेजोराशिर्महामणिः ॥ १२४॥

असङ्ख्येयोऽप्रमेयात्मा वीर्यवान्
वीर्यकोविदः ।
वेद्यश्च वै वियोगात्मा परावरमुनीश्वरः ॥
१२५॥ पाठभेद सप्तावर
अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ।
सुरेशः शरणः सर्वः शब्दः प्रतपतां वरः ॥
१२६॥

कालपक्षः कालकालः सुकृती कृतवासुकिः ।
महेष्वासो महीभर्ता निष्कलङ्को विशृङ्खलः
॥ १२७॥

Page 521 of 523

Page 522 of 523

द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विश्वतः सम्प्रवृत्तस्तु व्यूढोरस्को महाभुजः ॥ १२८॥

सर्वयोनिर्निराटङ्को नरनारायणप्रियः ।
पाठभेद निरातङ्को
निर्लेपो यतिसङ्गात्मा निर्व्यङ्गो
व्यङ्गनाशनः ॥ १२९॥

स्तव्यः स्तवप्रियः स्तोता
व्यासमूर्तिर्निराकुलः । पाठभेद स्तुति
निरवद्यमयोपायो विद्याराशिश्च सत्कृतः ॥
१३१॥

प्रशान्तबुद्धिरक्षुण्णः सङ्ग्रहो
नित्यसुन्दरः ।
वैयाघ्रधुर्यो धात्रीशः सङ्कल्पः
शर्वरीपतिः ॥ १३२॥

परमार्थगुरुर्दत्तः सूरिराश्रितवत्सलः ।
सोमो रसज्ञो रसदः सर्वसत्वावलम्बनः ॥ १३२
एवं नाम्नां सहस्रेण तुष्टाव हि हरं हरिः ।
प्रार्थयामास शम्भुं वै पूजयामास पङ्कजैः ॥
१३३॥

Page 522 of 523

Page 523 of 523

ततः स कौतुकी शम्भुश्चकार चरितं द्विजाः । महद्भूतं सुखकरं तदेव शृणुतादरात् ॥ १३४॥

इति श्रीशिवमहापुराणे चतुर्थ्यां
कोटिरुद्रसंहितायां
शिवसहस्रनामवर्णनं नाम
पञ्चत्रिंशोऽध्यायः ॥ ३५॥

Page 523 of 523